॥ श्रीः ॥

शुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयिनां

नित्यकर्म्मप्रयोगमाला.

श्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनिवासिगौड-
वंशावतंसनानानिबन्धकारक पं० वैद्य
श्रीचतुर्थीलाल (चौथमल)
शर्मणा प्रणीता ।

सैव

क्षेमराज-श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

(खेतवाडी ७ वीं गली खम्बाटा लेन)

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशिता ।

संवत् १९६७, शके १८३२.

ग्रंथकर्त्ता पंडित चतुर्थीलाल शर्मा.

प्रस्तावना ।

अयि श्रौतस्मार्तकर्मानुष्ठानप्रसक्तमानस—सच्चरित्रपवित्रिताखिलदिङ्मण्डलमहोदया विद्वांसः ! नैतदविदितं तत्रभवतां भवताम्, यत्किल करुणाकूपारेण भगवता परमेश्वरेण पुरुषार्थचतुष्टयसाधनोपयोगिकर्मानुष्ठानोद्बोधका वेदाः प्रजाश्रेयसे प्रादुर्भावयामासिर इति । तत्र भारतीयाः केचन कर्मानुष्ठानपद्धतिं जानन्त्येव न, केचन ज्ञात्त्वापि नानुतिष्ठन्ति, परमनुष्ठानाभावाज्ज्ञानं न सप्रयोजनम् । यथा—" अन्तर्गतं तमश्छेत्तुं शास्त्राद्बोधोहि न क्षमः । यथा न नश्यति तमः कृतया दीपवार्त्तया ॥ " इति केचन नित्यादिकर्मानुष्ठानबद्धादरा अपि तत्कर्म पद्धतिनिबन्धमन्तरा क्लिश्यन्ति । तत्र यद्यपि मैथिलदाक्षिणात्यनिर्मिताः केचन ग्रन्थाः समुपलभ्यन्ते परन्तु गौडनिबन्धग्रन्थानां यवनराज्यकालतो लुप्तप्रायत्वात्तेषां तु तदभाव एव । अथ च येषु सर्वविषयज्ञातारो महान्तो विद्वांसो बहवः सन्ति तेषामन्यदीयनिबन्धतः कर्मकरणं किं न हास्यास्पदम् ? इति मनसि निधाय मया चतुर्थीलालभास्करनामा द्वादश निबन्धात्मको महानिबन्धो निबद्धः, तत्र चाष्टौ मुद्रिताः सन्ति ।

अयं च यथार्थनामा **नित्यकर्मप्रयोगमाला**नामकग्रन्थो निर्माय मया **मुम्बयीस्थ " श्रीवेंकटेश्वर "** यन्त्रालयाध्यक्षाय **क्षेमराज श्रीकृष्णदास**श्रेष्ठिने समर्पितः । तेन च शोभनशीशकाक्षरैः पुष्टमसृणपत्रेषु संमुद्रय प्रकाश्यते तदेतद्ग्रहणकर्मानुष्ठानादिनाऽनुगृह्णन्तु महात्मान इति भृशमभ्यर्थ्यते—

पण्डितचतुर्थीलालशर्मा,

सूचनापत्रम् ।

विदित हो कि हमारे प्राचीन गौडमहानिबंध मुसलमानोंके कारणसे नष्टप्राय हो गये केचित् शेष भी रहे सो मैथिल, दाक्षिणात्योंने उन्हीं ग्रंथोंसे अपने २ सांप्रदायिक ग्रंथ बनाके लोप कर दिये और हमारे गौड पण्डितोंके शिथिल रहनेसे तथा विद्याका प्रचार कम होनेसे भी प्राचीन निबंध लुप्त होगये आजकल सर्वत्र मैथिल सांप्रदायिक ग्रंथ जैसे श्राद्धविवेक, शुद्धिविवेक, आचारादर्श, पितृभक्ति इत्यादि और दाक्षिणात्यनिबंध जैसे निर्णयसिन्धु, धर्मसिंधु, व्रतराज, कमलाकर, प्रयोगरत्न, शांतिसार आदि प्रचलित हो रहे हैं, हमारे गौड भाई उन्हींसे काम चलाते हैं और अपने पितृ पितामहादि शिष्टोंके हस्तलिखित प्राचीन पद्धतियोंको बांध बांधकर रख दिये हैं तथा आपसमें वादविवाद करके दूसरे ग्रंथोंकी उन्नति करतेहैं और अपनी गौडसंप्रदायको रसातलमें डुबो रहेहैं यह बडे दुःखकी बात है हम लोगोंमें अच्छे अच्छे विद्वान् इससमय हैं परंतु अपनी विशेष आयु केवल शुष्क व्याकरण तथा तर्क वादविवादमें ही व्यय करते हैं यदि व्याकरण आदि पढके वेद, मीमांसा, धर्मशास्त्र, कर्मकांड आदिकोंमें चित लगावें तो गौडसंप्रदायका उद्धार होना कुछ कठिन नहीं है हमें आशा है कि हमारे सुयोग्य गौड पंडितगण इस प्रार्थनापर ध्यान देके निज ग्रंथोंका, निज सांप्रदायका जीर्णोद्धार अवश्य करेंगे और हमने गौड भाइयोंकी उन्नतिके अर्थ चातुर्थीलालभास्कर नाम महानिबन्ध अनेक

कर्मकांडपद्धतियोंसे शोभित बहुत बडा ग्रंथ संग्रह कियाहै जिसकी श्लोकसंख्या प्रायः पचहत्तर हजार७५००० होगी, जिसमें १२ ग्रंथ हैं जिनमेंसे ८ निबंध छपके प्रकाशित होचुके हैं शेष भी समयानुकूल ईश्वर चाहेंगे तो शीघ्रही प्रकाशित हो जावेंगे।

और जिन महाशयोंने इस मेरे परिश्रमको देखके धन्यवाद दिया है उनमेंसे थोडोंके नाम नीचे प्रकाशित किये जाते हैं शेष महाशयोंके समयानुसार किये जावेंगे—

महामहो० श्री पं०शिवकुमारजी काशी.	पं० मन्नुलालजी वेदपाठी काशी.
पंडित श्रीगरुडध्वजजी कुरुक्षेत्र.	पं० रामभक्त वेदपाठी काशी.
पं० श्रीनानूरामजी शास्त्री रतनगढ.	पं० घनश्यामजी मिश्र सुजानगढ.
पं० गौरीशंकरजीवैद्य घोसावाकलकत्ता.	पं० कनीरामजी पौराणिक रामगढ.
पं० उमादत्तजी खंडेलवाल चूरू.	पं० कन्हैयालालजी चूरू.
पं० श्रीहरनंदरायजी निर्मल फतेपुर.	पं० जालीरामजी मिश्र फतेपुर.
पं० ज्वालादत्त निर्मल फतेपुर.	पं० गणपतजी किराडू बीकानेर.
पं० स्नेहीरामजी शास्त्री चिडावा.	पं० गोपीकृष्ण कथाव्यास बीकानेर.
पं० नंदलालजी सुरोलिया रामगढ.	पं० सदारामजी रामगढ.
पं० बालचंद्रजी शास्त्री रामगढ.	पं० भगवानदत्तजी रामगढ.
पं० छोटेलालजी शर्मा रतनगढ.	पं० हरनारायणजी करुथा.
पं० रामशरणजी शर्मा पहेवा.	पं० जीवानंदमिश्रअंग्रेजीशास्त्रीकलकत्ता
पं० रामजीदासजी धर्मशास्त्री बोहग्राम.	पं० रामचंद्रजी जोसी बिसाउ.

पं० बलदेवजी नैयायक लक्ष्मणगढ.	पं० लक्ष्मीनारायणजीचोमवाल फतेपुर.
पं० विलासरायजी झुंझुणु.	पं० गणेशराम धरड रत्नगढ.
पं० रामजीलालजी चिडावा.	पं० दुर्गादत्तजी मिश्र सिरदारशहर.
पं० रामचंद्रजी अलवर.	पं० बैजनाथजी मिश्र बिसाउ.
पं० हीरालालजीशेखावाटीभूषणफतेपुर.	पं० रामचंद्रजी जोशी सीकर.
पं० नंदलालजी शास्त्री मुंबई.	पं० गोपीरामजी चोमवाल फतेपुर.
पं० उदमीरामजी वैयाकरण रतनगढ.	पं० घनश्यामजी चोमवाल फतेपुर.
पं० रमापति हुसियारपुर.	पं० किरधीचंद्र वैद्य लक्ष्मणगढ.
पं० श्रीधरशर्मा व्याख्यानरत्न पुष्करजी.	पं० किसनलालजी सलेमाबाद.
पं० घासीरामजी बोगड रत्नगढ.	पं० जयनारायणजी मिश्र फतेपुर.

इत्यादि बहुतसे पंडितोंका धन्यवाद मिला है और हम इन महाशयोंको प्रसन्न अन्तःकरणसे धन्यवाद देते है, तथा सेठ खेमराजजी श्रीकृष्णदासजीको विशेष धन्यवाद देते हैं कि जिन्होंने निज द्रव्य व्यय करके ग्रन्थोंको प्रकाशित किया है ।

आपका प्रेमी–**पं० चतुर्थीलालजी गौड,**

मु० रत्नगढ राजश्रीबीकानेर.

॥ श्रीः ॥

नित्यकर्मप्रयोगमालाविषयानुक्रमणिका.

अनुक्रमणिका ।

इति नित्यकर्मप्रयोगमालाविषयानुक्रमणिका समाप्ता ।

अथ माध्यंदिनानां-
नित्यकर्मप्रयोगमाला।

वंदे महेश्वरं शांतं सानंदं सुंदरं शिवम् ॥
श्रीशं गणेशं गिरिजां तपनं पितरौ तथा ॥ १ ॥
नत्वा विश्वेश्वरं स्वेष्टं दृष्ट्वा हरिहरादिकान् ॥
चतुर्थीलालशर्माहं करोमि शिवतुष्टये ॥ २ ॥

ग्रंथमिति शेषः। अथोच्यते गृहस्थस्य नित्यकर्म यथाविधि॥यत्कृत्वाऽनृण्यमाप्नोति दैवात्पैत्र्याच्च मानुषात् ॥३॥ अथात्र ब्राह्ममुहूर्तमारभ्यास्वापं कर्माण्युच्यंते ॥ ब्राह्मो मुहूर्तः संध्यापूर्वं दंडद्वयात्मकः ॥ आगमे ब्राह्मे मुहूर्ते चोत्थाय चिंतयेद्रघुनंदनम् ॥ श्रीपूर्वं[१]

---

१ "श्रीजय राम जय जय" इति ।

जयमध्यस्थं द्विजैर्यातं विचक्षणः ॥ १ ॥ अत्र स्वापे प्रायश्चित्तं रत्नावल्याम्—ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी । तां करोति द्विजो मोहात्पादकृच्छ्रेण शुद्ध्यति ॥ २ ॥

अथ प्रयोगः ॥ पूर्वोक्तब्राह्मे मुहूर्त उत्थाय स्वकरतलमवलोक्य गण्डूषत्रयं कृत्वा नेत्रे प्रक्षाल्य आचम्येष्टदेवतां नमस्कृत्य प्रातःस्मरणं कुर्यात ॥ तद्यथा—हे जिह्वे रससारज्ञे सर्वदा मधुरप्रिये । नारायणाख्यपीयूषं पिब जिह्वे निरंतरम् ॥ १ ॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ २ ॥ भारते—अनिरुद्धं गजं ग्राहं वासुदेवं महाद्युतिम् । संकर्षणं महात्मानं प्रद्युम्नं च तथैव च ॥३॥ मत्स्यं कूर्मं च वाराहं वामनं तार्क्ष्यमेव च ॥ नारसिंहं च नागेंद्रं सृष्टिसंहारकारकम् ॥४ ॥ विश्वरूपं हृषीकेशं गोविंदं मधुसूदनम् । त्रिदशैर्वंदितं देवं दृढभक्तिमनूपमम् ॥ ५ ॥ एतानि प्रातरुत्थाय

संस्मरिष्यंति ये नराः ॥ सर्वपापैः प्रमुच्यंते स्वर्गलोकमवाप्नुयुः ॥ ६ ॥ शिवादिचिंतनम्--प्रातः स्मरामि भवभीतिहरं सुरेशं गंगाधरं वृषभवाहनमंबिकेशम् । खट्वाङ्गशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयम् ॥ १ ॥ प्रातर्नमामि गिरिशं गिरिजार्द्धदेहं सर्गस्थितिप्रलयकारणमादिदेवम् ॥ विश्वेश्वरं विजितविश्वमनोभिरामं संसाररोगहरमौषधम० ॥ २ ॥ प्रातर्भजामि शिवमेकमनंतमाद्यं वेदांतवेद्यमनघं पुरुषं पुराणम् ॥ नामादिभेदरहितं च विकारशून्यं संसार० ॥ ३ ॥ प्रातः समुत्थाय शिवं विचिंत्य श्लोकत्रयं येनुदिनं पठंति ॥ ते दुःखजातं बहुजन्मसंचितं हित्वा पदं यांति तदैव शंभोः ॥४॥ प्रातः स्मरामि भव भीतिमहार्तिशांत्यै नारायणं गरुडवाहनमब्जनाभम् । ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ १॥ प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः । नारायणस्य नरका-

र्णवतारणस्य पारायणप्रवणविप्रपरायणस्य ॥ २ ॥
प्रातर्भजामि भजतामभयं करोति प्राक्सर्वजन्म-
कृतपापभयापहत्यै । यो ग्राहवक्रपतितांघ्रिगजें-
द्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः ॥ ३ ॥
श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत् ॥ लोक-
त्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥ ४ ॥ ब्रह्मा
मुरारिस्त्रिपुरांतकारिर्भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्र-
भातम् ॥ १ ॥ भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुल-
स्त्यः पुलहश्च गौतमः ॥ रैभ्यो मरीचिश्च्यवन-
श्च दक्षः कुर्वंतु० ॥ २ ॥ सनत्कुमारः सनकः सनं-
दनः सनातनोप्यासुरिपिंगलौ च ॥ सप्तस्वराः स-
प्तरसातलानि कुर्वंतु स० ॥ ३ ॥ सप्तार्णवाः सप्तकु-
लाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ॥ भूरादिकृ-
त्वा भुवनानि सप्त कुर्वंतु स० ॥४॥ पृथ्वी सगंधा स-
रसास्तथापः स्पर्शी च वायुर्ज्वलितं च तेजः । नभः
सशब्दं महता सहैव कुर्वंतु स० ॥ ५ ॥ इत्थं प्रभाते
परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च तद्वत् । दुःस्वप्न-

नाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादा-
त् ॥ ६ ॥ पुण्यश्लोकजनस्मरणमाचारमयूखे--पु-
ण्यश्लोको नलो राजा पुण्यश्लोको जनार्दनः ॥ पुण्य-
श्लोका च वैदेही पुण्यश्लोको युधिष्ठिरः ॥ ७ ॥ अश्व-
त्थामा बलिर्व्यासो हनुमांश्च विभीषणः ॥ कृपः
परशुरामश्च सप्तैते चिरजीविनः ॥ ८ ॥ सप्तैतान्सं-
स्मरेन्नित्यं मार्कंडेयमथाष्टमम् ॥ जीवेद्वर्षशतं सोपि
सर्वव्याधिविवर्जितः ॥ ९ ॥ अहल्या द्रौपदी सीता
तारा मंदोदरी तथा । पंचकं ना स्मरेन्नित्यं महा-
पातकनाशनम् ॥ १० ॥ अविमुक्तचरणयुगलं
दक्षिणमूर्तेश्च कुक्कुटचतुष्कम् ॥ स्मरणमपि वाराण-
स्या निहन्ति दुःस्वप्नमपशकुनम् ॥ ११ ॥ पद्म-
पुराणे--उमा उषा च वैदेही रमा गंगेति पंचकम् ॥
प्रातरेव स्मरेन्नित्यं सौभाग्यं वर्धते सदा ॥ १२ ॥
सोमनाथो वैद्यनाथो धन्वंतरिरथाश्विनौ ॥ पंचैता-
न्स्मरतो नित्यं व्याधिस्तस्य न विद्यते ॥ १३ ॥
कपिला कालियोऽनंतो वासुकिस्तक्षकस्तथा ॥ पंचै-

तान्स्मरतो नित्यं विषबाधा न जायते ॥ १४ ॥ हरं हरिं हरिश्चंद्रं हनुमंतं हलायुधम् ॥ पंचकं वै स्मरेन्नित्यं घोरसंकटनाशनम् ॥ १५ ॥ रामं स्कंदं हनूमंतं वैनतेयं वृकोदरम् ॥ पंचैतान्संस्मरेन्नित्यं भवबाधा विनश्यति ॥ १६ ॥ आदित्यश्च उपेंद्रश्च चक्रपाणिर्महेश्वरः ॥ दंडपाणिः प्रतापी स्यात्क्षुत्तृड्बाधा न जायते ॥ १७ ॥ वसुर्वरुणसोमौ च सरस्वती च सागरः॥ पंचैतान्संस्मरेद्यत्र तृषा तत्र न बाधते॥१८॥ सनत्कुमारदेवर्षिशुकभीष्मप्लवंगमाः ॥ पंचैतान्स्मरतो नित्यं कामस्तस्य न बाधते ॥१९॥ रामलक्ष्मणौ सीता च सुग्रीवो हनुमान्कपिः ॥ पंचैतान्स्मरतो नित्यं महाबाधा प्रमुच्यते ॥ २० ॥ कर्कोटकस्य नागस्य दमयंत्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥ २१ ॥ वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च । रामं च सीतां स्मरति प्रभाते तस्यार्थलाभो विजयश्च नित्यम् ॥ २२ ॥ छंदोगपरिशिष्टे-श्रोत्रियं शुभगां

गां च अग्निमग्निचितिं तथा । प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते ॥ १ ॥ इत्यादिपुराणमंत्रान्पठित्वा ॥ समुद्रवसने देवि पर्वतस्तनमंडले । विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥ इति प्रार्थ्योत्थाय रविं गुरुं तुलसीं गां च नमस्कृत्य शौचं कुर्यात् ॥ इति प्रातःस्मरणम् ॥

अथ मूत्रपुरीषोत्सर्गः ॥ तत्र क्रमः ॥ ग्रामाद्बहिर्नैर्ऋत्यामिषुविक्षेपात्यये शुद्धमृत्तिकां ससिकतां जलपात्रं चादाय कीटादिरहितस्थलं गत्वा मृज्जलपात्रे निधाय अयज्ञियैरनार्द्रैस्तृणैर्भूमिमाच्छाद्य प्रावृतशिराः पृष्ठतः कंठलंबितयज्ञोपवीत एकवस्त्रश्चेद्दक्षिणकर्णनिहितयज्ञोपवीतो मौनी घ्राणास्ये पिधाय दिवोदङ्मुखो रात्रौ दक्षिणामुखः प्राणबाधादिषु यथासुखमुखो वा मूत्रपुरीषे उत्सृज्य लोष्टादिना गुदं परिमृज्य गृहीतशिश्नश्चोत्थाय पूर्वगृहीतमृज्जलपात्रे गृहीत्वार्द्रामलकमात्रमृज्जलैर्द्विवारं लिंगशौचं कृत्वाऽर्धप्रसृतितदर्धार्धमृज्जलैस्त्रिवारमपानं संशोध्य पुनर्जलैरेव लिंगगुदे प्रक्षाल्य शुद्धमृत्तिकया एकवारं हस्तं प्रक्षाल्य

शुद्धभूमिमागत्य अन्यमृज्जलैर्दशवारं वामकरं प्रक्षाल्य ततः करद्वयं सप्तवारं तावद्भिरेवं मृज्जलैः प्रक्षाल्य वामदक्षिणपादौ प्रत्येकं त्रिः प्रक्षाल्य अन्यजलेन द्वादशगंडूषान्वामभागे कृत्वा जलपात्रं त्रिः पर्युक्ष्य उपवीती द्विराचामेत् (मूत्रमात्रोत्सर्गे तु) पूर्ववदेकवारं लिंगं प्रक्षाल्य वामकरं त्रिः प्रक्षाल्य करद्वयं द्विः प्रक्षाल्यैकैकया मृदा पादौ प्रक्षाल्य गंडूषचतुष्टयं विधायाचामेत् ॥ एवमेव मैथुने ज्ञेयम् ॥ इति शौचप्रकारः ॥

अथाचमनप्रयोगः ॥ शुचौ देशे भूमिष्ठपादोंतर्जानुहस्तः प्राङ्मुख उदङ्मुखो वा उपविश्य संहतांगुलिना शुद्धं जलं गृहीत्वा मुक्तांगुष्ठकनिष्ठेन पाणिना ब्रह्मतीर्थेन केशवनारायणमाधवेति संबुद्धयंतैस्त्रिभिर्नामभिस्त्रिः पिबेत् ॥ ततः करौ प्रक्षाल्य अंगुष्ठमूलेन ओष्ठौ संमृज्य तं प्रक्षालयेदित्याचमनम् ॥

अथ दंतधावनम् ॥ प्रतिपत्षष्ठी-अष्टमी-नवमी-एकादशी-चतुर्दशी-पंचदशी-संक्रांति-व्यतीपात-

व्रतोपवासश्राद्धदिनार्कदिनातिरिक्तदिनेषु ब्राह्मणो द्वादशांगुलप्रमाणेन क्षत्रियवैश्यौ तु दशाष्टाङ्गुलमानेन च कनिष्ठिकाग्रवत्स्थूलेन तिंतिण्यादिविहितवृक्षोद्भवेन चूर्णीकृताग्रेण प्रक्षालितेन शुष्केणार्द्रेण वा प्राङ्मुखो मौनेन दन्तधावनं कुर्यात् । प्रतिषिद्धदिनेषु च पर्णादिना तर्जनीवर्ज्यांगुल्या अपां द्वादशगण्डूषैर्वा दंतान्संशोधयेत् । दन्तधावनमंत्राः—ॐ अन्नाद्याय व्यूहध्वꣳ सोमो राजायमागमत् । स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च इति ॥ ॐ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १ ॥ इति मंत्रेणाभिमंत्र्य ॥ मुखदुर्गंधिनाशाय दंतानां च विशुद्धये । ष्ठीवनाय च गात्राणां कुर्वेहं दंतधावनम् ॥ १ ॥ इति मंत्रमुक्त्वा दंतान्संशोध्य जिह्वोल्लेखं च कृत्वा द्वादशगंडूषांश्च वामभागे कृत्वा ॐकारं गायत्रीं च स्मृत्वा स्नानं कुर्यात ॥ इति दंतधावनम् ॥

अथ स्नानप्रयोगः ॥ आचारादर्शे कात्यायनः—यथोक्तमृत्तिकामार्द्रं गोमयं कुशान्कृष्णतिलान्सुर-

भीणि पुष्पाण्यादाय सुमना नद्यादिकं गत्वा त-त्तीरे शुचौ देशे पृथक् पृथक् स्थापयेत । तदनंतरं सूर्याभिमुखस्तीर्थानि प्रार्थयेत् । ॐ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा । आगच्छंतु पवि-त्राणि स्नानकाले सदा मम ॥१॥ त्वं राजा सर्वतीर्था-नां त्वमेव जगतः पिता ॥ याचितं देहि मे तीर्थं सर्व-पापैः प्रमुच्यते ॥ २ ॥ अपामधिपतिस्त्वं च तीर्थे-षु वसतिस्तव ॥ वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्र-यच्छ मे ॥ ३ ॥ गंगे च यमुने चैव गोदावरि सरस्व-ति ॥ नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ ४ ॥ इति प्रार्थ्य ततः पाणिपादं प्रक्षाल्य नाभि-मात्रजलं गत्वा कुशहस्तो बद्धशिख आचम्य देशकालौ संकीर्त्य मम कायवाङ्मनःकृतकर्म-दोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःस्ना-नं करिष्य इति संकल्प्य ॐ उरु ७ हिराजाव्वरु-णश्चकारसूर्यायपंथामन्वेतवाऽउ । अपदेपादाप्र तिधातवेकरुतापं वक्ताहृदयाव्विधश्चित् । नमोव्वरु

णायाभिष्ठितो व्वरुणस्यपाशः इति न्युब्जांजलि-
हस्तेन तोयमामंत्र्य ॥ ॐ ये ते शतं व्वरुण ये सहस्रं
यज्ञियाः पाशा वितता महांतः। तेभिर्न्नो अद्य सवि
तोत व्विष्णुर्विश्वे मुंचंतु मरुतः स्वर्क्काः ॥ इति त्रिः
प्रदक्षिणं जलमावर्त्तयेत् ॥ ततः ॥ ॐ सुमित्रियानऽ
आपओषधयःसंतु इति जलांजलिमादाय ॐ इति
दुर्मित्रियास्तस्मैसंतुयोस्मांद्वेष्टि यंचवयं द्विष्मः
इति तीर्थतटे द्वेष्यं प्रति निषिंचेत्॥ततः कटिं बस्त्यू-
रु जंघे चरणौ प्रत्येकं मृत्तोयाभ्यां त्रिस्त्रिः प्रक्षा-
ल्य एकं पादं जलेऽपरं स्थले निधायाचामेत् ॥ ततः
उदकं नमस्कृत्य ॐ इदंविष्णुर्व्विचक्रमेत्रेधानि
दधेपदं समूढमस्यपाꣳसुरे स्वाहा इति मृत्तिक-
यांगानि संस्पृश्य नाभिमात्रं जलं प्रविशेत् ॥ ॐ
आपोअस्मान्मातरः शुंधयंतु घृतेनंनो घृतप्वः
पुनंतु विश्वꣳहिरिप्रंप्रवहंतिदेवीरिति मंत्रेण सू-

यांभिमुखो निमज्जेत् ॥ ततः स्नात्वा । ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ इदमापः प्रवहत ...

दांदिभ्युतशुचिरापूत ऽएमि ॥ इति निमज्ज्योन्मज्ज्याऽऽचम्य ॐमानस्तोकेतनयेमान ऽआयुषि मानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानो व्वीरान्रुद्र भामिनोवधीर्हविष्मंतः सदमित्वाहवामहे इति मंत्रेण गोमयेनांगानि विलिंपेत् ॥ ततो मार्जनम्–ॐ इमम्मेव्वरुणश्रुधीहवमद्याचमृडयत्वामवस्यु राचके ॥ १ ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ÷ अहेडमानोव्वरुणेहबोद्ध्युरुशंऽसमानऽआयुःप्रमोषीः ॥ २ ॥ ॐत्वंनोऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडो ऽअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषांऽसिप्रमुमुग्ध्यस्मत् ॥ ३ ॥ ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणंऽरराणोव्वी

हिमृडीकछंसुहवोनऽएधि ॥ ४ ॥ ॐ मापोमौषधीर्हिछँसीद्धाम्नोधाम्नोराजुंस्ततोव्वरुणनोमुंच यद्गाहुरघ्न्याइति वरुणेतिशपामहेततोवरुणनोमुंच ॥५॥ ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंविमंध्यमछंश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥६॥ ॐमुंचंतुमाशपथ्यादथोव्वरुण्यदुत ॥ अथोयमस्यपड्वीशात्सर्वस्मादेवकिल्बिषात् ॥ ७ ॥ ॐ अवभृथनिचुंपुणनिचेरुरसिनिचुंपुणःअवदेवैर्देवकृतमेनो यासिषमवमत्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्याहि ॥ ८ ॥

इत्यष्टभिर्मंत्रैर्हस्तेन प्रत्येकं शिरसि जलं प्रक्षिपेत् ॥ ततो वहति जले प्रवाहाभिमुखः स्थिरे सूर्याभिमुखो मौनी मज्जेत् ॥ तत आचम्य वक्ष्यमाणैरोंकारादिभिर्मंत्रैः प्रतिमंत्रं कुशत्रयेण जलेन प्रदक्षिणमात्मानं पावयेत् ॥ ॐ पुनातु ॥ १ ॥ ॐ भूः पुनातु ॥२॥ ॐ भुवः पुनातु ॥ ३ ॥ ॐस्वः

पुनातु ॥ ४ ॥ ॐमहः पुनातु ॥ ५ ॥ ॐ जनःपुनातु ॥ ६ ॥ ॐ तपः पुनातु ॥ ७ ॥ ॐ सत्यं पुनातु ॥ ८ ॥ ॐ तत्सवितुरीतिसर्वं पुनातु ॥ ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातनमहेरणायचक्षसे ॥ ६ ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः उशतीरिव मातरः ॥ ७ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ॥आपाजनयथाचनः ॥ ८ ॥ ॐ इदमापःप्रवहतावद्यञ्चमलंचयत् यच्चाभिदुद्रोहानृतं यच्चशेपेऽअभीरुणम्॥आपोमातस्मादेनसः पवमानश्च मुंचतु ॥ ९ ॥ ॐ हविष्मतीरिमाऽआपोहविष्मा २ ॥ ऽआविवासतिहविष्मान्देवोऽअध्वरोहविष्मां २ ॥ ऽअस्तुसूर्यः ॥ १० ॥ ॐ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः । तं देवेभ्योदेवत्रादत्तशुक्रपेभ्योयेषांभागस्थस्वाहा ॥ ११ ॥

ॐ कार्षिरसिसमुद्रस्य त्वाक्षित्याऽउन्नेयामिसमापोऽ अद्भिरग्मतसमोषधीभिरोषधीः ॥ १२ ॥ ॐ अपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ॥ याभिर्मित्रावरुणावभ्यषिंचन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १३ ॥ ॐ द्रुपदादिवमुमुचानः स्विन्नः स्नातो मलादिवपूतंपवित्रेणेवाज्यमापः शुंधन्तुमैनसः॥ १४॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतयेशंयोरभिस्रवंतुनः ॥ १५ ॥ ॐ अपाᳬंरसमुद्वयसᳬं सूर्येसन्तᳬं समाहितअपाᳬंरसस्ययोरसस्तम्वोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम् ॥ १६ ॥ ॐ अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः ॥ तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः ॥ १७ ॥ ॐ पुनंतुमापि

तरे॑ सोम्यासे॑ पुनन्तुंमापितामहा॒ पुनन्तुप्रपि॑ तामहा॒ पवित्रेणशतायुषा ॥ १८ ॥ ॐ पुनंतुमापि तामहा॒ पुनंतुप्रपितामहा॒ पवित्रेणशतायुषाव्वि श्वमायुर्व्व्यश्नवै ॥ १९ ॥ ॐ अग्नऽआयूꣳषिपवसऽ आसुवोर्ज्जमिषंचनः॥आरेबाधस्वदुच्छुनाम् ॥ २०॥ ॐ पुनन्तुमादेवजनाः पुनन्तु मनसाधिय॑ ॥ पुन न्तु विश्वाभूतानि जातवेदः पुनीहिमा ॥ २१ ॥ ॐ पवित्रेणपुनीहिमाशुक्रेणदेवदीद्य ॥ तूअग्नेक्रत्वा क्रतूꣳ॥ रनं ॥ २२ ॥ ॐ यत्तेपवित्रमर्च्चिष्यग्नेवि ततमंतराब्रह्मतेनपुनातुमा ॥ २३ ॥ ॐ पवमानः सोऽअद्यनः पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥ २४ ॥ ॐ उभाभ्यांदेवसवितःपवित्रेणसवेनच॥ मांपुनीहिव्विश्वतः ॥ २५ ॥ ॐ वैश्वदेवीपुनतीदे व्यागाद्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठास्तयामदंतः

सधमादेंषुव्वयꣳस्यामपतयोरयीणाम् ।२६॥ॐचित्प
तिर्मापुनातुदेवोमांसवितापुनात्वच्छिद्रेणपवित्रेणसू-
र्य्यस्यरश्मिभिः॑तस्यतेपवित्रपतेपवित्रपूतस्ययत्काम
ःपुनेतच्छकेयं॥२७॥एवं मार्ज्जनंकृत्वाॐअपाघमपकि
ल्बिषमपकृत्यामपोरपः अपामार्गत्वमस्मदपदुःष्व
प्न्यꣳसुव ॥ इतिमंत्रेणापामार्गैस्त्रिभिर्मार्जयेत् । तत
ॐकाण्डात्काण्डात्प्ररोहंतीपरुषः परुषस्पारि ॥ एवानो
दूर्वेप्रतनुसहस्रेणशतेनच ॥२८॥ इति मंत्रेण दूर्वाभि-
स्त्रिभिर्माजयेत् । ततः पूर्ववत् ॐइमं मे व्वरुणेत्यादि-
मंत्रैः शिरसि जलं निक्षिपेत् । ततः ऋष्यादिकं स्मृ-
त्वाऽन्तर्जले मग्नोऽघमर्षणं द्रुपदां च आयं गौरिति
वा ऋचं त्रिरावर्त्तयेत् ॥ ॐऋतं च सत्यं चाभीद्धा
त्तपसोऽध्यजायत । ततो राऽयजायत ततः समुद्रो
अर्णवः ॥ समुद्रादर्णवादधिसंवत्सरो अजायत
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचंद्र

मसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः॥ सशिरसं प्राणायामं वा त्रिः कुर्यात्॥ यद्वा परमात्मानं विष्णुं शेषशायिनं सायुधं सश्रीकं ध्यायेत् ॥

ततस्तीर्थप्रार्थना । ॐ विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता ॥ पाहि नस्त्वेनसस्तस्मादाजन्ममरणांतकात् ॥ १ ॥ तिस्रः कोटयोऽर्धकोटी च तीर्थानां वायुरब्रवीत् । दिवि भुव्यंतरिक्षे च तानि ते संति जाह्नवि ॥ २ ॥ नंदिनीत्येव ते नाम देवेषु नलिनीति च ॥ वृंदा पृथ्वी च शुभगा विश्वकाया शिवासिता ॥ ३ ॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसाधनी ॥ क्षेम्या च जाह्नवी चैव शांता शांतिप्रदायिनी ॥ ४ ॥ एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् । भवेत्संनिहिता तस्य गंगा त्रिपथगामिनी ॥ ५ ॥ नमामि गंगे तव पादपंकजं सुरासुरैर्वंदितदिव्यरूपम् ॥ भुक्तिं च मुक्तिं च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥ ६ ॥ या गतिर्यो-

गयुक्तानां मुनीनामूर्ध्वरेतसाम् । सा गतिः सर्वजं-
तूनां जाह्नवीतीरवासिनाम् ॥ ७ ॥ इति पठित्वा ना-
भिमात्रजलं गतः सन् स्नानांगतर्पणं कुर्यात् ॥

अथ तर्पणप्रयोगः ॥ॐमोदस्तृप्यताम् ॥ १ ॥
ॐप्रमोदस्तृप्य० ॥ २ ॥ ॐसुमुखस्तृ० ॥ ३ ॥ॐदु-
र्मुखस्तृप्य० ॥ ४ ॥ ॐअविघ्नस्तृ० ॥ ५ ॥ ॐवि-
घ्नकर्ता तृ० ॥ ६ ॥ ॐब्रह्मादयो देवास्तृप्यंताम्
॥ ७ ॥ ॐगौतमादय ऋषयस्तृप्यंताम् ॥ ८ ॥ इति
देवतीर्थेन एकैकमंजलिं जले प्राङ्मुखः क्षिपेत् ।
अथोदङ्मुखो निवीत्यूर्ध्वजुषः प्राजापत्येन ती-
र्थेन सनकादींस्तर्प्पयेत् । ॐसनकादयोमनुष्या-
स्तृप्यंताम् ॥ २ ॥ ततोपसव्यं दक्षिणाभिमुखः पि-
तृतीर्थेन कृष्णतिलोदकैः कव्यवाडनलादींस्तर्प-
येत् ॥ ॐकव्यवाडनलादयो देवपितरस्तृप्यंता-
म् ३ ॥ (इति त्रयोंजलयः) ॐअस्मत्पितृपितामहप्र-
पितामहास्तृप्यंताम् ३ ॥ ॐ अस्मन्मातामहप्र-
मातामहवृद्धप्रमातामहास्तृप्यंताम् ॥ ३ ॥ ॐआब्र-

ह्मस्तम्बपर्यंतं जगत्तृप्यताम् ॥ एवं स्नानांगतर्प-
णं कृत्वा यक्ष्मणे जलं दद्यात् ॥ ॐ यन्मया दूषितं
तोयं मलैः शारीरसम्भवैः । तस्य पापस्य शुद्धयर्थं
यक्ष्मैतत्ते तिलोदकम् ॥ १ ॥ ततस्तीरमागत्य । अ-
ग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम । भू-
मौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिम् ॥ इति जलां-
जलिं तटे निःक्षिपेत् ॥ इति स्नानांगतर्पणं कृत्वा
जलाद्बहिर्निष्क्रम्य अहतं श्वेतं धौतं वस्त्रं परिधाय
उपवस्त्रं गृहीत्वानंतरं कुशासने प्रागास्यो वोद-
गास्य उपविशेत् ॥ इति नद्यादिषु स्नानप्रयोगः ॥

अथ गृहस्थानां गृहे नित्यस्नानम् ॥ गृहे उष्णो-
दकेन स्नानं न तु शीतोदकेन । तद्विधिश्च पात्रे
शीतोदकं प्रक्षिप्य तदुपरि उष्णोदकेनापूर्य ॐ शन्नो
देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु
नः ॥ १ ॥ आपः पुनंतु० ॥ २ ॥ द्रुपदादिव ॥३॥
ऋतं च सत्यं० ॥ ४ ॥ आपोहिष्ठा० ॥ ५ ॥ इति
पंचभिर्ऋग्भिरभिमंत्र्य इमं मे वरुणेत्यादिना तीर्थानि

स्मरन् स्नायात ॥ गृहस्नाने संकल्पाचमनमघमर्षणं तर्पणं च न कार्यम् । एवं स्नात्वा वस्त्रेण पाणिना वा जलापनयनं कृत्वा शुष्कं शुभ्रमहतं कार्पासवस्त्रं परिधाय स्नानार्द्रवस्त्रमूर्ध्वमुत्तारयेत् ॥ (विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च ॥ श्रौतस्मार्त्ते नैव कुर्यात्) इति गृहे प्रातर्नित्यस्नानम् ॥

अथ तिलकधारणम् ॥ तत्रादौ वामहस्ते दक्षिणहस्तेन गंगादितीर्थमृत्तिकां वा गार्हपत्यौपासनाग्निभस्म गृहीत्वा पश्चादुदकमिश्रणानंतरं दक्षिणहस्तेन भस्म मर्दयेत् । तत्र मंत्राः ॐ अग्निरिति भस्म ॐ वायुरिति भस्म ॐ जलमिति भस्म ॐ स्थलमिति भस्म ॐ व्योमेति भस्म सर्वंᳬ ह वा इदं भस्म ॐ मन एतानि चक्षूंषि भस्मानीति भस्माभिमंत्र्य । ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् ॥ उर्व्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ ॐ त्र्यायुषं जमदग्नेरिति ललाटे । कश्यपस्य त्र्यायुषमिति ग्रीवायाम् । यद्देवेषु त्र्यायुषमिति दक्षिणांसे । तन्नो अस्तु त्र्यायुषमिति

हृदि । एतैर्मंत्रैर्ललाटादिषु धारयेत् । ततो रुद्राक्षधारणम् ॥

अथ संध्याप्रयोगः ॥ वामे बहून् कुशान् दक्षिणे पाणौ सपवित्रं कुशत्रयं च धृत्वा सप्रणवगायत्र्या शिखां बद्ध्वा ऐशान्यभिमुख आचम्य ऋतमित्यभिमंत्र्य पुनराचामेत् ॥ १ ॥ ॐ ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधिसंवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥ ॐ अपवित्रः पवित्रो वेत्यस्य वामदेव ऋषिः ॥ विष्णुर्देवता गायत्री छंदः हृदि पवित्रकरणे विनियोगः ॥ ॐअपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा । यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं जलेन संप्रोक्ष्य । ॐ पृथ्वीत्यस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता सुतलं छंदः । आसने विनियोगः ॥ ॐ

पृथिव त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ इति भूमिं प्रार्थयेत् ॥ अथ संकल्पः ॥ ॐ तत्सदद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य ब्रह्मणो द्वितीयपरार्द्धे तदादौ श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जंबूद्वीपे भरतखण्डे तत्रापि परमपवित्रे भारते वर्षे आर्यावर्त्तांतर्गतब्रह्मावर्त्तैकदेशे कुमारिकानामक्षेत्रे श्रीगंगायमुनयोरमुकदिग्भागे नर्मदाया उत्तरे तटे श्रीबौद्धावतारे अमुकनामसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकनक्षत्र अमुकराशिस्थिते चंद्रे अमुकराशिस्थिते सूर्ये अमुकदेवगुर्वादिशेषेषु ग्रहेषु यथास्थानस्थितेषु एवं ग्रहगुणविशिष्टायां तिथौ अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलसिद्ध्यर्थं मम उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातः-

संध्योपासनमहं करिष्य इति संकल्प्य वारिणात्मानं वेष्टयित्वा सप्रणवगायत्र्या रक्षां कुर्यात् ॥ ततः ॐकारस्य ब्रह्मा ऋषिर्गायत्री छंदोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारंभे विनियोगः ॥ ॐ सप्तव्याहृतीनां प्रजापतिः ऋषिर्गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांसि । अग्निवाय्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः । अनादिष्टप्रायश्चित्ते प्राणायामे विनियोगः ॐ गायत्र्या विश्वामित्रऋषिर्गायत्रीछंदः सविता देवताऽग्निर्मुखमुपनयने प्राणायामे विनियोगः ॥ ॐ शिरसः प्रजापतिर्ऋषिर्ब्रह्माग्निवायुसूर्या देवताः यजुश्छन्दः प्राणायामे विनियोगः ॥ इति ऋष्यादिकं स्मृत्वा। बद्धासनः सम्मीलितनयनो मौनी प्राणायामत्रयं कुर्यात् ॥ तत्र वायोरादानकाले पूरकनामा प्राणायामस्तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत्। धारणकाले कुंभकस्तत्र कमलासनं रक्तवर्णं ब्रह्माणं चतुर्मुखं हृदि ध्यायेत् । त्याग-

काले रेचकस्तत्र श्वेतं त्रिनेत्रं शिवं ललाटदेशे ध्यायेत् । त्रिष्वप्येतेषु प्रत्येकं त्रिर्मंत्राभ्यासः । प्रत्येकमोंकारादिसप्तव्याहृतयः ॥ ॐकारादिसावित्री ॐकारद्वयमध्यस्थं शिरश्चेति मंत्रस्तस्य स्वरूपं (ॐ भूः ॐ भुवः ॐस्वः ॐमहः ॐजनः ॐ तपः ॐसत्यं ॐतत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् ॐ आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरोम्) इति प्राणायामः ॥ तत ॐसूर्यश्चमेति ब्रह्मा ऋषिः प्रकृतिश्छंदः सूर्यो देवता अपामुपस्पर्शने विनियोगः ॥ ॐसूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहमापोऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा इति प्रातराचामेत् ॥ (ॐ आपः पुनन्त्विति विष्णुर्ऋषिरनुष्टुप्छंद आपोदे-

वता अपामुपस्पर्शने विनियोगः ॥ ॐ आपः पुनन्तु पृथ्वी पृथ्वी पूता पुनातु मां पुनंतु ब्रह्मणस्पतिं ब्रह्मपूता पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनातु मामापोऽसतां च प्रतिग्रहꣳ स्वाहा इति मध्याह्न आचामेत्) (ॐ अग्निश्च मेति रुद्र ऋषिः प्रकृतिश्छंदोग्निर्देवता अपामुपस्पर्शने विनियोगः ॥ ॐ अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहमापोऽमृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा इति सायमाचामेत्) (तत आपोहिष्ठेत्यादि त्र्यृचस्य सप्तभिः पदैः शिरसि अष्टमेन भूमौ नवमेनापि शिरसि कुशत्रयेण जलं क्षिपेत्) ॐ आपोहिष्ठेत्यादित्र्यृचस्य सिंधुद्वीप ऋषिर्गायत्री छंद आपो देवता मार्ज्जने विनियोगः ॥ ॐ आपोहिष्ठामयोभुवः ॐ तानऽऊर्जेदधातन

ॐ महेरणायचक्षसे ॐ योवः शिवतमोरसः ॐ तस्य भाजयतेहनः ॐउशतीरिवमातरः ॐ तस्माऽअरंङ्गमामवः ॐ यस्यक्षयाय जिन्वथ ॐआपोजनयथाचन ॥ इति मार्ज्जनम् ॥ ततः (करेण जलमादाय वारत्रयं द्रुपदां पठित्वा तज्जलं शिरसि क्षिपेत्) ॐद्रुपदादिवेति कोकिलो राजपुत्र ऋषिः आपो देवता अनुष्टुप्छंदः । अघमर्षणे विनियोगः ॥ ॐद्रुपदादिवमुमुचानः स्विन्नःस्नातोमलादिव पूतंपवित्रेणेवाज्यमापः शुधंतुमैनस (ततः करस्थजलं नासायां संयोज्य आयतासुरनायतासुर्वा त्रिः सकृद्वाऽघमर्षणं जपेत्) ॐऋतं च सत्यं चेति अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप्छंदो भाववृत्तो देवता अश्वमेधावभृथे विनियोगः ॥ ॐ ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत । ततो रात्र्यऽजायत ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधि संवत्सरो अजायत । अहो

रात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥ ततः ॐ अंतश्चरसीति तिरश्चीन ऋषिरनुष्टुप्छंदः आपो देवता आचमने विनियोगः ॥ ॐ अंतश्चरसि भूतेषु गुहायां विश्वतोमुखः । त्वं यज्ञस्त्वं वषट्कार आपोज्योती रसोमृतमित्यनेनाचामेत् ॥ तत अर्घ्यदानम् ॥ उत्थाय ॐभूर्भुवः स्वरिति गायत्र्या पुष्पमिश्रं जलं सूर्याभिमुखं वारत्रयं प्रक्षिपेत् ॥ (कालातिक्रमे सति ॐआकृष्णेन इति मंत्रेण चतुर्थार्घ्यं दद्यात्) ॐभूर्भुवःस्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिर्ऋषिः । अग्निवायुसूर्या देवताः । गायत्र्युष्णिगनुष्टुभश्छन्दांसि । ॐतत्सवितुरित्यस्य विश्वामित्र ऋषिः । सविता देवता । गायत्री छंदः । अर्घ्यदाने विनियोगः ॥ ॐभूर्भुवःस्वः ॐतत्सवितु० ब्रह्मस्वरूपिणे सूर्यनारायणाय नमः । इदमर्घ्यं दत्तं न मम असौ आदित्यो ब्रह्म । इत्यर्घ्यं दत्त्वा (प्रातः सायं च कृताञ्जलिर्मध्याह्ने ऊर्ध्वबाहुः सूर्यं ध्याय-

न्नुपतिष्ठेत् (एभिर्मंत्रैः) ॐउद्वयंतमित्यस्य हिरण्यस्तूप ऋषिरनुष्टुप्छंदः । सूर्यो देवता । सूर्योपस्थाने विनियोगः ॥ ॐउद्वयंतमंसस्पारिस्वःपश्यंत ॥ उत्तरं देवं देवत्रासूर्यमगंन्मज्योतिरुत्तमम् ॥ ॥ १ ॥ ॐउदुत्यमित्यस्य प्रस्कण्व ऋषिर्गायत्री छंदः । सूर्यो देवता । सूर्योपस्थाने विनियोगः ॥ ॐउदुत्यंजातवेदसंदेववंहंतिकेतवं÷॥दृशेविश्वायसूर्यम ॥ २ ॥ ॐ चित्रमित्यस्य कौत्स ऋषिस्त्रिष्टुप्छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यव्वरुणस्याग्नेः॥आप्रा द्यावापृथिवीऽअंतरिक्षंसूर्यऽआत्माजगतस्तस्थुषश्च ॥ ३ ॥ ॐतच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिरक्षरातीतिपुर उष्णिक्छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येमशरदः ÷ शतंजीवेम

शरद÷शतꣳशृणुयामशरदं÷शतंप्रब्रवामशरदं÷शतम
दीनाःस्यामशरदं÷शतं भूयश्चशरदं÷शतात् ॥
इत्युपस्थायोपविश्य ॥ ततः ॐ हृदयाय नमः ।
ॐ भूःशिरसे स्वाहा । ॐभुवः शिखायै वषट् ।
ॐस्वः कवचाय हुं । ॐभूर्भुवः स्वर्नेत्राभ्यां वौष-
ट् । ॐभूर्भुवः स्वः अस्त्राय फट् ॥ इत्यंगानि त्रिराव-
र्त्य ॥ ॐतत्पदं पातु मे पादौ जंघे मे सवितुः प-
दम् ॥ वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च
॥ १ ॥ देवस्य मे तु हृदयं धीमहीति गलं तथा ॥
धियो मे पातु जिह्वायां यः पदं पातु लोचने ॥ २ ॥
ललाटे नःपदं पातु मूर्द्धानं मे प्रचोदयात् ॥ इति
गायत्रीन्यासं च कुर्यात् ॥ तत ॐकारस्य ब्रह्मा
ऋषिर्गायत्री छंदोऽग्निर्देवता जपे विनियोगः ।
ॐ त्रिव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छं-
दांस्यग्निवाय्वादित्या देवताः जपे विनियोगः ॥
ॐ गायत्र्या विश्वामित्र ऋषिः गायत्री छंदः
सविता देवता जपे विनियोगः ॥ इति ऋष्या-

दिकं स्मृत्वा ॥ ॐ मुक्ताविद्रुमहेमनील-धवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां त-त्त्वार्थवर्णात्मिकाम् ॥ गायत्रीं वरदाभयाङ्कुशा-कशां शूलं कपालं गुणं शंखं चक्रमथारविंदयुग-लं हस्तैर्वहन्तीं भजे ॥ १ ॥ गायत्रीं ध्यायेत् ॥ तत ॐ तेजोसीति देवा ऋषयः शुक्रं देवतं गायत्री छंदो गायत्र्यावाहने विनियोगः ॥ ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवाना-मनाधृष्टंदेवयजनमसि ॥ इति गायत्रीमावाह्य ॐतुरीयस्य विमल ऋषिः परमात्मा देवता गा-यत्री छंदः गायत्र्युपस्थाने विनियोगः ॥ ॐगा यत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोर-जसे सावदोम् ॥ इत्युपस्थाय प्रातः प्राङ्मुखो मध्याह्ने सूर्याभिमुखस्तिष्ठन् सायं पश्चिमाभिमु-ख उपविष्ट उक्तविधिना सहस्रं शतं वा गायत्रीं जपेत् ॥ जप्यस्वरूपं यथा ॐभूर्भुवःस्वः तत्सवि

तुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ जपांते कवचं पठित्वा देवागात्विति पठेत् । ततः प्रणिपत्य विसर्जयेत् ॥ इति संध्याप्रयोगः ॥

अथ ब्रह्मयज्ञः ॥ तत्र कात्यायनः देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञेनाहं यक्ष्ये इति संकल्प्य कुशासने प्राङ्मुखोपविष्टः ब्रह्मयज्ञं कुर्यात् तद्यथा । ॐ विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्दधद्यज्ञपतावविह्रुतम् ॥ व्वातजूतो योऽअभिरक्षतित्मनाप्रजाः पुपोष पुरुधाव्विराजति ॥ १ ॥ उदुत्यञ्जातवेदसन्देवम्वहन्तिकेतवः दृशेव्विश्वायसूर्य्यम् ॥ २ ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ॥ ऽअनु ॥ त्वम्व्वरुणपश्यसि ॥ ३ ॥ दैव्यावध्वर्यूऽआगतꣳ रथेनसूर्य्यत्वचा मध्वायज्ञꣳ समञ्जाथेतम्प्रत्नथायम्वेनश्चित्रन्देवानाम् ॥ ॥ ४ ॥ तम्प्रत्नथापूर्वथाव्विश्वथेमथाज्ज्येष्ठताति

म्बर्हिषदᳬस्वर्विदं प्रतिचीनंवृजनं दोहसेधुनि-
माशुंजयन्तमनुयासुवर्धसे ॥ ५ ॥ अयम्वेन-
श्चोदयत्पृश्निगर्भाज्ज्योतिर्जरायूरजंसो विमानेइमम्
पाᳬ संङ्गमे सूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥
६ ॥ चित्रन्देवानामुदंगादनीकंचक्षुर्म्मित्रस्यवरुण-
स्याग्नेःआप्राद्यावापृथिवीऽअन्तरिक्षᳬ सूर्यऽआत्मा
जगतस्तस्थुषश्च ॥ ७ ॥ आनऽइडाभिर्व्विदथेसुश
स्तिव्विश्वानरःसवितादेवऽएतु अपियथायुवानोमत्स
थानोव्विश्वजगदभिपित्वेमनीषा ॥ ८ ॥ यदद्यकच्चवृ
त्रहन्नुदगाऽअभिसूर्य्यसर्व्वन्तदिन्द्रतेवशे ॥ ९ ॥ तर
णिर्व्विश्वदर्शतोज्योतिष्कृदसिसूर्य विश्वमाभासिरोचन-
म् ॥ १० ॥ तत्सूर्यस्यदेवत्वन्तन्महित्वम्मध्याकर्त्तो-
र्व्विततᳬसञ्जभारयदेदयुक्त हरितःसधस्थादाद्रात्रीवा

संस्तनुतेसिमस्मै ॥ ११॥तन्मित्रस्यव्वरुणस्याभिचक्षे सुर्य्योरूपंकृणुतेद्योरुपस्थे अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितःसम्भरन्ति॥१२॥बण्महाँ२असिसूर्य्य बडादित्यमहाँ२ असि महस्तेसतो महिमापनस्यतेद्धादेवमहाँ२ असि ॥ १३ ॥ बट्सूर्यश्रवसामहाँ२ असि सत्रादेवमहाँ२ असिमह्नादेवानामसुर्य्यःपुरोहितो व्विभुज्योतिरदाभ्यम् ॥ १४ ॥ श्रायन्तऽइव सूर्य्यंव्विश्वेदिन्द्रस्य भक्षत ॥ वसूनि जातेजनमानऽ ओजसाप्रतिभागन्नदीधिम ॥ १५ ॥ अद्यादेवाऽ उदितासूर्य्यस्यनिरंहसः पिपृता निरवद्यात् तन्नोमित्रोव्वरुणोमा महन्तामदितिः सिन्धुःपृथिवीऽउतद्यौः ॥ १६ ॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसविता रथेनादेवोयातिभुवनानिपश्यन् ॥ १७ ॥ अथ

पुरुषसूक्तम् ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदꣳ सर्व्वंयद्भूतंयच्चभाव्यम् उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः ॥ पादोस्य व्विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ततो व्विष्वं ङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोव्विराडजायतव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ॥ पशूँस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचस्सामानि जज्ञिरे ॥ छन्दाꣳसि जज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मा

दश्वाऽअजायन्तुयेकेचोभयादतः ॥ गावोहजज्ञि रेतस्मात्तस्माज्जाताअजावयः ॥ ८ ॥ तंयज्ञं बर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाऽ अयज-न्तसाध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखंकिमस्यासीत् किम्बाहू किमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्यमुख मासीद्बाहूराजन्यः कृतः ॥ ऊरू तदस्ययद्वैश्यः पद्भ्याᳬंशूद्रोअजायत ॥ ११ ॥ चन्द्रमामनसो जातश्चक्षोः सूर्योऽअजायत॥श्रोत्राद्वायुश्चप्राणश्चमुखा दग्निरजायत ॥ १२ ॥ नाभ्याऽआसीदन्तरि क्षᳬं शीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्यांभूमिर्दिशः श्रोत्रात्तथालोकाँ२ अकल्पयन् ॥ १३ ॥ यत्पु रुषेणहविषादेवायज्ञमतन्वत वसन्तोस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥ सप्तास्या

सन्परिधयस्त्रि॑ सप्तसमिधः॑ कृता॒ । देवाय यज्ञ न्तन्वाना अबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञम यजन्तदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाक म्महिमानः सचंतयत्रपूर्वेसाध्याः सन्तिदेवाः ॥ १६ ॥ अथ शिवसंकल्पः ॥ ओ३म् यज्जाग्रतोदू रमुदैतिदैवंतदुसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषां ज्यो तिरेकन्तन्मेमनः शिवसंकल्पमस्तु ॥ १ ॥ येनकर्माण्यपसोमनीषिणोयज्ञे कृण्वन्तिविदथेषुधी राः ॥ यदपूर्वंयक्षमन्तः प्रजानान्तन्मेमनः शिवसं- कल्पमस्तु ॥ २ ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योति रन्तरमृतम्प्रजासु यस्मान्नऋतेकिञ्चनकर्म्मक्रियतेतन्मे मनः शिवसंकल्पमस्तु ॥ ३ ॥ येनेदम्भूतम्भुवनं भवि ष्यत्परिगृहीतममृतेनसर्वम् ॥ येनयज्ञस्तायते सप्तहोता तन्मेमनः शिवसंकल्पमस्तु ॥ ४ ॥ यस्मिन्नृचः

सामयजूᳬषियस्मिन्प्रतिंष्ठितारथनाभाविंवाराः ॥ यस्मिंश्चित्तᳬं सर्व्वमोतंप्रजानान्तन्मेमनः शिवसं कल्पमस्तु ॥ ५ ॥ सुषारथिरश्वानिवयन्मनुष्या न्नेनीयतेभीशुभिर्व्वाजिनइवहृत्प्रतिंष्ठंयदजिरञ्जविंष्ठ न्तन्मेमनः शिवसकल्पमस्तु ॥ ६ ॥ अथ मण्ड लब्राह्मणम् ॥ ॐयदेतन्मंडलं तपतितन्महदुक्थ न्ताऋचः सऋचांलोकोथयदेतदर्चिर्दीप्यते तन्म हाव्रतं तानिसामानिससाम्नां लोकोथयऽएषऽए तस्मिन्मंडलेपुरुषः सोग्निस्तानियजूᳬषिसयजुषां लोकः ॥ १ ॥ सैषात्रय्येवविद्यातपतितद्धैतदप्यविद्वा ᳬसऽऽआहुस्त्रयीवाऽऽएषा विद्यातपतीतिव्वाग्घैवत त्पश्यन्तीव्वदति ॥ २ ॥ सएषएव्वमृत्युः सऽएषएव मृत्युर्यएष एतस्मिन्मण्डलेपुरुषोथैतदमृतंयदेतदर्चिर्दी

प्यते तस्मान्मृत्युर्नम्रियतेमृतेह्यन्तस्तस्मादुनदृश्यतेमृ तेह्यन्तः ॥ ३ ॥ तदेषश्लोकोभवति तदेषश्लोकोभ वत्यंतरंमृत्योरमृतमित्यवरꣳ ह्येतन्मृत्योरमृतंमृत्या वमृतमाहितमित्येतस्मिन्हि पुरुषएतन्मण्डलं प्रति ष्ठितं तपतिमृत्युर्व्विवस्वन्तं वस्तऽइत्यसौवाऽआदि त्यो व्विवस्वानेषह्यहोरात्रेव्विवस्तेतमेषवस्तेसर्वतो ह्यने नपरिवृतोमृत्योरात्माव्विवस्वतीत्येतस्मिन्हिमण्डल ऽएतस्य पुरुषस्यात्मैतदेष श्लोको भवति ॥ ४ ॥ तयोर्वाएतयोरुभयोरेतस्यचार्चिषऽएतस्यच पुरुषस्यै- तन्मण्डलं प्रतिष्ठातस्मान्महदुक्थम्परस्मैनशꣳसेन्ने- देतांप्रतिष्ठांछिनदाऽइत्येताꣳहसप्रतिष्ठांछितेयोमहदु क्थंपरस्मैशꣳसतितस्मादुक्थशासंभूयिष्ठंपरिचक्षते प्रतिष्ठाछिन्नोहिभवतीत्यधिदैवतम् ॥ ५ ॥ अथाधिय-

ज्ञम् । यदेतन्मंडलंतपत्ययर्ठ सरुक्मोथयदेतदर्चिर्दी प्यतऽइदन्तत्पुष्करपर्णमापोह्येताआपःपुष्करपर्णमथ- यएषएतस्मिन्मण्डले पुरुषोयमेवसयोयछंहिरण्मयः पुरुषस्तदेतदेवैतत्रयछंसंस्कृत्येहोपधत्ते तद्यज्ञस्यैवा- नुसछंस्थामूर्द्धमुत्क्रामतितदेतमप्येतिय्यएषतपति त- स्मादग्निन्नाद्रियेतपरिहन्तुममुत्रह्येष तदाभवतीत्यु एवा- धियज्ञम॥६॥अथाध्यात्ममम् । यदेतन्मंडलंतपतियश्चै- षरुक्मइदंतच्छुक्लमक्षंनथयदेतदर्चिर्दीप्यते यच्चैतत्पुष्क रपर्णमिदंतत्कृष्णमक्षन्नयसएषएतस्मिन्मण्डलेपुरुषो- यश्चैषहिरण्मयः पुरुषोयमेवसयोयंदक्षिणेक्षन्पुरुषः ॥७॥सएषएवलोकंपृणतामेषसर्व्वोग्निरभिसम्पद्यतेतस्यै तन्मिथुनंयोयछं सव्येक्षन्पुरुषोर्द्धमुहैतदात्मनोयन्मि थुनंयदावैसहमिथुनेनाथ सर्वोथकृत्स्नःकृत्स्नतायैतद्यत्ते

द्वेभवतोद्वन्द्वᳪंहिमिथुनंप्रजननन्तस्माद्वेद्वेलोकंपृणेउ
पधीयेतेतस्माद्द्वाभ्यांद्वाभ्यांचितिंप्रणयन्ति॥८॥सए
षएवेन्द्रोयोयंदक्षिणेक्षन्पुरुषोथेयमिन्द्राणीताभ्यांदेवा
एतांविधृतिमकुर्वन्नासिकां तस्माज्जायायाअन्तेनाश्नी
याद्वीर्यवान् हास्माज्जायतेव्वीर्यवन्तमुहसाजनयतिय
स्याअन्तेनाश्नाति ॥ ९ ॥ तदेतद्देवव्रतᳪंराजन्यब
न्धवोमनुष्याणां मनुतमांगोपायन्ति तस्मादुतेषुवीर्य-
वान्जायते मृतवाकाव्वयसाᳪं साक्षिप्रश्येनंजनयति
॥ १० ॥ तौहृदययस्याकाशं प्रत्यवेत्यमिथुनीभव-
तस्तौ यदामिथुनस्यान्तंगच्छतोथहैतत्पुरुषः स्व-
पितितद्यथा हैवेदंमानुषस्यमिथुनस्यान्तंगत्वासम्वि
तइवभवत्येवᳬं हैवैतदसंविदइवभवतिदैवᳪं ह्येतन्मि-
थुनंपरमोह्येषआनन्दः ॥ ११ ॥ तस्मादेवंव्वित्
स्वप्याल्लोक्यᳬं हैतेएवतद्देवते मिथुनेनप्रियेणधाम्नास

मर्द्दयति तस्मादुहस्वपंतंधुरेवनबोधयेन्नेदेतेदेवतेमिथु-
नीभवन्त्यौ हिनसानीतितस्मादुहैतत्सुषुपुषः श्लेष्म-
णमिवमुखंभवत्येतेएवतद्देवतेरेतः सिञ्चतस्तस्माद्रेतसइ
दर्ठ॰सर्वं॰संभवतियदिदंकिञ्च ॥ १२ ॥ सएषएवमृ-
त्युर्यएषएतस्मिन्मण्डलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुष-
स्तस्यहैतस्यहृदयेपादावतिहतौतौहैतदाच्छिद्योत्क्राम-
ति सयदोत्क्रामत्यथहैतत्पुरुषोम्रियते तस्माद्वैतत्प्रे-
तमाहुराच्छेद्यस्येति ॥ १३ ॥ एषउएवप्राणः एष
हीमाः सर्वाः प्रजाः प्रणयतितस्यैतेप्राणाः स्वाः
सयदास्वपित्यथैनमेते प्राणाःस्वा अपियन्ति तत्स्वा
प्यय ःस्वाप्ययो हवैत॰ स्वप्न इत्याचक्षते परो
क्षंपरोक्षकामाहि देवाः ॥ १४ ॥ सऽएतेः सेऽएतेः
सुतोनकस्यचनव्वेदनमनसा संकल्पयति नव्वा

चान्नस्यरसंविजानातिनप्राणेनगंधं विजानाति नचक्षु-
षापश्यतिन श्रोत्रेणशृणोत्येतᳪंह्येतेतदा पीताभवन्ति-
सएषएकःसन्प्रजासुबहुधाव्यावि ष्टस्तस्मादेकासती-
लोकंपृणा सर्वमग्निमनुविभव त्यथयदेकएवतस्मादेकः
॥ १५ ॥ तदाहुरेकोमृत्यु र्बहवइत्येकश्चबहवश्चेति
ब्रूयाद्यदहासावमुत्रते नैकोथयदिहप्रजासुबहुधाव्या
विष्टस्तेनोबहवः ॥ १६ ॥ तदाहुरन्तिकेमृत्युर्दूराइत्य
न्तिकेचदूरेचे तिहब्रूयाद्यदहायमिहाध्यात्मन्तेनान्ति-
केथ यदसावमुत्र तेनोदूरे ॥ १७ ॥ तदेषश्लोकोभवति
तदेषश्लोकोभवत्यन्नेभात्यपश्रितोरसाना ᳪ संक्षरेमृत
इति यदेतन्मण्डलंतपतितदन्नमथय एषएतस्मिन्मण्ड-
लेपुरुषः सोत्तासएतस्मिन्नन्ने पश्रितोभातीत्यधिदै-
वतं ॥ १८ ॥ अथाध्यात्मं । अथाध्यात्ममिदमेवश-
रीरमन्नमथयोयंदक्षिणे क्षन्पुरुषः सोत्ता स एतस्मिन्न-

न्नेपश्रितोभाति ॥ १९ ॥ तमेतमग्निरित्यध्वर्यव उपा-
सते यजुरित्येषहीदर्ठ सर्वंयुनक्तिसामेतिच्छन्दोगाए
तस्मिन्हीदर्ठ॰ सर्व्वर्ठ॰ समानमुक्थमितिबह्वृचाए-
षहीदर्ठ॰ सर्वमुत्थापयतियातुरितियातुविदएतेनही-
दर्ठ सर्वंयतंविषमितिसर्पाःसर्प इति सर्पविदऊर्ग्गिति-
देवारयिरितिमनुष्या मायेत्यसुराःस्वधेतिपितरोदेव-
जन इति देवजनविदोरूपमितिगंधर्वागन्धइत्यप्सर-
सस्तंयथायथोपासते तदेवभवति तद्धैनान्न भूत्वावति
तस्मादेनमेवंवित्सर्वैरेवैतैरुपासीतसर्वर्ठ॰ हैतद्भवतिस-
र्वर्ठ हैनमेतद्भूत्वावति ॥ २० ॥ सएषत्रीष्टकोग्निऋगे-
कायजुरेकासामैकातद्यां काञ्चात्रर्चोपदधाति रुक्म
एवतस्या आयतनमथयां यजुषापुरुषऽएवतस्याआय
तनमथयार्ठसाम्नापुष्करपर्णमेव तस्या आयुतन्मेवंत्री-
ष्टकः ॥२१॥तेवाएतेउभेएष चरुक्मएतत्त्पुष्करपर्णमेतं

पुरुषमपीत ऋभेद्यृक्सामे यजुरपीतएवम्वेकेष्टकः ॥ २२ ॥ सएषएवमृत्युः सएषएवमृत्युर्यएषए१स्मिन्मंडलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुषः सएषएवं विदआत्माभवतिसयदैवम्विदस्माँल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवतिसोमृतोभवतिमृत्युर्ह्यस्यात्माभुवति ॥ २३ ॥ इति मंडलब्राह्मणम् ॥ इत्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्य प्रागग्रदर्भेषु उपविशेत् ॥ ततो दर्भपाणिः स्वाध्यायं च यथाशक्ति इषेत्वो र्जेत्वेत्यादि पठेत् ॥ तत्र तावन्न्यासः ॥ ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः ॥ ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः ॥ ॐ वसिष्ठकश्यपाभ्यां नमः नासिकायाम् ॥ ॐअत्रये नमः वाचि ॥ ॐगायत्र्यग्निभ्यां नमः शिरसि ॥ ॐउष्णिक्सवितृभ्यां नम ग्रीवायाम् ॥ ॐबृहतीबृहस्पतिभ्यांनमः हनौ ॥ ॐ बृहद्रथंतरद्यावापृथिवीभ्यां नमः बाह्वोः ॥

ॐत्रिष्टुबिन्द्राभ्यां नमः नाभौ ॥ ॐजगत्यादित्याभ्यां नमः श्रोण्योः ॥ ॐअतिच्छंदःप्रजापतिभ्यां नमः लिङ्गे ॥ ॐयज्ञायज्ञियवैश्वानराभ्यां नमः गुदे ॥ ॐअनुष्टुब्विश्वेभ्यो देवेभ्यो नमः ऊर्वोः ॥ ॐपंक्तिमरुद्भ्यो नमः जान्वोः ॥ ॐद्विपदाविष्णुभ्यां नमः पादयोः ॥ ॐविच्छंदोवायुभ्यां नमः नासापुटस्थप्राणेषु ॥ ॐ न्यूनाक्षराछंदोभ्यो नमः सर्वाङ्गेषु ॥ एवमेवाङ्गानि योजयित्वा वेदमयः संपद्यते । न कुतश्चिद्भयं विंदते । शापानुग्रहसामर्थ्यं ब्राह्मं तेजश्च वर्द्धते । स्वर्गलोकः परं साधनं धर्मार्थकाममोक्षस्य च तस्य दारिद्र्यदुःखशोकरोगभयं न भवति । ततः ॐभूर्भुवः स्वःॐ तत्सवितु० ॐ इषेत्वोर्ज्जेत्वांव्वायवस्त्थदेवोवः सविताप्प्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायद्ध्वमघ्न्याऽइंद्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशंसो ध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमा

नस्यपशून्पाहि ॥ २ ॥ ॐअग्निमीळेपुरोहितंयज्ञस्य देवमृत्विजंम् होतारंरत्नधातमम् ॥ ३ ॥ ॐ अग्न आयाहिवीतयेगृणानोहव्यदातयेनिहोतासत्सिबर्हिषि ४ ॥ ॐ शन्नोदेवी रभिष्टयऽआपो भवंतुपीतये । शंयोरभिस्रवंतुनः ॥ ५ ॥ इति चतुर्वेदमंत्रान्पठित्वा । सहस्रं शतं वा गायत्रीं जपेत् (अत्र योगियाज्ञवल्यः —वेदाथर्वपुराणानि सेतिहासानि शक्तितः ॥ जपयज्ञार्थसिध्यर्थं विद्यां चाध्यात्मिकीं जपेत् ॥) ततः ॐयस्य स्मृत्या० अनेन ब्रह्मयज्ञाख्येन कर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम ॥ ॐतत्सद्ब्रह्मार्पणमस्तु ॥ इति ब्रह्मयज्ञप्रयोगः ॥ एवं ब्रह्मयज्ञं विधाय तर्पणं कुर्यात् ॥

अथ तर्पणप्रयोगः । तत्रादौ आचम्य देशकालौसंकीर्त्य देवर्षिपितृतर्पणं करिष्ये इति संकल्प्य सव्येन प्राङ्मुख उदङ्मुखो वा देवान्ध्यात्वा

सव्यकरान्वारब्धसकुशदक्षिणकरेण तोयं गृहीत्वाऽ क्षतांश्च देवतीर्थेन ॐकारपूर्वं ब्रह्मादिदेवांस्तर्पयेत् । तत्र प्रयोगः ॥ ॐब्रह्मा तृप्यताम् १ ॥ ॐ विष्णुस्तृप्यताम् १॥ ॐ रुद्रस्तृ० १ ॥ ॐ प्रजापतिस्तृ० १ ॥ ॐ देवास्तृ० १ ॥ ॐ छंदांसि तृ० १ ॥ ॐ वेदास्तृ० १ ॥ ॐ ऋषयस्तृ० १ ॥ ॐ पुराणाचार्यास्तृ० १ ॥ ॐ गंधर्वास्तृ० १ ॥ ॐ इतराचार्यास्तृ० १ ॥ ॐ संवत्सरः सावयवस्तृ० १ ॥ ॐ देव्यस्तृ० १ ॥ अप्सरसस्तृ० १ ॥ ॐ देवानुगास्तृ० १ ॥ ॐ नागास्तृ० १ ॥ ॐ सागरास्तृ० १ ॥ पर्वतास्तृ० १ ॥ ॐ सरितस्तृ० १॥ ॐ मनुष्यास्तृ० १ ॥ ॐ यक्षास्तृ० ॥ १ ॐ रक्षांसि तृ० १ ॥ ॐ पिशाचास्तृ० १ ॥ ॐ सुपर्णास्तृ० १ ॥ भूतानि तृ० १ ॥ ॐ पशवस्तृ० १ ॥ ॐ वनस्पतयस्तृ० १ ॥ ॐ ओषधयस्तृ० १ ॥ ॐ भूतग्रामश्चतुर्विधस्तृ० १ ॥ एवमेव ॐ मरीचिस्तृ० १ ॥ ॐ अत्रिस्तृ० १ ॥ ॐ अंगिरास्तृ० १ ॥ ॐ पुलस्त्यस्तृ० १ ॥ पुलहस्तृ० १ ॥

ॐ क्रतुस्तृ० १ ॥ ॐ प्रचेतास्तृ० १ ॥ ॐ वसिष्ठ-स्तृ० १ ॥ ॐ भृगुस्तृ० १ ॥ ॐ नारदस्तृ० १ ॥ ततो निवीती उदङ्मुख उत्तराग्रेण कुशेन प्रजापति-तीर्थेन यवोदकेन च सनकादीन् प्रत्येकं द्विवारम् ॥ ॐ सनकस्तृप्यताम् २॥ ॐ सनंदनस्तृ० २ ॥ ॐ सना-तनस्तृ० २ ॥ ॐ कपिलस्तृ० २ ॥ ॐ आसुरिस्तृ० २ ॥ ॐ वोढुस्तृ० २ ॥ ॐ पंचशिखस्तृ० २॥ त-तोऽपसव्यं दक्षिणामुखः पितृतीर्थेन मोटकरूपकुशत्र-येण सतिलचंदनोदकेन कव्यवाडादीन् प्रत्येकं त्रिः ॥ ॐ कव्यवाडस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३॥ ॐ नलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ३ ॥ ॐ सोमस्तृप्यतामिदं तिलो० ३॥ यमस्तृ-प्यतामिदं० ३॥ ॐअर्यमातृप्यतामिदं० ३॥ ॐअग्नि-ष्वात्तास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः ३॥ ॐ सोमपास्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा नमः ३॥ॐ बर्हिषदस्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा नमः३॥ ततः ॐ यमाय नमः३॥ॐ धर्मराजाय न०

३ ॥ ॐ मृत्यवे न० ३॥ ॐ अंतकाय न० ३॥ ॐ वैवस्वताय न० ३ ॥ ॐ कालाय० ३ ॥ ॐ सर्वभूतक्षयाय० ३॥ ॐ उदुंबराय०३ ॥ ॐ दध्नाय०३॥ ॐ नीलाय०३॥ ॐ परमेष्ठिने०३॥ ॐ वृकोदराय०३॥ ॐ चित्राय० ३॥ ॐ चित्रगुप्ताय० ३॥ इति चतुर्दश यमान् प्रत्येकं सतिलांजलित्रयेण तर्पयेत्॥ ॐ आगच्छंतु मे पितर इमं गृह्णंत्वपोञ्जलिमिति पितॄनावाह्य ॥ उदीरतामवरउत्परास उन्मध्यमाः पितरः सोम्यासः असुंऽय ऽईयुरवृकाऽऋतज्ञास्ते नोवंतु पितरोहवेषु ॥ ॐ अद्यामुकगोत्रोऽस्मत्पितामुकशर्मा तृप्यतामिदं जलं सतिलं तस्मै स्वधा इति मंत्रेण वाक्येन च प्रथमांजलिं दद्यात् ॥ ॐ अंगिरसोनः पितरोनवग्वा अथर्वाणोभृगवः सोम्यासः तेषां व्वयꣳसुमतौ यज्ञियानामपि भद्रेसौमनसेस्याम इति मंत्रेण वाक्येन च द्वितीयांजलिं दद्यात् ॥ ॐ आयंतुनः पितरः सोम्यासोऽग्निष्वा-

त्ता ᳪ पथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदंतोधि-
ब्रुवंतुतेवंत्वस्मानिति मंत्रेण वाक्येन च तृतीयांजलिं
दद्यात् ॥ ॐ ऊर्ज्जं वहंतीरमृतं घृतं पयः कीलालं
परिस्रुतंस्वधास्थ तर्पयंतमेपितॄन् ॥ ॐ अद्यामुक-
गोत्रोऽस्मत्पितामहोऽमुकशर्मा तृप्यतामिदं जलं स-
तिलं तस्मै स्वधा इति मंत्रेण वाक्येन च पितामहाय
प्रथमांजलिं दद्यात् ॥ ॐ पितृभ्यः स्वधायिभ्यः
स्वधानमः पितामहेभ्यः स्वधायिभ्यᳪ स्वधानमः
प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्
पितरोमीमदंतपितरोतीतृपंतपितरः पितरः शुंधध्व
मिति द्वितीयांजलिं ० ॥ ॐ येचेहपितरो येचनेहयां
श्चं विद्मयां उचनप्रविद्म॥ त्ववेत्थयतितेजातवेदः स्व
धाभिर्यज्ञᳪसुकृतंजुषस्व इति तृतीयांजलिं दद्यात् ॥
ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नᳪ

मुंत्वोषधीः ॥ ॐ अद्यामुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा इति मंत्रेण वाक्येन च प्रपितामहाय प्रथमांजलिं दद्यात् ॥ ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनः पिता इति द्वितीयांजलिं दद्यात्॥ ॐ मधुमान्नो वनस्पतिर्मधुमांअस्तुसूर्यः॥ माध्वीर्गावोभवंतुनः इति मंत्रेण वाक्येन च तृतीयांजलिं प्रपितामहाय दद्यात् ॥ ततः ॐ तृप्यध्वं तृपध्वंतृप्यध्वमिति पित्रादिभ्योऽजलित्रयं दद्यात् ॥ ॐअद्यामुकगोत्राऽस्मन्माता अमुकदेवी तृप्यतामिदं जलं सतिलं तस्यै स्वधा इति मातरं तर्पयेत् ॥ एवमेव पितामहीं प्रपितामहीं च तर्पयेत् ॥ एवं सापत्नमातरमपि ॥ ततः ॐ नमोवः पितरोरसाय नमोवःपितरःशोषायनमोवः पितरो जीवाय नमोवः पितरःस्वधायै नमोवः पितरोघोराय नमोवः पितरोमन्यवे नमोवः पितरः पितरो नमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मैतद्वः पि-

तरो श्वासुऽआधत्त इति मंत्रं पठित्वा॥ ॐ अद्यामुक-गोत्रोऽस्मन्मातामहोऽमुकशर्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा ॥ इति मातामहायांजलित्रयं दद्यात् ॥ एवं प्रमातामहाय वृद्धप्रमातामहाय च दद्यात् ॥ ततः ॐ अद्यामुकगोत्राऽस्मन्मातामही अमुकदेवी तृप्य-तामिदं जलं सतिलं तस्यै स्वधा ॥ इति मातामहीं एवमेव प्रमातामहीं वृद्धप्रमातामहीं च तर्पयेत् ॥ ततः ॥ आचार्यं तत्पत्नीं भार्यां पुत्रं पितृव्यं तत्पत्नीं मातुलं तत्पत्नीं भ्रातरं तत्पत्नीं पितृष्वसारं मातृष्वसारं श्वशुरं श्वश्रूं पुत्रिकां भगिनीं पितृव्यपुत्रं भ्रातृपुत्रं मातुलपुत्रं श्यालकं गुरुपुत्रं जामातरं भामं पौत्रं भागिनेयं दौहित्रं मित्रं सुहृच्छिष्यांश्च तर्पयेत्॥ ततः ॥ ॐ देवासुरास्तथा यक्षा नागा गंधर्वराक्षसाः॥ पिशाचा गुह्यकाः सिद्धाः कूष्मांडास्तरवः खगाः ॥ ॥ १ ॥ जलेचरा भूनिलया वाय्वाधाराश्च जंतवः प्रीतिमेते प्रयांत्वाशु मद्दत्तेनांबुनाखिलाः ॥ २ ॥ नर-केषु समस्तेषु यातनासु च ये स्थिताः ॥ तेषामाप्या-

यनायैतद्दीयते सलिलं मया ॥ ३ ॥ ॐ ये बान्धवा-बान्धवाश्च येऽन्यजन्मनि बान्धवाः॥ ते तृप्तिमखिला यांतु यश्चास्मत्तोऽभिवाञ्छति ॥ ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकम् ॥ ५ ॥ आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः ॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः ॥ ६ ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥ ७ ॥ इति मंत्रैः पृथक् पृथक् सतिलमुदकं दद्यात् ॥ ततः ॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकमिति स्नानवस्त्रं निष्पीडयेत् ॥ ततः सव्यमाचमनं च कृत्वा तर्पणोत्तरकर्म कुर्यात् ॥ तत्र क्रमः ॥ ॐनमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ॥ जगत्सवित्रे शुचये नमस्ते कर्मदायिने ॥ १ ॥ इति मंत्रेण सूर्याय सतिलांजलिं दत्त्वा आचम्य ब्रह्मादीन् पुष्पैरर्चयेत् ॥ तत्र क्रमः ॥ ॐब्रह्मजज्ञानं प्रथमं पुर ॥

द्विसींमत÷मुरुचोंव्वेन आव॥सबुध्या उपमा अस्य विष्ठाःसतश्च योनिमसंतश्चव्विवं÷ ॐ ब्रह्मणे नमः ॥ ॐइदं विष्णुर्विचंक्रमे त्रेधा निदंधे पुदंसमूंढमस्य पाठं सुरे ॐ विष्णवे नमः ॥ ॐ नमंस्ते रुद्र मुन्यवं उतोत इर्षं वें नम÷ । बाहुभ्यामुतते नमं÷ । ॐरुद्राय नमः ॥ ॐआकृष्णेन रजंसा वर्तमानो निवेशयंन्नमृतं मर्त्यं च हिरण्ययेंन सविता रथेना देवोयांति भुवंनानि पश्यंन् ॐ सूर्याय नमः ॥ ॐ मित्रस्यंचर्षणीधृतोवों देवस्यं सानसि द्युम्नंचित्रं श्रवस्तमं ॐमित्राय नमः ॥ ॐ इमम्मेंवरुणश्रुधीहवंमद्याचंमृडय त्वामंवस्युराचंके ॐ वरुणाय नमः ॥ इति ब्रह्मादीन्संपूज्योत्थाय ॥ ॐ अहंश्रमस्यकेतवोविरश्मयोजनां २ ॥ ऽअनु भ्राज न्तोऽअग्नयोंयथा उपयामगृंहीतोसिसूर्यायत्वा भ्राजा- येषतेयोनिः सूर्यायत्वाभ्राजायंसूर्य्यभ्राजिष्टभ्राजिष्ट

स्त्वंदेवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम् ॥ १ ॥
ॐ हꣳसꣳशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथि-
र्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽ
अद्रिजाऽऋतंबृहत्॥२॥ इत्याभ्यांसूर्यमुपस्थायप्रदक्षि-
णीकृत्य ॥ आदित्याय नमः इत्यादित्यं नमस्कृत्य
॥ ॐ दिग्भ्यो नमः। ॐ दिग्देवताभ्यो नमः । ॐ
ब्रह्मणे नमः। ॐ अग्नये नमः। ॐ पृथिव्यै नमः।
ॐ ओषधिभ्यो नमः। ॐ वाचे नमः। ॐ वाचस्प-
तये नमः। ॐ विष्णवे नमः। ॐ महद्भ्यो नमः।
ॐ अद्भ्यो नमः। ॐ अपांपतये नमः। ॐवरुणाय
नमः॥ इति नमस्कृत्य उदकं च दत्वा ॥ ॐ सव
र्चसापयसासंतनूभिरगन्महिमनसासꣳशिवेनत्वष्टा-
सुसदत्रोविदधातुरायोनुमार्ष्टुतन्वोपद्विलिष्टं इति जप-
न्करद्वयेन मुखं संस्पृश्य ॐ देवागातुविदोगातुंवित्त्वा-
गातुमितमनसस्पतइमंदेवयज्ञꣳस्वाहावातेधाः ॥

इति विसर्जयेत् ॥ एवं विधिना जीवत्पितृकेणापि ब्रह्मादिचित्रगुप्तपर्यंतं तर्पणं कृत्वा स्वपित्रादितर्पणं वस्त्रनिष्पीडनं च वर्जयित्वा ब्रह्मार्चनादिस्नानादिकर्मांगभूतदेवताविसर्जनपर्यन्तं तर्पणविधिर्विधेयः ॥ इति तर्पणप्रयो :॥

अथ पंचदेवपूजाप्रयोगः ॥ तत्रादौ आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं यथाशक्ति यथामिलितोपचारैः श्रीमहाविष्णुपूजां करिष्ये (पंचायनतपक्षे तु श्रीरुद्रविनायकसूर्यशक्तिपरिवृतश्रीमहाविष्णुपूजां करिष्ये) इति संकल्प्य आसनादि विधाय घंटानादं च कृत्वा शंखोदकेनात्मसहितं पूजासंभारं प्रोक्ष्य पुरुषसूक्तेन न्यासं कुर्यात ॥ ॐ सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायण ऋषिः पुरुषोदेवताऽनुष्टुप्छंदोऽन्त्यायास्त्रिष्टुप्छंदोन्यासे पूजायां च विनियोगः ॥ ततः॥ ॐ सहस्रशीर्षेति वामकरे ॥ १ ॥ ॐ पुरुषऽएवेदꣳसर्वमिति

दक्षिणकरे२॥ॐ एतावानस्य महिमेतिवामपादे३ ॥ॐ त्रिपादूर्ध्वइतिदक्षिणपादे४॥ॐततोविराडितिवामजानुनि५॥ॐ तस्माद्यज्ञात्सर्वहुत इतिदक्षिणजानुनि ६॥ ॐतस्माद्यज्ञात्सर्वहुतऽऋच इति वामकटौ ॥७॥ ॐ तस्मादश्वा इति दक्षिणकटौ ८॥ ॐ तं यज्ञमिति नाभौ ९ ॥ ॐ यत्पुरुषं व्यदधुरिति हृदि १० ॥ ॐ ब्राह्मणोस्यमुखमिति कंठे ११ ॥ ॐ चंद्रमामनस इति वामबाहौ १२ ॥ ॐ नाभ्याऽआसीदिति दक्षिणबाहौ १३ ॥ ॐ यत्पुरुषेणेति मुखे १४ ॥ ॐसप्तास्यासन्निति अक्ष्णोः १५ ॥ ॐयज्ञेन यज्ञमिति मूर्ध्नि १६ ॥ अथ पंचाङ्गन्यासः ॥ ॐ अद्भ्यः सम्भृतारिति हृदये१ ॥ ॐ वेदाहमेतमिति शिरसि२॥ ॐ प्रजापतिश्च इति शिखायाम् ३ ॥ ॐ योदेवेभ्य आतपति इति कवचायहुम् ४ ॥ ॐरुचंब्राह्ममिति अस्त्राय फट् ५ ॥ इति स्वदेहे न्यासं कृत्वा एवमेव

देवाङ्गन्यासं कुर्यात् ॥ ततः ॥ कलशं शंखघंटे च संपूज्य देवं ध्यायन् पूजां कुर्यात् ॥ तत्र प्रयोगः ॥ ॐसहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्सभूमिंठं सर्व्वतस्पृत्वात्यतिष्ठद्दशांगुलं ॐ श्रीमहाविष्णवे नमः आवाहनं समर्पयामि (पंचायतनपक्षे श्रीविष्णुरुद्र- विनायकसूर्यशक्तिभ्यो नमः आवाहनं ॰ एवं सर्वत्र) इत्यावाहनं ॰ १ ॥ (शालिग्रामबाणलिंगादावावा- हनाभावान्मंत्रेण पुष्पं निवेदयेत्) ॐ पुरुषऽएवेदठं सर्व्वंय्यद्भूतंयच्चभाव्यम्॥ उतामृतत्वस्येशानोयदन्नेना- तिरोहति इत्यासनं ॰ २ ॥ ॐ एतावानस्यमहि- मातोज्यायाँश्चपूरुषः॥ पादोस्य व्विश्वाभूतानि त्रिपा- दस्यामृतन्दिवि इति पाद्यं॰ ३ ॥ ॐ त्रिपादूर्द्ध्वऽउ- दैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोव्विष्वङ्व्य- क्रामत्साशनानशनेऽअभि इत्यर्घ्यं ॰ ४ ॥ ॐ ततो- व्विराडजायतव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्य-

रिच्यत पश्चाद्भूमिमथोपुरः इत्याचमनं० ५ ॥ ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेव्वायव्यानारण्या ग्राम्याश्च ये इति स्नानं ० ६ ॥ (अत्र संभवे सति ॐ पयः पृथिव्यामित्यादि पृथक्पृथक् मंत्रेण पंचामृतस्नानानि कारयित्वा पुरुषसूक्तेनाभिषेकः कार्यः) ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे ॥ छंदाᳬसि जज्ञिरे तस्माद्यजुस्तस्मादजायत इति वस्त्रं० (वस्त्रांते आचमनीयं०) ॥ ७ ॥ ॐ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः इति यज्ञोपवीतं० (आचमनीयं०) ८ ॥ ॐ तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः ॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये इति गंधं० ९ ॥ ॐ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते इति

तुलसीपत्रपुष्पाणि० १० ॥ ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः॥ ऊरू तदस्य यद्वैश्यः पद्भ्याᳬ शूद्रोऽअजायत इति धूपं० ११ ॥ ॐ चंद्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत इति दीपं० १२ ॥ ॐ नाभ्याऽ आसीदंतरिक्षᳬ शीर्ष्णोद्यौः समवर्तत॥पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ अकल्पयन् इति नैवेद्यं० आचमनं च० १३ ॥ ॐयत्पुरुषेणहविषादेवायज्ञमतन्वत॥ वसन्तोस्यासीदाज्ज्यंग्रीष्मऽइध्मः शरद्धविः इति नमस्कारं० १४ ॥ ततः कर्पूरेण नीराजनं कार्यम् ॥ ॐसप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषंपशुम् इति प्रदक्षिणम् ॥ १५ ॥ ॐ यज्ञेनयज्ञमयजन्तदेवास्ता-

---

१ विष्णोश्चतस्रः ४, शिवस्य तिस्रः ३, गणपतेरपि तिस्रः ३, देव्या एका १, सूर्यस्य सप्त ७ ॥

निधर्म्माणिप्रथमान्यासन् तेहनाकंम्महिमानःसचन्त- यत्रपूर्व्वेसाध्याःसंति देवाः इति पुष्पांजलिं च दत्वा १६॥ ततः॥ ॐ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥ इतिवदन्नमेत् । ततो यथाशक्तिं गायत्रीं द्वादशाक्षरमंत्रं पंचाक्षरं वा जपित्वा महापुरुषविद्यास्तवेन स्तुत्वा कर्मेश्वरार्पणं च कृत्वा देवं प्रार्थयेत् ॥ ॐ आवाहनं न जानामि न जानामि विसर्ज्जनम् । पूजां चैव न जानामि क्षम्यतां परमेश्वर ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर ॥ ३ ॥ इति प्रार्थ्य शंखोदकं शिरसि अभ्युक्ष्य निर्माल्यं देवदत्तमंगुष्ठतर्जनीभ्यां गृहीत्वा शिरसि धारयेत् । ततो विष्णुपादोदकं विप्रपादोदकं च पिबेत् । एवं देवं संपूज्य मातृपितृमुखान् गुरून् वृद्धांश्च प्रपूजयेत्॥ इति पञ्चदेवपूजनप्रयोगः ॥

अथ विष्णुप्रीतिकरमार्तिक्यं लिख्यते ॥ वंदे

गोपालं मृगमदशोभितभालं करुणाकल्लोलं जय देव जय देव ॥ निर्गुणसगुणाकारं संहृतभूभारं, मुरहरनंदकुमारं मुनिजनसुखकारम् । वृंदावनसंचारं कौस्तुभमणिहारं, करुणापारावारं गोवर्धनधारम् । जय देव देव ॥ १ ॥ कुंचितकुन्तलनीलं शरदिन्दुवदनं, मणिगणमण्डितकुण्डलराजितश्रुतियुगलम् । विकसत्पंकजनयनं विलसद्भ्रूयुगलं, बिंबाधरमतिसुंदरनासामणिलोलम् ॥ जयदेव० ॥ २ ॥ कंबुग्रीवं कौस्तुभमणिकण्ठाभरणं, श्रीवत्सांकितवक्षोलंबितवनमालम् । भूषितबाहुयुगलं करतलधृतवेणुं त्रिवलीशोभितमध्यं करधृतनवपद्मम् ॥ जयदेव० ॥ ३ ॥ मुरलीवादनलीलासप्तस्वरगीतं जलचरस्थलचरवनचरराजितसंगीतम् । स्तंभितयमुनातोयं त्वघभित्तव चरितं, गोपीजनमनमोहनकारं श्रीकान्तम् ॥ जय देव० ॥ ४ ॥ रासक्रीडामण्डलवेष्टितद्विजललनं, मध्ये तांडवसंगितकोमलदलनयनम् । कुसुमाकारितरंजितमंदस्मितवदनं, कालियफणिवरदमनं यक्षेश्वरहननम् ॥ जय-

देव ० ॥ ५ ॥ किंकिणिमेखलमध्यं पीताम्बरवसनं, शोभितनूपुरगर्जितविलसत्पदयुगलम् । गोगोपीपरिवेष्टितयमुनातटसंस्थं व्यासाभयदं सुखदं भुवनत्रयपालम् ॥ जयदेव जयदेव ॥ ६ ॥ इति विष्णुनीराजनार्त्तिक्यं समाप्तम् ॥

अथ पंचायतनार्तिक्यम् । करुणापारावारं कलिमलपरिहारं कद्रूसुतशयितारं करधृतकह्लारम् । घनपटलाभशरीरं कमलोद्भवपितरं कलये विष्णुमुदारं कमलाभर्त्तारम् ॥ जय देव २ जयकेशव हर गजमुख सवितर्नगतनयेऽहं चरणौ तव कलये जय देव जय देव ॥ १ ॥ भूधरजारतिलीलं मङ्गलकरशीलं, भुजगेशस्मृतिलोलं भुजगावलिमालम् । भूषाऽकृतिमतिविमलं संधृतगाङ्गजलं, भूयो नौमि कृपालं, भूतेश्वरमतुलम् ॥ जय देव ० ॥ २ ॥ विघ्नारण्यहुताशं विहितानयनाशं, विपदवनीधरकुलिशं विधृताङ्कुशपाशम् ॥ विजयार्कज्वलिताशं विदलितभवपाशं, विनतास्मो वयमनिशं विद्याविभवेशम् ॥ जय

देव०॥३॥कश्यपसूनुमुदारं कालिंदीपितरं, कालत्रितयविहारं कामुकमंदारम् । कारुण्याब्धिमपारं कालानलमदरं, कारणतत्त्वविचारं कामय ऊष्मकरम् ॥ जय देव० ॥ ४ ॥ निगमैर्नुतपदकमले निहतासुरजाले, हस्ते धृतकरवाले निर्जरजनपाले । नितरां कृष्णकृपाले निरवधिगुणलीले, निर्जरनुतपदकमले नित्योत्सवशीले ॥ जय देव जय देव जय केशव हर गजमुख सवितर्नगतनयेऽहं चरणौ तव कलये जय देव जय देव ॥ ५ ॥ इति पंचायतनार्तिक्यम् ॥

अथ महापुरुषस्तुतिः ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । सुब्रह्मण्य नमस्तेऽस्तु महापुरुष पूर्वज ॥ १ ॥ नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे । ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ॥ २ ॥ देवानां दानवानां च सामान्यमसि दैवतम् । सर्वदा चरणद्वंद्वं व्रजामि शरणं तव ॥ ३ ॥ एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा । अध्यक्षश्चा-

नुमंता च गुणमायासमावृतः ॥ ४ ॥ संसारसागरं घोरमनंतं क्लेशभाजनम् । त्वामेव शरणं प्राप्य निस्तरंति मनीषिणः ॥ ५ ॥ न ते रूपं न चाकारो नायुधानि न चास्पदम् । तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥ ६ ॥ नैव किंचित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् । नैव किंचिदसाध्यं ते न च साध्योऽसि कस्यचित् ॥ ७ ॥ कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् । योगिनां परमां सिद्धिं परमं ते परं विदुः ॥ ८ ॥ अहं भीतोऽस्मि देवेश संसारेऽस्मिन्महाभये । त्राहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥ ९ ॥ कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत । शरीरेऽपि गतौ चापि वर्तते मे महद्भयम् ॥ १० ॥ त्वत्पादकमलादन्यत्र मे जन्मांतरेष्वपि । निमित्तं कुशलस्याास्ति येन गच्छामि सद्गतिम् ॥ ११ ॥ विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमार्जितम् । जन्मांतरेऽपि मे देव मा भूदस्य परिक्षयः ॥ १२ ॥ दुर्गतावपि जातायां त्वं ग-

तिस्त्वं मतिर्मम । यदि नाथं च विज्ञेयं तावतास्मि कृती सदा ॥ १३ ॥ अकामकलुषं चित्तं मम ते पादयोः स्थितिम् । कामये वैष्णवत्वं तु सर्वजन्मसु केवलम् ॥ १४ ॥ इति महापुरुषविद्यास्तुतिः समाप्ता ॥

अथ निरग्निकानां वाजसनेयिनां नित्यहोमप्रयोगः (ब्राह्मणसर्वस्वे) तत्रादौ अग्न्यायतनात्पश्चिमतः प्राङ्मुख उपविश्य आचम्य प्राणानायम्य । देशकालौ संकीर्त्य । ॐ तत्सत् अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये नित्यकर्मानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थंनित्यहोमं करिष्ये । इति संकल्प्य । कुंडे स्थण्डिले वा दर्भैः परिसमुह्य १, गोमयोदकेनोपलिप्य २, स्रुवेण त्रिरुल्लिख्य ३, अनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य ४, उदकेनाभ्युक्ष्य ५, एवं पंचभूसंस्कारान् कृत्वा आत्मदक्षिणे अग्निमुपस्थाप्य ज्वलत्कुशेन ॐ क्रव्यादमग्निमिति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छंदोऽग्निर्देवताऽग्निसं-

स्कारे विनियोगः । ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतुरिप्रवाहः । इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ १ ॥ इति मंत्रेण क्रव्यादांशं परित्यज्य । अयन्ते योनीति प्रजापतिर्ऋषिरनुष्टुप्छंदोऽग्निर्देवताऋषयोऽपि अग्न्युपस्थापने विनियोगः । ॐ अयन्तेयोनिर्ऋत्वियोयतोजातोअरोचथाः।तंजानन्नग्न आरोहाथानोवर्धयारयिम् ॥ १ ॥ इति मंत्रेणाग्निं कुण्डे संस्थाप्य । परिस्तरणं कुर्यात् । तद्यथा । पूर्वे उदगग्रं कुशत्रयं ॐ अग्निमीळेपुरोहितं यज्ञस्यदेवमृत्विजम् । होतारंरत्नधातमम् ॥ १ ॥ इति मंत्रेण दद्यात् । ततो दक्षिणे प्रागग्रं कुशपत्रत्रयं ॐ इषेत्त्वोर्जेत्वावायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमायकर्मणऽआप्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मा मावस्तेन ईशतमाघशंठ सोध्रुवाऽअस्मिन्

गोपतौ स्यात बह्वीर्य्यजमानस्यपशून् पाहि ॥ २ ॥
इति मंत्रेण ० ॥ ततः पश्चिमे उदगग्रं कुश-
पत्रत्रयम् ॐ अग्नआयाहि वीतयेगृणानोहव्यदातये ।
निहोतासत्सिबर्हिषि ॥ ३ ॥ इति मंत्रेण दद्यात् ॥
उत्तरे प्रागग्रं कुशपत्रत्रयम् ॐशन्नो देवीरभिष्टयऽ
आपोभवन्तुपीतये । शंयोरभिस्रवन्तु नः ॥ ४ ॥
इति मंत्रेण दद्यात् ॥ एवं परिस्तरणं कृत्वा वेणु-
धमन्याऽग्निं प्रज्वाल्य ध्यायेत् ॥ (अग्निध्यानम्)
ॐ चत्वारिशृङ्गात्रयोऽअस्य पादाद्वे शीर्षेसप्तहस्तासोऽ
अस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२॥
ऽआविवेश ॥१॥ ॐ मुखं यः सर्वदेवानांहव्यभुक्कव्य-
भुक्तथा । पितॄणां च नमस्तुभ्यं विष्णवे पावका-
त्मने ॥ २ ॥ इति ध्यात्वा अग्ने शाण्डिल्यगोत्र मेष-
ध्वज प्राङ्मुख मम संमुखो भव इति प्रार्थ्य ॥ ॐपा-
वकाग्नये नम इति गंधादिभिः संपूज्य पर्युक्ष्य घृताक्तं

हविष्यान्नं हस्तेन जुहुयात् ॥ (होमः) ॐ भूः स्वाहा इदमग्नये न मम ॥ १ ॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥ २ ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ॥ ३ ॥ इति व्याहृत्याहुतित्रयं हुत्वा ॥ ततः ॐ अग्नये स्वाहा इदमग्नये न मम ॥ १ ॥ ॐ धन्वंतरये स्वाहा इदं धन्वतरये न मम ॥ २ ॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यो न मम ॥ ३ ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ४ ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥ ५ ॥ इति गौतमोक्ताग्न्यादिपञ्चाहुतीश्च हुत्वा शाकलमंत्रैः षडाहुतयः ॥ तत्र मंत्राः ॥ ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा इदमग्नये न मम ॥ १ ॥ ॐ मनुष्यकृतस्यैनसोऽवयजनमसिस्वाहा इदमग्नये न मम ॥ २ ॥ ॐ पितृकृतस्यैनसोऽवयजनमसिस्वाहा इदमग्नये न मम ॥ ३ ॥ ॐ आत्मकृतस्यैनसोऽवयजनमसिस्वाहा इदमग्नये न मम ॥ ४ ॥ ॐ एनसऽए-

नसोऽवुयजनमसि स्वाहा इदमग्नये न मम ॥ ५ ॥
ॐ यच्चाहमेनोविद्वाँश्चकारयच्चाविद्वाँस्तस्य सर्वस्यै-
नसोऽवुयजनमसि स्वाहा इदमग्नये न मम ॥ ६ ॥
इति होमं समाप्य अग्निं संपूज्य ॐ सप्ततेऽअग्नेसमिधः
सप्तजिह्वाः सप्तऋषयः सप्तधामप्रियाणि । सप्तहोत्राः
सप्तधात्वायजन्ति सप्तयोनीरापृणस्वघृतेनस्वाहा इति
प्रार्थयेत् ॥ अनेन होमेन श्रीपरमेश्वरः प्रीयतां न
मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति नित्यहोम-
प्रयोगः ॥ ॥ ॥ ॥

अथ वैश्वदेवबलिकर्म॥पारस्करगृह्यसूत्रे हरिहरभा-
ष्ये च ॥ तत्रादौ वैश्वदेवार्थं पाकं विधाय समुद्धृत्या-
भिघार्य्य पश्चादग्नेः प्राङ्मुख उपविश्य दक्षिणजान्वा-
च्य देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्माहं मम
गृहे पंचसूनाजनितसकलदोषपरिहारपूर्वकं नित्यकर्मा-
नुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं श्रीवैश्वदेवाख्यं-
पंचमहायज्ञं करिष्य इति संकल्प्य । मणिकोदकेना-

ग्निं पर्युक्ष्य हस्तेन द्वादशपर्वपूरकमोदनमादाय ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये० ॥ ॐ गृह्याभ्यः स्वाहा-इदं गृह्याभ्यः० ॥ ॐ कश्यपाय स्वाहा इदं कश्यपाय० ॥ ॐ अनुमतये स्वाहा इदमनुमतये० ॥ इति देवयज्ञः इति पंचाहुतीर्हुत्वा । ॐ विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवभ्यो न मम ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते इत्याहुतिद्वयं दद्यात॥ततो मणिकसमीपे प्राक्संस्थमुदक्संस्थं वा हुतशेषान्नेन बलित्रयं दद्यात् ॥ तद्यथा ॥ पर्जन्याय नमः इदं पर्जन्याय ॥ ॐ अद्भ्यो नमः इदमद्भ्यः ॥ ॐ पृथिव्यै नमः इदं पृथिव्यै ॥ इति दद्यात् ॥ ततो द्वारशाखयोर्दक्षिणोत्तरयोर्यथाक्रमम् ॐ धात्रे नमः इदं धात्रे ॥ ॐ विधात्रे नमः इदं विधात्रे॥ इति द्वौ बली दत्त्वा प्रतिदिशम् ॐ वायवे नमः इत्यनेनैव चतसृषु दिक्षु चतुरो बलीन् दद्यात् ॥ इदं वायवे इति त्यागः ॥ ४ ॥ ततो दिशां च ॥ ॐ प्राच्यै दिशे नमः इदं प्राच्यै दिशे

ॐ दक्षिणायै दिशे नमःइदं दक्षिणायै दिशे । ॐ प्रतीच्यै दिशे नमः इदं प्रतीच्यै दिशे । ॐ उदीच्यै दिशे नमः इदमुदीच्यै दिशे । इत्यादिदिग्भ्यश्च बलीन्दद्यात् ॥ दत्तानां बलीनामंतराले ॐ ब्रह्मणे नमः इदं ब्रह्मणे ॥ ॐ अंतरिक्षाय नमः इदमंतरिक्षाय । ॐ सूर्याय नमः इदं सूर्याय ॥ इति प्राक्संस्थं बलित्रयं दद्यात् ॥ ततो ब्रह्मादीनां बलित्रयाणामुत्तरप्रदेशे ॐ विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यः । ॐ विश्वेभ्यो भूतेभ्यो नमः इदं विश्वेभ्यो भूतेभ्यः । इति द्वौ बली दद्यात् ॥ तयोरुत्तरे ॐ उषसे नमः इदमुषसे । ॐ भूतानां पतये नमः इदं भूतानां पतये । इति द्वौ बली दद्यात् ॥ इति भूतयज्ञः ॥ ततो ब्रह्मादीनां बलीनां दक्षिणप्रदेशे अपसव्येन दक्षिणामुखः ॐ पितृभ्यः स्वधा नमः इति मंत्रेणैकं बलिं पात्राऽवशिष्टान्नेन दद्यात् ॥ इति पितृयज्ञः ॥ तत्पात्रं प्रक्षाल्य सव्येन निर्णेजनजलं ब्रह्मादिबलीनां वायव्ये निनयेत् ॥ ॐ यक्ष्मै-

तत्ते निर्णेजनं नम इत्यनेन मंत्रेण इदं यक्ष्मणे० ॥ ततः काकादिबलीन् बहिर्दद्यात् ॥ तद्यथा ॐ ऐंद्रवारुणवायव्याः सौम्या वै नैर्ऋतास्तथा । वायसाः प्रतिगृह्णंतु भूमावन्नं मयार्पितम् ॥ इदं वायसेभ्यः ॥१॥ ॐ श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ।ताभ्यामन्नं प्रदास्यामि स्यातामेतावहिंसकौ ॥ इदं श्वभ्यां नमः ॥२॥ ॐ देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्यसंघाः ॥ प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छंति मया प्रदत्तम् ॥ इदं देवादिभ्यो नमः ॥ ३ ॥ ॐ पिपीलिकाकीटपतंगकाद्या बुभुक्षिताः कर्मनिबंधबद्धाः । तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवंतु ॥ इदं पिपीलिकादिभ्यो नमः ॥ ४ ॥ ततो हस्तौ पादौ प्रक्षाल्य आचम्य अतिथिप्राप्तौ पादप्रक्षालनपूर्वकं गंधमाल्यादिभिरभ्यर्च्य अन्नं परिवेष्य (ॐ हंत तेन्नमिदं मनुष्याय) इति संकल्प्य तमाशयेत् ॥ तदभावे षोडशग्रासपरिमितं चतुर्ग्रासपरिमितं वा अन्नं पात्रे कृत्वा निवीती

भूत्वोदङ्मुख उपविष्टो हंत तेन्नमिदं मनुष्यायेति संकल्प्यं कस्मैचिद्ब्राह्मणाय दद्यात् मनुष्ययज्ञसिद्धये ॥ अकृते वैश्वदेवे तु भिक्षौ तु गृहमागते । उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्जयेत् ॥ एवं तत्सद्ब्रह्मार्पणमस्तु ॥ अनेन वैश्वदेवाख्येन कर्मणा श्रीपरमेश्वरः प्रीयताम् ॥ ततो बलिदानानंतरम् ॐ ऋचं वाचमित्यध्यायेन शान्तिं कुर्यात् ॥ इति वैश्वदेवबलिकर्मप्रयोगः ॥

(मण्डलम्)भूमौ चतुरस्रं वितस्तिमात्रं जलेन मण्डलं कृत्वा तदुपरि बलीन्दद्यात्।

पूर्व

ॐ विधात्रे नमः इदं वि० २ (निवीती.)　　ॐ प्राच्यै दिशे इदं. ७ (भूतयज्ञः)　ॐ वायवे नमः इदं. वाय० ३　　ॐ धात्रे नमः इदं धात्रे १

ॐ हंत तेन्नमिदं मनुष्याय २०

ॐ सनकादिमनुष्येभ्यो नमः इदं० २१

ॐ उदीच्यै दिशे इदं०१०　ॐ भूतानांपत येनमइदं० १७　ॐ वायवे नमः इदं वा० ६　ॐ उषसेन०इ० नमः इदं० १५　ॐ विश्वेभ्यो देवेभ्यो नमः इदं० १४

(सव्यं) १६

ॐ मृर्याय०इदं० १३　ॐ विश्वेभ्योभूतेभ्यो

ॐ अवाच्यै दिशे इदं अ० ८

ॐ वायवे० इदं० ४

ॐ अंतरिक्षाय०इदं०१२

ॐ ब्रह्मणे०इदं० पितृयज्ञः ११ (अपसव्यं)

ॐ पितृभ्यः स्वधा नमः इदं०१८

ॐ यक्ष्मैतत्ते निर्णेजनं नमः इदं यक्ष्मणे १९

ॐ वायवे नमः इदं० वा० ५

ॐ प्रतीच्यै दिशे० इदं० ९

(बहिः काकादिभ्यो बलिदानम्.)　　पश्चिम.

उत्तर

दक्षिण

मणिक

ॐ पृथिव्यै नमः इदं ३

ॐ अद्भ्यो नमः इदं २

ॐ पर्जन्याय नमः इदं १

ततो नित्यश्राद्धं कुर्यात् ॥ तत्र प्रयोगः ॥ आच-म्य प्राङ्मुख उपविश्य पुंडरीकाक्षं श्रीवासुदेवं च संस्मृत्य पुंडरीकाक्षः पुनात्विति कुशत्रयजलेन श्राद्धी-यद्रव्याण्यात्मानं च सिंचेत् ॥ ततः कुशतिलजलमा-दाय ॐ अमुकगोत्राणामस्मत्पितृपितामहप्रपिताम-हानाम् अमुकामुकशर्मणां सपत्नीकानां तथा अमु-कगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहाना ममुकामुकशर्मणां सपत्नीकानां नित्यश्राद्धमहं करि-ष्य इति प्रतिज्ञाय गायत्रीं देवताभ्यश्च इति त्रिर्जपित्वा प्राचीनावीती दक्षिणामुखः सव्यं जान्वन्वाच्य द्विगु-णभुग्नकुशत्रयादीन्यादाय ॐ अद्यामुकगोत्रास्मत्पि-तृपितामहप्रपितामहा अमुकामुकशर्माणः नित्यश्राद्धे इदमासनंत्रिधाविभज्ययुष्मभ्यंस्वधा इतितिलजलप्रो क्षितं द्विगुणभुग्नकुशरूपमासनं दक्षिणाग्रं पित्रादिभ्यो दद्यात् ॥ एवमेव मातामहादिभ्योऽप्यासनमुत्सृजेत् ॥ ॐ अपहताऽअसुरारक्षाᳫंसिवेदिषदः ॥ इति श्राद्ध-देशे तिलान् विकीर्य । ततः गंधादि धृत्वा ॐ

अद्यामुकगोत्रास्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माणः सपत्नीका नित्यश्राद्धे एतानि गंधपुष्पधूपदीपतांबूलानि युष्मभ्यं स्वधा इति यथासंभवं पित्रादिभ्यो गंधादि दद्यात् ॥ एवमेव मातामहादिभ्योऽप्युत्सृजेत् ॥ ततो जलेन मंडलं चतुष्कोणमन्नपात्रस्य चतुर्दिशं कृत्वाऽन्नपरिवेषणं कुर्यात् ॥ ततो मधु दत्त्वा ॐ मधुव्वाता इति पठित्वा ॥ ॐमधु मधु मध्वित्यभिमंत्रयेत् ॥ ततोऽन्नपात्रं व्यस्ताभ्यामधोमुखाभ्यां पाणिभ्यां स्पृशन् ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृते अमृतं जुहोमि स्वधा ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्यपाᳬसुरे इति जपित्वा वामहस्तेनान्नपात्रमत्यजन् ॐ विष्णो कव्यमिदं रक्ष मदीयमिति पठित्वा ॐ इदमन्नम् ॐ इमा आपः ॐ इदमाज्यम् ॐ इदं हविरित्यन्नजलघृतेषु पुनरन्ने च दक्षिणांगुष्ठं निवेश्य ॐ अपहता असुरा रक्षाᳬसि वेदिषदः ॥ इत्यन्नपात्रपरितः तिलान्प्रक्षिप्य द्विगुणभुग्नकुशत्रया-

दीन्यादाय ॐ अद्यामुकगोत्राः अस्मत्पितृपितामह-प्रपितामहा अमुकामुकशर्माणःसपत्नीका नित्यश्राद्धे इदमन्नं सोपस्करं युष्मभ्यं स्वधा इति पित्रादिभ्यो-ऽन्नमुत्सृजेत् ॥ एवं मातामहादिभ्योऽप्यन्नमुत्सृजेत् ॥ ततः—अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु पित्रादीनां प्रसादतः ॥ इति जपेत् ॥ ततो गायत्रीं मधुव्वाता इत्यादि त्र्यृचम ॐ मधुमधुमध्विति जपेत् ॥ ततः कृणुष्वपाज इत्या-दिरक्षोघ्नान्मंत्रान्पठित्वा तिलान्भूमौ क्षिप्त्वा ॐ उदी-रतामित्यादिपितृमंत्रान् ॐ सहस्रशीर्षेत्यादिपुरुषसू-क्तम् ॐ आशुःशिशान इत्यादिकमप्रतिरथम् अन्या-नि पवित्राणि च यथाशक्ति जपेत् ॥ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ॥ ततः ॐ अद्या-मुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुक-शर्मणां सपत्नीकानां तथा अमुकगोत्राणां मातामह-प्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सप-

त्नीकानां कृतैतन्नित्यश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे ॥ इति दक्षिणां दद्यात् असंभवे फलमूलादिकं दद्यात् ॥ ततः सव्यं कृत्वा ॐ देवताभ्य इति त्रिः पठेत् ॥ ॐ प्रमादादिति पठित्वा विष्णुं स्मरेत् ॥ नित्यश्राद्धीयमन्नं ब्राह्मणाय प्रतिपादयेत् जले वा क्षिपेत् ॥ इति नित्यश्राद्धप्रयोगः ॥

ततो गोग्रासं दद्यात् ॥ तत्र मंत्रः ॥ ॐ सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः ॥ प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः ॥ इति मंत्रेण गोग्रासं तृणजलयुतं दद्यात् ॥ ततो यथार्हं भिक्षुकादिभ्योऽन्नं संविभज्य बालज्येष्ठाश्च गृह्या यथायोग्यमश्नीयुः। ततो जायापती अश्नीताम् पूर्वौ वा गृहपतिः पत्नीतः ॥ आतिथ्यादीनाशयित्वाऽश्नीयादिति ॥

अथ भोजनविधिः ॥ सुप्रक्षालितपाणिपादो धृतोत्तरीयवस्त्रो भोजनशालायामागत्य आचम्य शुचौ संवृते देशे प्राङ्मुखः प्रत्यङ्मुखो वा उपविश्य भूमिं

प्रोक्ष्य चतुरस्रं मंडलं कृत्वा तदुपरि प्रक्षालितं सुवर्णा-
दिविहितपात्रं निधाय पंचयज्ञावशिष्टं घृतादियुतमन्न-
मुपसंगृह्य परिवेषणं कृत्वा ॐ भूर्भुवः स्वः तत्सवितु-
रिति गायत्रीमंत्रेणान्नमभ्युक्ष्य ॐ पितुन्तुस्तोषम्महो-
धर्म्माणन्तविषीम् । यस्य त्रितोव्व्योजसावृत्रंव्विपर्व-
मर्द्दयत् ॥ १ ॥ इत्यन्नं स्तुत्वा ॐ मानस्तोकेतनयेमा-
नऽआयुषि मानोगोषु मानोअश्वेषुरीरिषः।मानोव्वीरा-
न्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥१॥
ॐ नमोवः किरिकेभ्यो देवानाᳩहृदयेभ्योनमोव्वि-
चिन्वत्केभ्योनमोव्विक्षीणत्केभ्योनमऽआनिर्हतेभ्यः॥
२ ॥ ॐ नमः शंभवाय च मयोभवाय च नमः
शंकराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥ ३ ॥ इत्यभिमंत्र्य ॥ सत्यन्त्वर्तेन
परिषिञ्चामि इति मंत्रेण प्रातः अन्नप्रोक्षणम ॥ तद्व-
त् । ऋतंत्वासत्येन परिषिञ्चामि इति मंत्रेण सायम-
न्नप्रोक्षणम् ॥ ॐ तेजोसिशुक्रमस्यमृतमसिधामना-
मासिप्रियं देवानामनाधृष्टन्देवयजनमसि इत्यभिमृश्य

ॐ अग्निरस्मि जन्मनाजातवेदाघृतम्मेचक्षुरमृतं मऽ आसन् ॥ अर्कस्त्रिधातूरजसोव्विमानोजस्रोघर्मोहविरस्मि नाम ॥१॥ इत्यात्मानमग्निं ध्यात्वा॥ पात्राद्दक्षिणे भूमौ ॐ भूपतये स्वाहा नमः ॥ ॐ भुवनपतये स्वाहा नमः ॥ ॐ भूतानां पतये स्वाहा नमः ॥ इति बलित्रयं दत्त्वा ॥ ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः । त्वं ब्रह्मा त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमं पदम् ॥ १ ॥ ॐ अमृतोपस्तरणमसि स्वाहा इत्याचम्य अन्नममृतं ध्यायन्मौनी हस्तचापल्यादिरहितो मुखे सर्वांगुलीभिः पंचप्राणाहुतीर्जुहोति । ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा इति । ततो मौनेन यथासुखं भुञ्जीत । एवं यथारुचि भुक्त्वा भुक्तशेषमन्नमादाय ॥ मद्भुक्तोच्छिष्टशेषं ये भुंजते पितरोधमाः । तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु ॥ १ ॥ इति पितृतीर्थेन दक्षिणतो दत्त्वा । अमृतापिधानमसि स्वाहा ॥ इति हस्ते गृ-

हीतानामपामर्द्धं पीत्वाऽर्द्धं भूमौ निःक्षिप्य तस्माद्देशा-
दपसृत्य गण्डूषशलाकादिना तर्जनीवर्जमास्यं संशो-
धयेत् ॥ इति भोजनविधिः ॥

अथ भोजनोत्तरकर्म ॥ ततो भोजनान्ते शुद्धज-
लैः पाणिमुखं संशोध्य षोडश गंडूषान् कृत्वा दंतान्
संशोध्य हस्तौ पादौ प्रक्षाल्य भोजनपात्रप्रक्षालनं त-
द्देशमार्जनं कारयित्वा ॥ शर्यातिं च सुकन्यां च च्य-
वनं शक्रमश्विनौ । भोजनान्ते स्मरेन्नित्यं तस्य चक्षु-
र्न नश्यति ॥ १ ॥ इत्यक्ष्णोर्निषिंचेत् ॥ ततः शतप-
दानि गत्वा स्वासने उपविश्य ॥ ॐ अगस्तिरग्नि-
र्वडवानलश्च भुक्तं मयान्नं जरयत्वशेषम् ॥ सुखं ममै-
तत्परिणामसंभवं यच्छत्वरोगं मम चास्तु देहे ॥ १ ॥
आतापी भक्षितो येन वातापी च निपातितः ।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥
॥ २ ॥ इत्युदरं परिमृज्य तांबूलं निर्माल्यतुल-
सीपत्रं च भक्षयेत् ॥ अनंतरकृत्यमाह (अत्रिः)
इतिहासपुराणानि धर्मशास्त्राणि चाभ्यसेत् ॥ वृथा

विवादवाक्यानि परीवादांश्च वर्जयेत् ॥ १ ॥ दिवा स्वापं न कुर्वीत स्त्रियं चैव विवर्जयेत् ॥ आयुर्हन्ति दिवा निद्रा दिवा स्त्री पुण्यनाशिनी ॥ २ ॥ ततः सायंसन्ध्यामुपास्य सूर्याग्नी नमस्कृत्य दीपकस्थापनं कुर्यात् ॥ दीपकालमाह ॥ रवेरस्तं समारभ्य यावत्सूर्योदयो भवेत् ॥ यस्य तिष्ठेद्गृहे दीपस्तस्य नास्ति दरिद्रता ॥ १ ॥ आयुर्दः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखः ॥ प्रत्यङ्मुखो दुःखदोऽसौ हानिदो दक्षिणामुखः ॥ २ ॥ इति भोजनोत्तरकर्म ॥

अथ शयनविधिराचारादर्शे विष्णुपुराणे-कृतपादादिशौचस्तु भक्त्या सायं ततो गृही ॥ गच्छेदस्फुटितां शय्यामपि दारुमयीं दृढाम् ॥ १ ॥ न विशालां न वा भग्नां न क्षामां मलिनां न च ॥ न च जंतुमयीं शय्यां त्वधितिष्ठेदनास्तृताम् ॥ २ ॥ प्राच्यां दिशि शिरः शस्तं याम्यायामथ वा नृप । सदैव स्वपतः पुंसो विपरीतं तु रोगदम् ॥ ३ ॥ मात्स्ये-मांगल्यं पूर्णकुंभं च शिरःस्थाने निधापयेत् । रात्रिसूक्तं जप-

त्रात्रौ रात्रिक्षामो भवेन्नरः ॥ ४ ॥ स्कांदे-उपानहौ वेणुदंडमंबुपात्रं तथैव च ॥तांबूलादीनि सर्वाणि समीपे स्थापयेद्गृही ॥ ५ ॥ तत्र प्रयोगः ॥ तावच्छर्वरीप्रथम भागं ग्रंथाद्यवलोकनेन नीत्वा स्वापकाले विष्णुं नमस्कृत्य ॐ नमो नंदीश्वराय इति पठित्वा सुख- शायिनां स्मरणं कुर्यात् ॥ ॐ अगस्तिर्माधवश्चैव मुचुकुंदो महाबलः । कपिलो मुनिरास्तीकः पंचैते सुखशायिनः ॥ १ ॥ अथ गारुडमंत्राः ॥ ॐ नर्मदायै नमः प्रातर्नर्मदायै नमो निशि । नमोस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥ १ ॥ सर्पापसर्प भद्रं ते दूरं गच्छ महाविष । जनमेजयस्य यज्ञांते आस्तीकवचनं स्मर ॥ २ ॥ आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्तते । शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥ ३ ॥ यो जरत्कारुणाजातो जरत्कन्या महायशाः । तस्य सर्पोपि भद्रं ते दूरं गच्छ महाविष ॥४॥ एतान् गारुडमंत्रांस्तु निशायां पठते यदि । मुच्यते सर्वबाधाभ्यो नात्र कार्या विचा-

रणा ॥ ९ ॥ एवं पठित्वा समाधिस्थमव्ययं विष्णुं नमस्कृत्य रात्रौ स्वप्यात् ॥ इति शयनविधिः ॥

अथ दारोपगमः ॥ ऋतुदर्शनमारभ्य षोडशदिवसेष्वाद्यदिनचतुष्टयमेकादशं त्रयोदशं विहायावशिष्टेषु दिवसेषु पुत्रार्थी युग्मदिवसे कन्यार्थ्ययुग्मदिने चतुर्थीषष्ठ्यष्टमीचतुर्दशीपंचदशीश्राद्धपूर्वदिनव्रतोपवासश्राद्धनिमन्त्रिततद्भुक्तशनिरविभौमवारभरणीकृत्तिकार्द्रामघापूर्वात्रयविशाखाज्येष्ठामूलजन्मनक्षत्रसङ्क्रान्तिव्यतीपातवैधृतिरिक्ते शय्यान्तरे उपवीती मन्मथगृहं स्पृष्ट्वा ईश्वरं स्मृत्वोपेत्योत्थाय स्नायात् ॥ इति दारोपगमप्रयोगः ॥

एवं यथायोगं शुद्धः सन्स्वशय्यायां यथासुखं प्रबोधपर्यंतं सुप्त्वा पुनः प्रभाते उत्थाय प्रातःस्मरणादीनि कर्माणि प्रतिदिनं कुर्यात् ॥ एषामकरणे दोषो मार्कण्डेयपुराणे-यस्य चानुदिनं हानिर्गृहे नित्यस्य कर्मणः ॥ यश्च ब्राह्मणसंत्यक्तः किल्बिषी स नराधमः ॥ १ ॥ नित्यस्य कर्मणो हानिं न कुर्वीत कदा-

चन । तस्य त्वकरणे बंधः केवलं मृतजन्मसु ॥ २ ॥ स्मृत्यर्थसारे—नास्तिक्यात्कर्महानौ तु मासेन पतितः स्मृतः । द्वादशाब्दव्रतेनैव तस्य शुद्धिस्तु नान्यथा ॥ १ ॥ कूर्मपुराणे—इत्येतदखिलं प्रोक्तमहन्यहनि वै मया । ब्राह्मणानां कर्मजातमपवर्गफलप्रदम् ॥ २ ॥ नास्तिक्यादथ वाऽऽलस्याद्ब्राह्मणो न करोति यः । स याति नरकान्घोरान्कालयोनौ प्रजायते ॥ ३ ॥ नान्यो विमुक्तये पंथा मुक्त्वा श्रमविधिं स्वकम् । तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिनः ॥ ४ ॥

इति श्रीरत्नगढनगरनिवासिना श्रीवसिष्ठकुलोद्भवेन श्रीरामकृष्णपौत्रेण कस्तूरीचंद्रसूनुना नानानि-बन्धकर्त्रा श्रीमहादेवभक्तगौडपण्डितश्रीचतु-र्थीलाल (चौथमल) शर्मणा कृताया वाजसनेयिनां नित्यकर्मप्रयोगमाला-या नित्यकर्मात्मकः प्रथमो वि-भागः समाप्तः ॥ १ ॥

अथ नैमित्तिककर्मात्मको द्वितीयो विभागः ।

तत्र तावत्पार्थिवशिवपूजाप्रयोगः ॥ तत्रादौ आचम्य प्राणानायम्य देशकालौ संकीर्त्य । अमुकगोत्रोऽमुकशर्मा अमुककामोऽहं पार्थिवलिंगपूजां करिष्य इति संकल्प्य विभूतिरुद्राक्षधारणं कृत्वा यथाशक्ति पंचाक्षरं जपित्वा न्यासं कुर्यात् ॥ तत्र वेदोक्तमंत्रविधिना न्यासं चैव समाचरेत् ॥ संध्यादेवार्चनादौ च प्रतिष्ठादिककर्मसु ॥ १ ॥ न्यासमूलमिदं सर्वं न्यासं पूर्वं तु कारयेत् ॥ न्यासेन रहितं कर्म अर्द्धं गृह्णंति राक्षसाः ॥ २ ॥ ॐ नमो भगवते रुद्राय ॥ ॐ कारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः ॥ मोकारं तु ललाटे वै भकारं मुखमध्यतः ॥ ३ ॥ गकारं कंठदेशे च वकारं हृदये न्यसेत् ॥ तेकारं दक्षिणे हस्ते वामे रुकारमेव च ॥ ४ ॥ द्राकारं नाभिदेशे च यकारं पादयोर्द्वयोः ॥ एवं न्यासविधानेन निष्पापात्मा भवेन्नरः ॥ ५ ॥ एवं न्यासं कृत्वा सूर्यायार्घ्यं दत्त्वा ॥ ॐ सर्वाधारे धरे देवि त्वद्रूपां मृत्तिकामिमाम् ॥ ग्रही-

ष्यामि प्रसन्ना त्वं लिंगार्थं भव सुप्रभे ॥ १ ॥ इति भूमिं प्रार्थ्य ॥ ॐ ह्रां पृथिव्यै नम इति षड्वर्णेनाभिमंत्र्य ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च ॥१॥ ॐ हराय नम इति शुचिस्थानान्मृदमाहृत्य शोधितायां तस्यां वँ इत्यमृतबीजाभिमंत्रितजलप्रक्षेपेण संपीड्य तेन पिंडेन ॐ महेश्वराय नमः ॥ इति लिंगं कृत्वा स्वपुरतः-ॐ शूलपाणये नमः इति पीठादौ प्रतिष्ठाप्य प्राणानायम्य ॥ ततः ॐ अस्य श्रीशिवपंचाक्षरमंत्रस्य वामदेव ऋषिरनुष्टुप्छंदः श्रीसदाशिवो देवता ॐ बीजं नमः शक्तिः शिवाय कीलकं मम सांबसदाशिवप्रीत्यर्थं न्यासे पूजने जपे च विनियोगः ॥ ॐ वामदेवाय ऋषये नमः शिरसि । ॐ अनुष्टुप्छंदसे न० मुखे । ॐ श्रीसदाशिवदेवतायै न० हृदि। ॐबीजाय न० गुह्ये । ॐ शक्तये नमः पादयोः । ॐ शिवाय कीलकाय न० सर्वांगे । ॐ नं तत्पुरुषाय नमो हृदये । ॐ मं अघोराय नमः पादयोः ॐ शिं सद्योजाताय नमो गुह्ये ।

ॐ वां वामदेवाय नमो मूर्ध्नि ॥ ॐ यं ईशानाय नमो मुखे । ॐ ॐ अंगुष्ठाभ्यां नमः । ॐ नं तर्जनीभ्यां स्वाहा । ॐ मं मध्यमाभ्यां वषट् । ॐ शिं अनामिकाभ्यां हुं । ॐ वां कनिष्ठिकाभ्यां वौषट् । ॐ यं करतलकरपृष्ठाभ्यां फट् । ॐ ॐ हृदयाय नमः । ॐ नं शिरसे स्वाहा । ॐ मं शिखायै वषट् । ॐ शिं कवचाय हुं । ॐ वां नेत्रत्रयाय वौषट् । ॐ यं अस्त्राय फट् ॥ एवं न्यासं कृत्वा कुंभपूजां विधाय । ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तंप्रसन्नम्॥पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम्॥ इति ध्यात्वा प्राणप्रतिष्ठां कुर्यात्॥अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छंदांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं ह्रीं शक्तिः क्रौं कीलकं देवप्राणप्रतिष्ठापने विनियोगः। ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि । ऋग्यजुःसाम-

च्छंदोभ्यो नमो मुखे । प्राणाख्यदेवतायै न० हृदि । आं बीजाय नमो गुह्ये । ह्रीं शक्तये नमः पादयोः । क्रौं कीलकाय नमः सर्वाङ्गे । इति कृत्वा ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं शिवस्य प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रौं यं रं ० शिवस्य जीव इह स्थितः ॥ ॐ आं ह्रीं क्रौं यं रं ० शिवस्य सर्वेंद्रिया-णि ॐ वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणजिह्वापाणिपा-दपायूपस्थानि इहागत्य सुखं चिरं तिष्ठतु स्वाहा ॥ एवं प्राणप्रतिष्ठां कृत्वा स्थापितं लिङ्गं स्पृशन् ॐ भूः पुरुषं सांबसदाशिवमावाहयामि । ॐ भुवः पुरुषं सांबसदाशिवमावाहयामि । ॐ स्वः पुरुषं सांबसदा-शिवमावाहयामि । इत्यावाहयेत् ॥ ॐ स्वामिन्सर्व-जगन्नाथ यावत्पूजावसानकम् । तावत्त्वं प्रीतिभावेन लिंगेऽस्मिन्सन्निधो भव ॥ १ ॥ इति पुष्पांजलिं दत्त्वा गणेशप्रमुखान्स्वनाममंत्रेण संपूज्य शिवपूजनं कुर्यात् ॥ तद्यथा ॥ ॐ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥ अथोयेऽअस्य सत्वानोहंतेभ्योऽकरं नमः ॥ ॐ शिवाय नमः पाद्यं समर्पयामि । इति पाद्यम् ॥१॥

ॐ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पंक्त्या सह बृहत्युष्णि हाककुप्सूचीभिः । सम्यन्तुत्वा ॐ शिवाय नमः अर्घ्यं समर्पयामि । इत्यर्घ्यम् ॥ २ ॥ एवं चतुर्थ्यंतेन सर्वत्र ॥ ॐ त्र्यंबकंयजामहेसुगंधिम्पुष्टिवर्धनम् । उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ इत्याचमनम् ॥ ३ ॥ ॐ मधुवाताऋतायते इति मधुपर्कम् ॥ ॥ ४ ॥ ॐ शिवाय नमः आचमनीयम् ॥ ५ ॥ ॐ वरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्ज्जनीस्थोवरुणस्यऽऋतुसदन्यसिवरुणस्यऽऋतुसदनमसिवरुणस्यऋतुसदनमासीद॥इति जल स्नानम् ॥६॥ ॐ पयः पृथिव्यांपयओषधीषुपयोदिव्यंतरिक्षेपयोधाःपयस्वतीःप्रदिशःसंतुमह्यम् ॥ इति पयःस्नानं पुनर्जलस्नानम् ॥ ७ ॥ ॐ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनःसुरभिनोमुखाकरत्प्रणआयूᳬषितारिष-

त् ॥ इति दधिस्नानं पुनर्जलस्नानम् ॥ ८ ॥ ॐ घृतं-घृतपावान÷पिबतव्वसांव्वसापावानꣳपिबतांतरिक्षस्य हविरसिस्वाहादिश÷प्रदिशऽआदिशोव्विदिशऽउद्दि-शोदिग्भ्यꣳस्वाहा ॥ इति घृतस्नानं पुनर्जलस्नानम् ॥ ॥ ९ ॥ ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधव÷मा-ध्वीर्न्न÷संत्वोषधीꣳमधुनक्तमुतोषसोमधुमत्पार्थिवꣳर-जं÷मधुद्यौरस्तुन÷पिता मधुमान्नोव्वनस्पतिर्म्मधुमां-अस्तुसूर्य÷माध्वीर्गावोभवन्तुनꣳ ॥ इति मधुस्नानं पुनर्जलस्नानम् ॥ १० ॥ ॐ अपाꣳरसमुद्वयसꣳसू-र्य्येसन्तꣳसमाहितम्अपाꣳरसस्ययोरसस्तंवोगृह्णा-म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनि रिन्द्रायत्वाजुष्टतमम् ॥ इति शर्करास्नानं पुनः शुद्धो-दकस्नानम् ॥ ११ ॥ ॐ पंचनद्यꣳसरस्वतीमपियंतिस

स्रांतसः सरस्वतीतु पञ्चधासोदेशेभवत्सरित् ॥ इति पंचामृतस्नानम् ॥ १२ ॥ ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षोरुणस्तेरुद्राय पशुपतयेकर्णायामाऽअवलिप्तारौद्रानभोरूपाः पार्ज्जन्याः ॥ इति शुद्धोदकस्नानम् ॥ १३ ॥ ततः स्नानांते ॐ नमस्ते रुद्रम० इति षोडशभिर्ऋग्भिः अभिषेकं कुर्यात् ॥ ततः ॐ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तऽइषवः परातभगवोवप ॥ इति वस्त्रं कौपीनं च ॥ १४ ॥ ततः आचनम् ॥ ॐ विज्यंधनुः कपर्दिनोविशल्योबाणवाँ२॥ऽउत॥ अनेशन्नस्ययाऽइषवआभुरस्यनिषंगधिः॥इत्याभरणम् १५॥ ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनऽआवः सबुध्न्याऽउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ इति यज्ञोपवीतमाचमनं च ॥ १६ ॥ ॐ

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकंठाय च नमः कपर्दिने ॥ इति गंधम् ॥१७॥ ॐ नमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ इत्यक्षताः ॥१८॥ ॐ नमः पार्य्याय चावार्य्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च नमः॥ इति पुष्पाणि ॥१९॥ ॐ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुंदुभ्याय चाहनन्याय च नमो धृष्णवे ॥ इति बिल्वपत्राणि ॥ २० ॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥इति दूर्वाः ॥ २१ ॥ ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टा

यंचनमोंमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ इति धूपम् ॥ २२॥ ॐ नमआशवेचाजिरायंचनमःशीघ्र्याय चशीभ्यायचनमऽऊर्म्यायचावस्वन्यायचनमोनादेयायचद्वीप्यायच ॥ इति दीपम् ॥ २३ ॥ ॐ नमोज्येष्ठायंचकनिष्ठायंचनमः पूर्वजायंचापरजायंचनमोमध्यमायंचापगल्भायचनमोजघन्यायचबुध्यायचनमःसोभ्याय ॥ इति नैवेद्यम् ॥ २४ ॥ ॐ त्र्यंबकंयजामहेसुगंधिम्पुष्टिवर्द्धनंउर्वारुकमिंवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ इत्याचमनम् ॥ २५ ॥ ॐ इमारुद्रायंतवसेंकपर्दिनेंक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसंद्विपदेचतुष्पदेविश्वंपुष्टंग्रामेऽअस्मिन्ननातुरम्॥ इति तांबूलम् ॥२६॥ ॐ हिरण्यगर्भःसमवर्तताग्रेभूतस्यंजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायंहविषाविधेम ॥ इति दक्षिणाम् ॥ २८ ॥

ॐ नमः शिवाय इत्यनेन ऋतुफलानि पुष्पमालां चार्पयेत् । ततः एकादशरुद्रान्पूजयेत् ॥ ॐ अघोराय नमः ॥ १ ॥ ॐ पशुपतये न० ॥२ ॥ ॐ शिवाय न० ॥३॥ ॐ विरूपाय न० ॥ ४ ॥ ॐ विश्वरूपाय न० ॥ ५ ॥ ॐ भैरवाय न० ॥ ६॥ ॐ त्र्यंबकाय न० ॥ ७ ॥ ॐ शूलपाणये न० ॥ ८ ॥ ॐ कपर्दिने न० ॥ ९ ॥ ॐ ईशानाय न० ॥ १० ॥ ॐ महेशाय न० ॥११॥ इत्येकादशरुद्रान्संपूज्य ॥ ॐ भगवत्यै न० ॥ १ ॥ ॐ उमादेव्यै न० ॥ २ ॥ ॐ शंकरप्रियायै न० ॥ ३ ॥ ॐ पार्वत्यै न० ॥ ४ ॥ ॐ गौर्यै न० ॥ ५ ॥ ॐ कालिंद्यै न० ॥ ६ ॥ ॐ काटिव्यै ० ॥ ७ ॥ ॐ विश्वधारिण्यै० ॥ ८ ॥ ॐ विश्वेश्वर्यै० ॥ ९ ॥ ॐ विश्वमात्रे० ॥१०॥ ॐशिवायै० ॥११॥ इति शक्तिं पूजयेत्॥ एवं सगणं रुद्रं संपूज्य वेद्यामष्टमूर्तिमक्षतादिना पूजयेत् ॥ ॐ शर्वाय क्षितिमूर्तये नमः प्राच्याम् ॥ ॐ भवाय जलमूर्तये नम ईशान्याम् ॥ ॐ रुद्रायाग्निमूर्त-

ये नम उदीच्याम्॥ॐ उग्राय वायुमूर्तये नमः वायव्याम् ॥ ॐ भीमायाकाशमूर्तये नमः प्रतीच्याम्॥ॐ पशुपतये यजमानमूर्तये नमः नैर्ऋत्याम् ॥ ॐ महादेवाय सोममूर्तये नमः दक्षिणस्याम् ॥ ॐ ईशानाय सूर्यमूर्तये नमः आग्नेय्याम् ॥ एवं संपूज्य साक्षतजलेन तर्पणं कार्यम्॥ॐ भवं देवं तर्पयामि। ॐ शर्वं देवं तर्पयामि। ॐ ईशानं देवं तर्पयामि ।ॐ पशुपतिं देवं त० ॐ उग्रं देवं तर्प० ।ॐ रुद्रं देवं तर्प० । ॐ भीमं देवं त० । ॐ महांतं देवं त० । ॐ भवस्य देवस्य पत्नीं तर्प० । ॐ शर्वस्य देवस्य पत्नीं तर्प० । ॐ ईशानस्य देवस्य पत्नीं तर्प० । ॐ पशुपतेर्देवस्य पत्नीं त० । ॐ रुद्रस्य देवस्य पत्नीं त० । ॐ भीमस्य देवस्य पत्नीं तर्प० । ॐ महतो देवस्य पत्नीं त० ॥ एवं तर्पणं कृत्वा आर्तिक्यं कुर्यात् ॥ ततः ॐ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्नतेहनाकम्महिमानःसचंतयत्रपूर्वेसाध्याःसंतिं

देवाः ॥ इति पुष्पांजलिः ॥ ॐ येतीर्थानिप्रचरन्ति सृकाहस्तानिषङ्गिणः तेषांᳬसहस्रयोजनेवधन्वानि-तन्मसि ॥ १ ॥ यानि कानि च पापानि जन्मांतर-कृतानि च ॥ तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे-पदे ॥ १ ॥ इति प्रदक्षिणात्रयं कार्यम् ॥ ततः–प्रसन्नं पाहिमामीश भीतं मृत्युग्रहार्णवादिति वदन् नमेत् । ततो यथाशक्ति पंचाक्षरं दशाक्षरं वा मंत्रं जप्त्वा महिम्नक्षमापराधप्रभृतिपुराणैः प्राकृतैः स्तवैः स्तुत्वा देवं प्रार्थयेत् ॥ ॐ आवाहनं न जानामि न जा-नामि विसर्ज्जनम् । पूजां चैव न जानामि क्षमस्व पर-मेश्वर ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सदा-शिव । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मा-त्कारुण्यभावेन रक्ष मां परमेश्वर ॥ ३ ॥ इति प्रार्थ्य ॥ अनेन पूजनेन श्रीसांबसदाशिवः प्रीयता-मिति निवेदयेत् ततो गलताडनंकृत्वा ॐ महा-

देवाय नमः ॥ हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् । शिवः पशुपतिश्चैव महादेवविसर्जनम् ॥ १ ॥ इति संहारमुद्रया विसर्जयेत् ॥ नंदिपुराणे-आयुष्मान्धनवाञ्छ्रीमान्पुत्रवान्धान्यवान्सुखी । वरमिष्टं लभेल्लिंगं पार्थिवं यः समर्चयेत् । तस्मात्तु पार्थिवं लिंगं ज्ञेयं सर्वार्थसाधकम् ॥ १ ॥ इति पार्थिवशिवपूजाविधिः समाप्तः ॥

अथ शिवनीराजनार्तिः प्रारभ्यते ॥ ॐ जय गंगाधर हर जय गिरिजाधीशा । त्वं मां पालय नित्यं कृपया जगदीशा हर हर हर महादेव ॥ १ ॥ कैलासे गिरिशिखरे कल्पद्रुमविपिने । गुंजतिमधुकरपुंजे कुंजवने गहने ॥ कोकिलकूजितखेलतहंसावनललिता । रचयति कलाकलापं नृत्यति मुदसहिता हर हर हर महादेव ॥ २ ॥ तस्मिंल्ललितसुदेशे शाला मणिरचिता । तन्मध्ये हरनिकटे गौरी मुदसहिता ॥ क्रीडा रचयति भूषारञ्जितनिजमीशम् । इंद्रादिकसुरसेवितनामयते शीशम् । हर

हर०॥ ३ ॥ विबुधवधू बहु नृत्यति हृदये मुदसहिता । किन्नरगायनकुरुते सप्तस्वरसहिता॥ धिनकत थैथै धिनकत मृदङ्ग वादयते।क्वण क्वण ललिता वेणुं मधुरं नादयते।हर हर०॥४॥रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता। चक्रावर्तें भ्रमयति कुरुते तांधिकतां ।तां तांलुप चुप तां तां डमरू वादयते । अंगुष्ठाङ्गुलिनादं लासक्तां कुरुते । हर हर० ॥ ५ ॥ कर्पूरद्युतिगौरं पंचाननसहितम् । त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम् ॥ सुंदरजटाकलापं पावकयुतभालं । डमरुत्रिशूलपिनाकं करधृतनृकपालम् । हर हर० ॥ ६ ॥ मुण्डै रचयति माला पन्नगमुपवीतम् । वामविभागे गिरिजारूपं अतिललितम् । सुंदरसकलशरीरे कृतभस्माभरणम् । इतिवृषभध्वजरूपं तापत्रयहरणम् । हर हर० ॥ ७ ॥ शंखनिनादं कृत्वाझल्लरि नादयते । नीराजयते ब्रह्मा वेदऋचां पठते ॥ अतिमृदुचरणसरोजं हृदि कमले धृत्वा । अवलोकयति महेशं ईशं अभिनत्वा । हर० ॥ ८ ॥ ध्यानं आरतिसमये हृदये अति कृत्वा राम-

त्रिजटानाथं ईशं अभिनत्वा । सङ्गितमेवं प्रतिदिनपठनं यः कुरुते । शिवसायुज्यं गच्छति भक्त्या यः शृणुते । हर हर हर महादेव ॥ ९ ॥ इति शिवनीराजनं समाप्तम् ॥

अथ मंत्रपुष्पांजलिमंत्राः ॥ ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् । तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ ॥ १ ॥ ॐ राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय नमः॥२॥ ॐ स्वति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौमः सार्वायुष आन्तादापरार्धात्पृथिव्यै समुद्रपर्यंताया एकराडिति । तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ॥ आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥इतिमंत्रैः पुष्पाञ्जलिं समर्प्य। ॐ सप्तास्या-

सन्परिधयस्त्रिःसप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वा- नाऽअबध्नन्पुरुषम्पशुम् ॥ १ ॥ यानि कानि चेति प्रदक्षिणां कृत्वा स्तुतिं कुर्यात् ॥ इति मंत्रपुष्पां- जलिः ॥

अथ शिवस्तुतिः ॥ ॐ अंगहीनं क्रियाहीनं विधि- हीनं महेश्वर । पूजितोऽसि मया देव तत्क्षमस्व भ्रमा- त्कृतम् ॥ १ ॥ यद्यप्युपहतैः पुष्पैरपास्तैर्भावदूषितैः ॥ केशकीटापविद्धैश्च पूजितोसि मया प्रभो ॥ २ ॥ अन्यत्रा- सक्तचित्तेन क्रियाहीनेन वा प्रभो ॥ मनोवाक्कायदुष्टेन पूजितोसि त्रिलोचन ॥ ३ ॥ यच्चोपहतपात्रेण कृत- मर्घ्यादिकं मया ॥ तामसेन च भावेन तत्क्षमस्व मम प्रभो ॥ ४ ॥ मंत्रेणाक्षरहीनेन पुष्पेण विफलेन च ॥ पूजितोसि महादेव तत्सर्वं क्षम्यतां मम ॥ ५ ॥ अज्ञानयोगादुपचारकर्म यत्पूर्वमस्माभिरनुष्ठितं ते ॥ तदेव सोढ्वासनकं दयालो पितेव पुत्रानतनो जुषस्व ॥ ॥ ६ ॥ अयं दानकालस्त्वहं दानपात्रं भवानेव दाता त्वदन्यं न याचे ॥ भवद्भक्तिमंतः स्थिरां देहि मह्यं

कृपाशील शंभो कृतार्थोस्मि यस्मात् ॥ ७ ॥ ॐ नमोंकाररूपाय नमोऽक्षरवपुर्धृते॥ नमो नादात्मने तुभ्यं नमो बिंदुकलात्मने ॥ ८ ॥ अलिंगलिंगरूपाय रूपातीताय ते नमः॥त्वंमाता सर्वलोकानां त्वमेव जगतः पिता॥९॥त्वं भ्राता त्वं सुहृन्मित्रस्त्वं प्रियः प्रियरूपधृक् ॥ त्वं गुरुस्त्वं गतिः साक्षात्त्वं पिता त्वं पितामहः ॥ १० ॥ नमस्ते भगवान्रुद्र भास्करामिततेजसे ॥नमो भवाय रुद्राय रसायांबुमयाय च ॥ ११ ॥ शर्वाय क्षितिरूपाय सदा सुरभिणे नमः ॥ पशूनां पतये तुभ्यं पावकामिततेजसे ॥१२॥ भीमाय व्योमरूपाय शब्दमात्रायतेनमः॥महादेवायसोमायअमृताय नमोस्तु ते ॥ १३ ॥ उग्राय यजमानाय नमस्ते कर्मयोगिने ॥ पार्थिवस्य च लिंगस्य यन्मया पूजनं कृतम् ॥ तेन मे भगवान्रुद्रो वांछितार्थं प्रयच्छतु ॥ ॥ १४ ॥ इति शिवस्तुतिः समाप्ता ॥ श्रीशिवोऽवतु ॥

अथ रुद्राभिषेकविधिः ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य ॐ ममात्मनः (यजमानस्य वा)

श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसिद्धि द्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं श्रीभवानीशंकरमृत्युंजयमहारुद्रदेवताप्रीतये रुद्राभिषेकं करिष्ये इति संकल्प्य श्रीगणपतिपूजनपूर्वकं श्रीभवानीशंकरं संपूज्य पंचामृतजलदुग्धाद्यविच्छिन्नधारया रुद्राभिषेकं कुर्यात् ॥ तद्यथा । अ० १६ ॥ ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे शिवाङ्गिरित्रताङ्कुरुमाहिंठ्सीः पुरुषञ्जगत् ॥ ३ ॥ शिवेनव्वचसात्त्वागिरिशाच्छाव्वदामसि ॥ यथानः सर्व्वमिज्जगदयक्ष्मठ्सुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोचदधिवक्ताप्प्रथमोदैव्योभिषक् ॥ अहींश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्न्योधराचीःपरासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽ

उतबभ्रुःसुमङ्गलः॥येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः
सहस्रशोवैषाꣳहेडऽईमहे ॥ ६ ॥ असौयोवसर्प्प
तिनीलग्ग्रीवोव्विलोहितः उतैनङ्गोपाऽअदृश्रन्नदृश्र-
न्नुदहार्य्यः सदृष्टोमृडयातिनः ॥ ७ ॥ नमोऽस्तुनील-
ग्ग्रीवाय सहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्वानो
हन्तेभ्योकरन्नमः॥ ८॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरा-
र्त्न्योर्ज्ज्याम् ॥ याश्चतेहस्तऽइषवःपरातार्भगवोव्वप
॥९॥विज्ज्यन्धनुःकपर्द्दिनोव्विशल्योबाणवाँ २ ॥ऽ
उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः
॥ १० ॥ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः ॥
तयास्स्मान्विश्श्वतस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥
परितेधन्न्वनोहेतिरस्स्मान्व्वृणक्तुविश्श्वतः॥अथो-
यऽइषुधिस्तवारेऽअस्स्मन्निधेहितम् ॥ १२ ॥ अवतत्य
धनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानां-

म्मुखाशिवोनं÷सुमनाभव ॥ १३ ॥ नमस्तऽआ-
युधायानाततायधृष्णवे ॥ उभाब्भ्यामुततेनमोबाहु-
ब्भ्यान्तवधन्न्वने ॥ १४ ॥ मानोमहान्तमुत
मानोऽअब्भर्कम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मा
नोव्वधीःपितरम्मोतमातरम्मानं÷प्प्रियास्तन्वोरुद्ररी-
रिषः ॥ १५ ॥ मानस्तोकेतनयेमानऽआयुषिमानो-
गोषु मानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामि-
नोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ॥ १६ ॥
नमोहिरण्यबाहवेसेनान्ये दिशाञ्चपतयेनमोनमोव्वृक्षे-
ब्भ्योहरिकेशेब्भ्यःपशूनाम्पतयेनमोनमं÷शष्पिञ्जरा
यत्त्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीति-
नेपुष्टानाम्पतयेनमो नमो बब्भ्लुशाय ॥ १७ ॥नमो
बब्भ्लुशायव्विव्याधिनेन्नानाम्पतयेनमोनमोभवस्य-
हेत्यैजगताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्प-

तंयेनमोनमं ÷ सूतायाहंत्यैव्वनानाम्पतंयेनमोनमोरोहि-
ताय ॥ १८ ॥ नमोरोहितायस्थपतयेव्वृक्षाणाम्पतये
नमोनमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्पतंयेनमो
नमोमंत्रिणेव्वाणिजायकक्षाणाम्पतंयेनमोनमंऽउच्चैर्घो
षायाक्रन्दयतेपत्तीनाम्पतंयेनमोनमं ÷ कृत्स्नायतया॥
॥ १९ ॥ नमं ÷ कृत्स्नायतयाधावतेसत्त्वनाम्पतंयेन-
मोनमं ÷ सहमानायनिव्व्याधिनंऽआव्व्याधिनीनाम्प-
तंयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्पतंयेनमोन
मोनिचेरवेपरिचरायारण्यानाम्पतयेनमोनमोव्वञ्चते ॥
॥ २० ॥ नमोवञ्चतेपरिव्वञ्चतेस्तायूनाम्पतंयेनमो-
नमोनिषङ्गिणंऽइषुधिमतेतस्कराणाम्पतयेनमोनमं ÷
सृकायिभ्योजिघांᳬसद्भ्योमुष्णताम्पतंयेनमोनमो-
सिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतंयेनमं ÷ ॥२१॥
नमंऽउष्णीषिणेगिरिचरायकुलुञ्चानाम्पतंयेनमोनमं-

ऽइषुमद्भ्योधन्वायिभ्यश्श्चवोनमोनमऽआतन्न्वाने-
भ्यः प्रतिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्यो
स्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥२२॥नमोविसृ-
जद्भ्योविद्ध्यद्भ्यश्चवोनमोनमः स्वपद्भ्योजाग्रद्भ्य
श्चवोनमोनमःशयानेभ्यऽआसीनेभ्यश्चवोनमोनम-
स्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमः सभाभ्यः ॥२३॥
नमःसभाभ्यः सभापतिभ्यश्चवोनमोनमोश्वेभ्योऽ
श्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविवि-
द्ध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृंहतीभ्यश्च
वोनमोनमोगणेभ्यः ॥ २४ ॥ नमोगणेभ्योगणप-
तिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो
नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमो नमोविरूपे-
भ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः ॥ २५ ॥

नमः सेनाभ्यः सेनानिभ्यश्चवोनमोनमोरथि-
भ्योऽअरथेभ्यश्चवोनमोनमः क्षत्तृभ्यः सङ्ग्रही-
तृभ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवो नमः
॥ २६ ॥ नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमः
कुलालेभ्यः कर्म्मारेभ्यश्चवोनमोनमोनिषादेभ्यः पु
ञ्जिष्टेभ्यश्चवोनमोनमः श्वनिभ्योमृगयुभ्यश्चवोनमो-
नमः श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः श्वपतिभ्य-
श्चवोनमोनमोभवायचरुद्रायचनमः शर्वायचपशुपत-
येचनमोनीलग्रीवायचशितिकण्ठायचनमः कपर्दिने-
॥ २८ ॥ नमः कपर्दिनेचव्युप्तकेशायचनमः सहस्रा-
क्षायचशतधन्न्वनेचनमोगिरिशयायचशिपिविष्टायच
नमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥ नमो-
ह्रस्वायचव्वामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धा

यैषसुवृधेचनमोग्ग्र्यायचप्प्रथमायचनमऽआशवे ॥
॥ ३० ॥ नमऽआशवेचाजिरायचनमःशीग्घ्र्यायचशी-
भ्भ्यायचनमऽऊर्म्म्यायचावस्वन्न्यायचनमोनादेयाय
चद्वीप्प्यायच ॥ ३१ ॥ नमोज्ज्येष्ठायचकनिष्ठाय-
चनमःपूर्व्वजायचापरजायचनमोमध्यमायचापग-
ल्भायचनमोजघन्न्यायचबुध्न्यायचनमःसोभ्भ्याय ॥
॥ ३२ ॥ नमःसोभ्भ्यायचप्प्रतिसर्य्यायचनमोयाम्म्या
यचक्षेम्म्यायचनमःश्लोक्यायचावसान्न्यायचनमऽउ-
र्व्वर्य्यायचखल्ल्यायचनमोव्वन्न्याय ॥३३॥ नमोव्व-
न्न्यायचकक्ष्यायचनमःश्श्रवायचप्प्रतिश्श्रवायचनम
ऽआशुषेणायचाशुरथायचनमःशूरायचावभेदिनेचन-
मोविल्म्मिने ॥ ३४ ॥ नमोविल्म्मिनेचकवचिनेच-
नमोव्वर्म्मिणेचव्वरूथिनेचनमःश्श्रुतायचश्श्रुतसेनाय-
चनमोदुन्दुभ्भ्यायचाहनन्न्यायचनमोधृष्णवे ॥३५॥

नमोधृष्णवेचप्प्रमृषायचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमः स्वायुधायचसुधन्न्वने-
च ३६॥ नमः स्रुत्त्यायचपत्थ्यायचनमः काट्ट्यायचनी
प्प्यायचनमः कुल्ल्यायचसरस्यायचनमोनादेयायच-
वैशंतायचनमः कूप्याय ३७ नमः कूप्यायचावट्ट्यायच
नमोवीद्ध्रयायचातप्प्यायचनमोमेघ्यायचविद्युत्त्या-
यचनमोवर्ष्यायचावर्ष्यायचनमोवात्याय ॥ ३८ ॥
नमोवात्त्यायचरेष्म्म्यायचनमोवास्तव्ययायचवा-
स्तुपायचनमः सोमायचरुद्रायचनमस्ताम्म्रायचारुणा
यचनमः शङ्गवे ॥ ३९ ॥ नमः शङ्गवेचपशुपतयेचन-
मऽउग्ग्रायचभीमायचनमोग्ग्रेवधायचदूरेवधायचनमो
हन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्तारा-
य ॥ ४० ॥ नमः शम्भवायचमयोभवायचनमः शङ्क-

रायचमयस्करायचनमः शिवायचशिवतरायच ४१॥
नमः पार्यायचावार्यायचनमः प्रतरणायचोत्तरणाय
चनमस्तीर्थ्यायचकूल्यायचनमः शष्प्यायचफेन्यायचनमः सिकत्याय ॥ ४२ ॥ नमः सिकत्यायच
प्रवाह्यायचनमः किंशिलायचक्षयणायचनमः कपर्दिनेचपुलस्तयेचनमऽइरिण्यायचप्रपथ्यायच ४३॥
नमोव्रज्यायचगोष्ठ्यायचनमस्तल्प्यायचगेह्यायच-
नमोहृदय्यायचनिवेष्प्यायचनमः काट्यायचगह्वरेष्ठा-
यचनमः शुष्क्याय॥४४॥नमः शुष्क्यायचहरित्याय-
चनमः पाᳬसव्यायचरजस्यायचनमोलोप्यायचो-
लप्यायचनमऽऊर्व्यायचसूर्व्यायचनमः पर्ण्णाय ४५
नमः पर्ण्णायचपर्णशदायचनमऽउद्गुरमाणायचाभिघ्न
तेचनमऽआखिदतेचप्रखिदतेचनमऽइषुकृद्भ्योधनु-

ष्कृद्भ्यश्श्चवोनमोनमोवःकिरिकेभ्योदेवानाᳬहृदये-
भ्योनमोविचिन्न्वत्केभ्योनमोविक्षिणत्केभ्योन-
मऽआनिर्हतेभ्यः ॥ ४६ ॥ द्रापेऽअन्धसस्पते
दरिद्रनीललोहित ॥ आसाम्प्रजानामेषाम्पशूना-
म्माभेर्म्मारोङ्मोचनꣳकिञ्चनाममत् ॥ ४७ ॥
इमारुद्रायतवसेकपर्द्दिनेक्षयद्वीरायप्प्रभरामहेमतीः ॥
यथाशमसद्द्विपदेचतुष्पदेव्विश्श्वम्पुष्टङ्ग्रामेऽअस्मिन्न
नातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूꣳशिवाव्विश्श्वाह-
भेषजी ॥ शिवारुद्रस्यभेषजीतयानोमृडजीवसे॥४९॥
परिनोरुद्रस्यहेतिर्व्वृणक्तुपरित्त्वेषस्यदुर्म्मतिरघायोः ॥
अवस्थिरामघवद्भ्यस्तनुष्व्वमीढ्वस्तोकायस्तनयाय-
मृड ॥ ५० ॥ मीढुष्टमशिवतमशिवोनꣳसुमनाभव ॥
परमेव्वृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपिनाक-

म्बिबभ्रदागहि ॥ ५१ ॥ व्विकिरिद्व्विलोहितनमस्तेऽ अस्तुभगवः ॥ यास्तेंसहस्रठंहेतयोन्न्यमस्म्मन्निवपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशोबाह्वोस्तवंहेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥५३॥ असंख्यातासहस्राणियेरुद्राऽअधिभूम्म्याम् ॥ तेषाठंसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ५४ ॥ अस्म्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषां० ॥ ५५ ॥ नीलग्ग्रीवाःशितिकण्ठादिवंठंरुद्द्राऽउपश्श्रिताः ॥ तेषां० ॥ ५६ ॥ नीलग्ग्रीवाःशितिकंठाःसर्व्वाऽअधःक्षमाचराः ॥ तेषां० ॥ ५७ ॥ येवृक्षेषुशष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः ॥ तेषां० ॥ ५८ ॥ येभूतानामधिपतयोव्विशिखासःकपर्दिनः ॥ तेषां० ॥५९॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्य्युधः ॥ तेषां० ॥ ॥ ६० ॥ येतीर्त्थानिप्प्रचरन्तिसृकाहस्तानिषङ्गिणः

तेषांᳬ० ॥ ६१ ॥ येऽन्नेषुव्विविद्ध्यन्तिपात्रेषुपिबतो-
जनान्॥तेषांᳬ०॥६२॥यऽएतावन्तश्चभूयांᳬसश्चदि-
शोरुद्रावितस्त्थिरे॥तेषांᳬसहस्रयोजनेवधन्वानितन्म
सि ६३ नमोस्तुरुद्रेभ्योयेदिवियेषांव्वर्षमिषवः॥तेभ्यो
दशप्प्राचीर्दशंदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्धाः
नमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च-
नोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेभ्यो-
ऽन्तरिक्षेयेषांव्वातऽइषवस्तेभ्योदशप्प्राचीर्दशंदक्षिणा
दशप्प्रतीचीर्दशोदीचीर्दशोर्द्धास्तेभ्योनमोऽअस्तुते-
नोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषा
ञ्जम्भेदध्मः॥६५॥ नमोस्तुरुद्रेभ्योयेपृथिव्व्यांय्ये-
षामन्नमिषवस्तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीची
र्दशोदीचीर्दशोर्द्धाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुते-

नोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेद-
ध्मः ॥ ६६ ॥ इति रुद्रे पञ्चमोध्यायः ॥ श्रीशि-
वार्पणमस्तु ॥

ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः भवे
भवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ १ ॥ वामदे
वायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालाय-
नमःकलविकरणायनमोबलविकरणायनमः॥२॥ ब-
लायनमोबलप्रमथायनमःसर्वभूतदमनायनमोमनोन्म
नायनमः ॥ ३ ॥ अघोरेभ्योथघोरेभ्योघोरघोरतरे-
भ्यः सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ४॥
तत्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रःप्रचोदयात्
॥ ५ ॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्म-
ह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम्
॥ ६ ॥ ॐ सर्वेषां वा एषवेदानाᳪं रसो यत्साम

सर्वेषामेवैनमेतद्वेदाना ७ँ रसेनाभिषिञ्चति ॥ ७ ॥ ॐ शान्तिः शान्तिः सुशांतिर्भवतु सर्वारिष्टशान्तिर्भवतु ॥ एवमभिषेकं कृत्वा वस्त्रादिमंत्रपुष्पयुक्त नमस्कारपर्यंतं पूजां समाप्य ॥ ॐ अनेन रुद्राभिषेकयुक्तपूजाकर्मणा श्रीभवानीशंकरमहामृत्युञ्जयमहारुद्रः प्रीयतां न मम ॥ इत्यर्पयेत ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति रुद्राभिषेकविधिः समाप्तः ॥

अथ गायत्रीपुरश्चरणप्रयोगः ॥ तत्र तावत्सुमुहूर्ते तीर्थादौ बिल्ववृक्षाश्रये वा गत्वा आचम्य प्राणानायम्य देशकालौ संकीर्त्य करिष्यमाणगायत्रीपुरश्चरणे अधिकारसिद्ध्यर्थं कृच्छ्रत्रयममुकप्रत्याम्नायद्वारा अहमाचरिष्ये ॥ इति संकल्प्य धेनुदानहोमसुवर्णादिप्रत्याम्नायविधिना कृच्छ्राणि संपादयेत् ॥ पुनर्देशकालौ संकीर्त्य मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं चतुर्विंशतिलक्षजपात्मकं गायत्रीपुरश्चरणं स्वयं विप्रद्वारा वा करिष्ये ॥ तदंगत्वेन गणपति-

पूजनं स्वस्ति पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धा-
चार्यादिजपकर्तृवरणंच करिष्ये ॥ इति संकल्प्य सुमु-
खश्चेत्यादिना गणपतिपूजनादिनान्दीश्राद्धान्तं च-
विधाय नान्दीश्राद्धांते सविता प्रीयताम् इति पठि-
त्वा देशकालौ संकीर्त्य गायत्रीपुरश्चरणे जपकर्तारं त्वा-
महं वृणे इति पृथक्पृथक् विप्रद्वारा जपे विप्रान्वृणु-
यात् ॥ ततस्तान्वस्त्रासनकमंडलुमालादिभिः संपूज्य
देवताः प्रार्थयेत् ॥ सूर्यः सोमो यमः कालः संध्ये भू-
तान्यहः क्षपा॥पवमानो दिक्पतिर्भूराकाशं खेचरामराः
॥ ब्रह्मशासनमास्थाय कल्पध्वमिह सन्निधिम् ॥
इति पठित्वा ततः कुशाद्यासनोपविष्टः पवित्रपाणि-
राचम्य देशकालौ स्मृत्वा अमुकगोत्रोऽमुकशर्माहम्
अमुक शर्मणो यजमानस्य सकलपापक्षयद्वारा श्रीप-
रमेश्वरप्रीत्यर्थं गायत्रीपुरश्चरणान्तर्गताऽमुकसंख्याप-
रिमितगायत्रीजपं करिष्ये॥इति प्रात्याहिकजपं संक-
ल्प्य ॥ॐ गुरवे नमः ॥ ॐ गणपतये नमः ॐ दुर्गायै
न० ॐ ॥ मातृभ्योनमः ॥ इतिनत्वा त्रिः प्राणानाय-

म्य ॥ ॐ तत्सवितुरिति गायत्र्या विश्वामित्रऋषिः सविता देवता गायत्री छंदः जपेविनियोगः ॥ ॐ विश्वामित्राय ऋषये नमः शिरसि ॥ ॐ गायत्रीछंदसे नमो मुखे ॥ ॐ सवितृदेवतायै नमो हृदि ॥ इति न्यस्य ॥ ॐ तत्सवितुरित्यंगुष्ठाभ्यां नमः ॥ ॐ वरेण्यं तर्जनीभ्यां नमः ॥ ॐभर्गो देवस्य मध्यमाभ्यां न० ॥ ॐ धीमह्यनामिकाभ्यां नमः॥ॐ धियो यो नः कनिष्ठिकाभ्यां नमः ॥ॐ॥ प्रचोदयात् करतलकरपृष्ठाभ्यां न० ॥ इति करन्यासं कृत्वा एवमेव हृदयादिषडंगन्यासं कुर्यात् ॥ स यथा-ॐ तत्सवितुरिति हृदयाय नमः ॥ १ ॥ वरेण्यमिति शिरसे स्वाहा ॥ २॥ भर्गो देवस्येतिशिखायै वषट् ॥ ३ ॥ धीमहीति कवचाय हुं ॥ ॥ ४॥ धियो यो न इति नेत्रयोर्वौषट् ॥ ५ ॥ प्रचोदयादिति अस्त्राय फट् ॥ ततो जपः कार्यः ॥ (तत्रादौ मालासंस्कारः) कुशोदकसहितः पंचगव्यैर्मालां प्रक्षाल्य ॐ ह्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं

तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षंइत्येतानि पंचाशन्मातृकाक्षराणि अश्वत्थपत्रस्थापितमालायां विन्यस्य ॐ सद्योजातेति मंत्रेण मालां पंचगव्येन प्रोक्ष्य शीतजलेन प्रक्षाल्य ॐ वामदेवेति चंदनेनावघृष्याघोरेतिमालां धूपयित्वा ॐ तत्पुरुषेति चंदनकस्तूर्यादिना लेपयित्वा ॐ ईशान इति मंत्रेण प्रतिमणिं शतवारं दशवारं वा अभिमंत्र्य ॐ अघोरेतिमंत्रेण मेरुं दशवारमभिमंत्रयेत् ॥ ततस्तैरेव मंत्रैर्मालां पञ्चोपचारैः संपूजयेत् ॥ (मंत्राः सर्वे रुद्राभिषेके द्रष्टव्याः) ततः ॐ महामाये महामाले सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ इति प्रार्थ्य ॥ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे ॥ जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये ॥ इति तामादाय मंत्रदेवतां सवितारं ध्यायन् हृदयसमीपे मालां धारयन् मंत्रार्थं स्मरन् मध्यंदिनावधि जपेत् अतित्वरायां सार्द्धत्रयप्रहरावधि जप्त्वान्ते पुनः प्रणवमुक्त्वा ॐ त्वं माले सर्वदेवानां

प्रीतिदा शुभदा भव ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥ १ ॥ इति मालां शिरसि निधाय त्रिः प्राणानायम्य पूर्वोक्तं न्यासत्रयं कृत्वा जपमीश्वरार्पणं कुर्यात् ॥ प्रत्यहं समानसंख्य एव जपो न तु न्यूनाधिकः । एवंपुरश्चरणजपसमाप्तौ होमः पुरश्चरणसांगतासिद्ध्यर्थं होमविधिं करिष्ये ॥ इति संकल्प्य अग्निं प्रतिष्ठाप्य पीठे सूर्यादिनवग्रहपूजनादि कलशस्थापनान्तं कर्म कृत्वा कुशकण्डिकां कुर्यात् ॥ ततः आज्यभागांते इदं हवनीयद्रव्यमन्वाधानोक्तदेवताभ्योऽस्तु न ममेति यजमानद्वारा त्यागं कृत्वा ॥ अर्कादिसमिच्चर्वाज्याहुतिभिर्ग्रहहोमं संपाद्य प्रधानदेवतां सवितारं चतुर्विंशतिसहस्रतिलाहुतिभिस्त्रिसहस्रसंख्याकाभिः पायसाहुतिभिर्घृतमिश्रतिलाहुतिभिर्दूर्वाहुतिभिः क्षीरद्रुमसमिधाहुतिभिश्च तर्पयित्वा शेषेण स्विष्टकृद्धोमं कुर्यात् ॥ होमे सप्रणवव्याहृतिरहिता स्वाहांता गायत्री । दूर्वात्रयस्यैकाहुतिः । दूर्वासमिधोदधिमध्वाज्याक्ताः ।

ततो होमांते बलिदानं कृत्वा यजमानस्याभिषेकः कार्यः। ततः प्रतिलक्षं सुवर्णनिष्कत्रयं तदर्धं वा शक्त्या वा दक्षिणा होमांते जले देवं सावितारं संपूज्य होमसंख्यादशांशेन २४००० गायत्र्यंते सवितारं तर्पयामि इत्युक्त्वा तर्पणं कार्यम् ॥ तर्पणदशांशेन २४० गायत्र्यन्ते आत्मानमाभिषिंचामि नम इति यजमान मूर्ध्न्यभिषेकः होमतर्पणाभिषेकानां मध्ये यदेव न संभवति तत्स्थाने तत्तद्द्विगुणो जपः कार्यः॥ अभिषेकसंख्यादशांशेन विप्रभोजनम् ॥ पुरश्चरणं संपूर्णमस्त्विति विप्रान् वाचयित्वा ईश्वरार्पणं कार्यम्॥ प्रत्यहं यज्जाग्रत इति शिवसंकल्पमंत्रस्य त्रिः पाठः॥कर्त्ता ब्राह्मणैः सह हविष्याशी सत्यवाक् अधःशायीब्रह्मचारी भवेत् ॥ विष्णुशयनमासेषु पुरश्चरणं न कार्यम्॥ तीर्थादौ शीघ्रं सिद्धिः बिल्ववृक्षाश्रयेण जपे एकाहात्सिद्धिः॥ इति धर्मसिंधौ गायत्रीपुरश्चरणप्रयोगः ॥

अथ गायत्रीशापविमोचनम्॥ अस्य श्रीब्रह्मशा-

पविमोचनमंत्रस्य ब्रह्माऋषिः भुक्तिमुक्तिप्रदा ब्रह्मशाप-
विमोचनी गायत्रीशक्तिर्देवता गायत्रीछंदः ब्रह्मशापवि-
मोचने विनियोगः ॥ ॐ गायत्रीं ब्रह्मेत्युपासीत यद्रूपं
ब्रह्मविदो विदुः। तां पश्यंति धीराः सुमनसा वाचाम-
ग्रतः॥ॐ वेदांतनाथाय विद्महे हिरण्यगर्भाय धीमहि त-
न्नो ब्रह्म प्रचोदयात्॥ ॐ देवी गायत्री त्वं ब्रह्मशापाद्वि-
मुक्ता भव ॥ अस्य श्रीवसिष्ठशापविमोचनमंत्रस्य
निग्रहानुग्रहकर्त्ता वसिष्ठ ऋषिः । वसिष्ठानुगृहीता
गायत्रीशक्तिर्देवता विश्वोद्भवा गायत्री छंदः वसिष्ठशा-
पविमोचनार्थं जपे विनियोगः ॥ ॐ सोहमर्कमयं
ज्योतिरहं शिवः आत्मज्योतिरहं शुक्रः सर्वज्योतिर-
सोस्म्म्यहम् ॥ इत्युक्त्वा योनिमुद्रां प्रदर्श्य गायत्रीत्र-
यं पठित्वा ॥ ॐ देवी गायत्री त्वं वसिष्ठशापाद्विमुक्ता
भव २ ॥ अस्य श्री विश्वामित्रशापविमोचनमंत्रस्य
नूतनसृष्टिकर्ता विश्वामित्रऋषिः विश्वामित्रानुगृहीता
गायत्रीशक्तिर्देवता वाग्देहा गायत्रीछंदः विश्वामित्रशा-
पविमोचनार्थं जपे विनियोगः ॥ ॐ गायत्रीं

भजाम्यग्निमुखीं विश्वगर्भां यदुद्भवा देवाश्चक्रिरे विश्व-सृष्टिं तां कल्याणीमिष्टकरीं प्रपद्ये। यन्मुखान्निसृतोऽ-खिलवेदगर्भः ॥ शापयुक्ता तु गायत्री सफला न क-दाचन। शापादुत्तारिता सा तु भुक्तिमुक्तिफलप्रदा ॥ (गायत्रीप्रार्थना) अजरे अमरे चैव ब्रह्मयोनिर्नमोस्तु ते। ब्रह्मशापाद्विमुक्ता भव। वसिष्ठशापाद्विमुक्ता भव। विश्वामित्रशापाद्विमुक्ता भव ॥ इति गयात्रीशापविमो चनम्॥अथगायत्रीकवचम्॥अस्यश्रीगायत्रीकवचस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामाथर्वाणिच्छंदासि परब्रह्मस्वरूपिणी गायत्री देवता भूः बीजम्, भुवः शक्तिः, स्वः कीलकम्, गायत्रीप्रीत्यर्थं जपे विनि-योगः ॥ वर्णास्त्रां कुंडिकाहस्तां शुद्धनिर्मलज्योति-षीम् ॥ सर्वतत्त्वमयीं वंदे गायत्रीं वेदमातरम् ॥ १ ॥ अथ ध्यानम् ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखै-स्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मि-काम्। गायत्रीं वरदाभयांकुशकशां शूलं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे ॥ १ ॥

ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे । ब्रह्म-विद्या च मे पश्चादुत्तरे मां सरस्वती ॥ १ ॥ पावकी मे दिशं रक्षेत्पावकोज्ज्वलशालिनी । यातुधानीं दिशं रक्षेद्यातुधानगणार्दिनी ॥ २ ॥ पावमानीं दिशं रक्षे-त्पवमानविलासिनी । दिशं रौद्रीमवतु मे रुद्राणी रुद्ररूपिणी ॥३॥ ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा । एवं दश दिशो रक्षेत्सर्वतो भुवनेश्वरी ॥ ४ ॥ ब्रह्मास्त्रस्मरणादेव वाचां सिद्धिः प्रजायते ॥ ब्रह्मद-ण्डश्च मे पातु सर्वशस्त्रास्त्रभक्षकः ॥ ५ ॥ ब्रह्मशीर्ष-स्तथा पातु शत्रूणां वधकारकः । सप्त व्याहृतयः पान्तु सस्वरा बिंदुसंयुताः ॥ ६ ॥ वेदमाता च मां पातु सरहस्या सदैवता । देवीसूक्तं सदा पातु सहस्राक्षरदेवता ॥ ७ ॥ चतुष्षष्टिकला विद्या दिव्याद्या पातु देवता । बीजशक्तिश्च मे पातु पातु विक्रमदे-वता ॥ ८ ॥ तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् । वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च ॥ ९ ॥ देवस्य मे तु हृदयं धीमहीति गलं तथा । धियो मे

पातु जिह्वायां यः पदं पातु लोचने॥१०॥ ललाटे नः पदं पातु मूर्द्धानं मे प्रचोदयात् । तद्वर्णः पातु मूर्द्धानं सकारः पातु भालकम् ॥ ११ ॥ चक्षुषी मे विकारस्तु श्रोत्रं रक्षेत्तुकारकः । नासापुटे वकारो मे रेकारस्तु कपोलयोः ॥ १२ ॥ णिकारस्त्वधरोष्ठे च यकारस्तूत्तरोष्ठके । आस्यमध्ये मकारस्तु गोकारस्तु कपोलयोः ॥ १३ ॥ देकारः कंठदेशे च वकारः स्कंधदेशयोः । स्यकारो दक्षिणं हस्तं धीकारो वामहस्तके ॥ १४ ॥ मकारो हृदयं रक्षेद्धिकारो जठरं तथा । धिकारो नाभिदेशं तु योकारस्तु कटिद्वयम् ॥ १५ ॥ गुह्यं रक्षतुयोकार ऊरू मे नः पदाक्षरम् । प्रकारो जानुनी रक्षेच्चोकारो जंघदेशयोः ॥ १६ ॥ दकारो गुल्फदेशं तु यात्कारः पादयुग्मकम् । जातवेदेति गायत्री त्र्यंबकेति दशाक्षरा ॥ १७ ॥ सर्वतः सर्वदा पातु आपोज्योतीति षोडशी । इदं तु कवचं दिव्यं बाधाशतविनाशनम् ॥१८॥ चतुष्षष्टिकला विद्या सकलैश्वर्य्यसिद्धिदम् । जपारंभे च हृदयं जपांते कवचं पठेत् ॥ १९ ॥

स्त्रीगोब्राह्मणमित्रादिद्रोहाद्यखिलपातकैः । मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति ॥ २० ॥ भूर्जपत्रे लिखित्वैतत्स्वकंठे धारयेद्यदि । शिखायां दक्षिणे बाहौ नानाविद्यानिधिर्भवेत् ॥ २१ ॥ इति विश्वामित्रकल्पोक्तं गायत्रीकवचम् ॥

अथ मुद्राप्रदर्शनप्रकारः ॥ सुमुखं संपुटं चैव विततं विस्तृतं तथा । द्विमुखं त्रिमुखं चैव चतुष्पंचमुखं तथा । षण्मुखाधोमुखं चैव व्यापकांजलिकं तथा । शकटं यमपाशं च ग्रंथितं चोल्मुकोल्मुकम् । प्रलंबं मुष्टिकं चैव मस्त्यः कूर्मो वराहकम् । सिंहाक्रातं माहाक्रान्तंमुद्गरं पल्लवं तथा । एता मुद्रा न जानाति गायत्री निष्फला भवेत् ॥ इति मुद्राप्रदर्शनम् ॥ अथ गायत्रीतर्पणम् ॥ ॐ गायत्र्या विश्वामित्रऋषिः सविता देवता गायत्रीछन्दः गायत्रीतर्पणे विनियोगः॥ ॐ भूः ऋग्वेदपुरुषं तर्पयामि । ॐ भुवः यजुर्वेदपुरुषं तर्पयामि । ॐ स्वः सामवेदपुरुषं तर्पयामि ॐ महः अथर्ववेदपुरुषं० । ॐ जनः इतिहासपुरा-

णपुरुषं० । ॐ तपः सर्वागमपुरुषंत० । ॐ सत्यं सत्यलोकपुरुषं त० ॐ भूः भूर्लोकपुरुषं० । ॐ भुवः भुवर्लोकपुरुषं० । ॐ स्वः स्वर्लोकपुरुषं० । ॐ भूः एकपदां गायत्रीं तर्पयामि । ॐ भुवः द्विपदां गायत्रीं त० । ॐ स्वः त्रिपदां गायत्रीं तर्प० । ॐ भूर्भुवः स्वः चतुष्पदां गायत्रीं त० । ॐ उषसीं तर्प० । ॐ गायत्रीं तर्प० । ॐ सावित्रीं तर्प० । ॐ सरस्वतीं तर्प० । ॐ वेदमातरं तर्प० । ॐ पृथिवीं तर्प० । ॐ अजां तर्प० । ॐ कौशिकीं तर्प० । ॐ सांकृतिं तर्प० । ॐ सर्वंजितं तर्प० । ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति गायत्रीतर्पणम् ॥

अथ वेदोक्ताः सबीजा नवग्रहमन्त्राः । आचम्य प्राणानायम्य (सङ्कल्पः) अद्य पूर्वोच्चारित एवंगुणविशेषणविशिष्ट शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम जन्मराशेःस काशाद्विरुद्धचतुर्थाष्टमद्वादशादिस्थानस्थित मुकग्रहपीडापरिहारद्वारा एकादशस्थानस्थितवत् उत्तमफलप्राप्त्यर्थम् अमुकग्रहस्य होमं स्तुतिं जपं वा करिष्य इति संकल्प्य

पूजार्थं सूर्यादिनवग्रहमण्डलमिदम् ।

बुध ४	शुक्र	चंद्र २
गुरु ५	१ सूर्यमंडल.	मंगल २
केतु. ९	शनैश्वर. ७	राहु ८

पूजनार्थं
मंगलयन्त्रमिदम्.
१२ ॐ कुजाय नमः
११ ॐ धरात्मजाय नमः
१३ ॐ रक्ताय नमः
१४ ॐ भूमि-पुत्राय नमः
९ ॐ लोहितांगाय नमः
१० ॐ सामगानां कृपाकराय न.
८ ॐ लोहिताय नमः
१५ ॐ भूमिदाय नमः
१६ ॐ अंगारकाय नमः
६ ॐ महाकायाय नमः
७ ॐ सर्वकामविरोधकाय नमः
५ ॐ मंगलायनमः
१७ ॐ यमायनमः
१८ ॐ सर्वरोगप्रहारिणे नमः
१ ॐ स्थिरासनाय नमः
४ ॐ धनप्रदाय नमः
३ ॐ ऋणहर्त्रे नमः
२ ॐ भूमिपुत्रायनमः
२१ ॐ सर्वकामफलप्रदाय नमः
१९ ॐ वृष्टिकर्त्रे नमः
२० ॐ प्रहर्त्रे नमः

वर्त्तुलमण्डलादिषु सूर्यादीन्संपूज्य जपादिकं कुर्यात् ॥ तत्रादित्यमंत्रः ॥ आकृष्णेनेतिमंत्रस्य हिरण्यस्तूपाङ्गिरसऋषिः सूर्यो देवता, त्रिष्टुप्छंदः सूर्यप्रीतये सूर्यमंत्रजपे विनियोगः ॥ ॐ ह्रां ह्रीं ह्रौं सः ॐ भूर्भुवः स्वः ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॐ स्वः भुवः भूः ॐ सः ह्रौं ह्रीं ह्रां ॐ सूर्याय नमः ॥ जपसंख्या ७००० कलौ तु २८००० ॥ १ ॥ सोममंत्रः ॥ इमं देवा इतिमंत्रस्य वरुण ऋषिः अग्निर्देवता सोमप्रीतये सोममंत्रजपे वि० ॥ ॐ श्राँ श्रीं श्रौं सः ॐ भूर्भुवः स्वः ॐ इमन्देवाऽअसपत्नर्ठ॑सुवध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्माकम्ब्राह्मणानार्ठ॑राजा ॐ स्वः भुवः भूः ॐ सः श्रौं श्रीं श्राँ ॐ सोमाय नमः ॥ जपसंख्या ११००० कलौ ४४००० ॥ २ ॥

भौममन्त्रः॥अग्निर्मूर्द्धाइति मंत्रस्य विरूपाङ्गिरसऋषिः अग्निर्देवतागायत्रीछन्दः भौमप्रीतयेंभौममंत्रजपेविनि-योगः। ॐ क्राँ क्रीं क्रौं सः ॐभूर्भुवः ॐस्वः अग्निर्मूर्द्धा-दिवं÷ककुत्त्पतिं÷पृथिव्व्याऽअयम् ॥ अपाᳬरेताᳬ-सिजिन्न्वति ॥ ॐ स्वः भुवः भूः ॐ सः क्रौं क्रीं क्राँ ॐ भौमाय नमः॥ जप १०००० कलौ४०००० ॥३॥ बुधमन्त्रः ॥ उद्बुध्य इति मंत्रस्य परमेष्ठि ऋषिः बुधो देवता त्रिष्टुप्छंदः बुधप्रीतये बुधमंत्रजपे विनि-योगः॥ ॐ ब्राँ ब्रीं ब्रौं सः ॐ भूर्भुवःस्वः ॐ उद्बु-द्ध्यस्वाग्नेत्प्रतिंजागृहित्त्वमिष्टापूर्त्तेसᳬसृंजेथामयञ्च । अस्स्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्स्मिन्न्विश्श्वेदेवायजमा-नश्चसीदत ॥ ॐ स्वः भुवः भूः ॐ सः ब्रौं ब्रीं ब्राँ ॐ बुधाय नमः ॥जपसं ०४००० कलौ१६००० ॥४॥ बृहस्पतिमंत्रः ॥ बृहस्पत इति मंत्रस्य गृत्समद ऋषिः ब्रह्मा देवता त्रिष्टुप्छंदः बृहस्पतिप्रीतये बार्हस्पत्य-मंत्रजपे वि० ॥ ॐ ह्राँ ह्रीं ह्रौं सः ॐ भूर्भुवःस्वः

बृहस्पतेऽअतियदुर्य्योऽअर्हांद्युमद्विभातिक्रतुमुज्जनेषु यद्दीदयुच्छवसऽऋतप्प्रजाततदुस्मासुद्रविणन्धेहिचि-त्रम् ॥ ॐ स्वः भुवः भूः ॐ सः ह्रौं ह्रीं ह्राँ ॐ बृह-स्पतये नमः॥ जप० १९००० कलौ ७६००० ॥५॥ शुक्रमन्त्रः ॥ अन्नात्परिश्रुत इति मंत्रस्य प्रजापति-ऋषिः अश्विसरस्वतीन्द्रादेवताः जगती छंदः शुक्र-प्रीतये शुक्रमंत्रजपे विनियोगः ॥ ॐ द्राँ द्रीं द्रौं सः ॐ भूर्भुवः स्वः ॐ अन्नात्परिश्रुतोरसुम्ब्रह्मणाव्व्यु-पिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेनसत्यमि-न्द्रियंविपानंठंशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृ-तम्मधु ॥ ॐ स्वः भुवः भूः ॐ सः द्रौं द्रीं द्राँ ॐ शुक्राय नमः ॥ जप० ११००० कलौ-४४००० ॥ ६ ॥ शनिमंत्रः ॥ शन्नोदेवीरिति मंत्रस्य दध्यङ्ङाथर्वण ऋषि आपो देवता गायत्री छंदः शनिप्रीतये शनिमंत्रजपे० ॥ ॐ खाँ खीं खौं सः ॐ भूर्भुवः स्वः शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये

शय्योरभिस्त्रवन्तुनः॥ॐ स्वः भुवः भूः ॐ सः खौं खीं खाँ ॐ शनैश्चराय नमः॥ जप० २३००० क९२००० ॥ ७ ॥ राहुमंत्रः ॥ कयानश्चित्र इति मन्त्रस्य वामदेव ऋषिः राहुर्देवता गायत्रीछंदः राहुप्रीतये राहुमंत्रजपे वि० ॥ ॐ भ्राँ भ्रीं भ्रौं सः ॐ भूर्भुवः स्वः ॐ कयानश्चित्रऽआभुवदूतीसदावृधः॥सखाकयाशचिंष्ठयावृता ॐ स्वः भुवः भूः ॐ सः भ्रौं भ्रीं भ्राँ ॐ राहवे नमः॥ जप० १८००० क० ७२००० ॥ ८ ॥ केतुमन्त्रः ॥ केतुंकृण्वन्निति मंत्रस्य मधुच्छंदा ऋषिः केतुर्देवता गायत्री छंदः केतुप्रीतये केतुमंत्रजपे विनियोगः ॐ प्राँ प्रीं प्रौं सः ॐ भूर्भुवः स्वः ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ॐ स्वः भुवः भूः ॐ सः प्रौं प्रीं प्राँ ॐ केतवे नमः ॥ जपसंख्या १७००० कलौ ६८००० ॥९॥ अर्पणम्॥ अनेन अमुकग्रहमंत्रजपकर्मणा अमुकग्रहरूपी परमेश्वरः प्रीयतां न मम इति वेदोक्ताः सबीजा नवग्रहमन्त्राः ॥

अथ नवग्रहमङ्गलाष्टकम्॥भास्वान्काश्यपगोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः षट्त्रिस्थो दशशोभनो गुरुशशीभौमेषु मित्रं सदा ॥ शुक्रो मंदरिपुः कलिंगजनितश्चाग्नीश्वरौ देवते मध्ये वर्तुलपूर्वदिग्दिनकरः कुर्यात्सदा मङ्गलम् ॥ १ ॥ चन्द्रः कर्कटकप्रभुः सितनिभश्चात्रेयगोत्रोद्भवश्चाग्नेयश्चतुरस्रवारुणमुखश्चापोप्युमाधीश्वरः ॥ षट्सप्ताग्निदशैकशोभनफलो ज्ञोरिः प्रियोऽर्कोगुरुः स्वामी यामुनदेशजो हिमकरः कुर्यात्सदा मं० ॥ २ ॥ भौमो दक्षिणदिक्त्रिकोणयमदिग्विघ्नेश्वरो रक्तभः स्वामी वृश्चिकमेषयोः सुरगुरुश्चार्कः शशी सौहृदः ॥ ज्ञोरिः षट्त्रिफलप्रदश्च वसुधास्कंदौ क्रमाद्देवते भारद्वाजकुलोद्भवः क्षितिसुतः कुर्या० ॥३॥ ॥सौम्योदङ्मुखपीतवर्णमगधश्चात्रेयगोत्रोद्भवो बाणेशानदिशः सुहृच्छनिभृगुः शत्रुःसदा शीतगुः ॥कन्यायुग्मपतिर्दशाष्टचतुरः षण्नेत्रकः शोभनो विष्णुः पौरुषदेवते शशिसुतः कुर्या० ॥ ४ ॥ जीवश्चाङ्गिरगोत्रजोत्तरमुखो दीर्घोत्तरासंस्थितः पीतोऽश्वत्थसमिच्चसिं-

धुजनितश्चापोऽथ मीनाधिपः ॥ सूर्येंदुक्षितिजप्रियो बुधसितौ शत्रू समाश्चापरे सप्ताङ्कद्विभवःशुभःसुरगुरुः कुर्या० ॥५॥शुक्रो भार्गवगोत्रजः सितनिभः प्राचीमुख पूर्वदिक्पञ्चाङ्कोवृषभस्तुलाधिपमहाराष्ट्राधिपोदुम्बरः॥ इंद्राणीमघवानुभौ बुधशनी मित्रार्कचंद्रौ रिपू षष्ठोद्वि-र्दशवर्जितो भृगुसुतः कुर्या० ॥६ ॥ मंदः कृष्णनिभ-स्तु पश्चिममुखः सौराष्ट्रकः काश्यपः स्वामी नक्रभकुंभ योर्बुधसितौ मित्रे समश्चाङ्गिराः ॥ स्थानं पश्चिमदि-क् प्रजापतियमौ देवौ धनुष्यासनः षट्त्रिस्थः शुभ-कृच्छनी रविसुतः कुर्यात्सदा मंगलम् ॥ ७ ॥ राहुः सिंहलदेशजश्च निर्ऋतिः कृष्णांगशूर्पासनो यः पैठी-नसिगोत्रसंभवसमिद्दूर्वामुखो दक्षिणः ॥ यः सर्प्पाद्य-धिदैवते च निर्ऋतिः प्रत्याऽधिदेवः सदा षट्त्रिस्थः शुभकृच्च सिंहिकसुतः कार्यात्सदामंगलम् ॥ ८ ॥ के-तुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणे स्थितः चि-त्रांगध्वजलांछनो हिमगुहा यो दक्षिणाशामुखः॥ब्रह्मा चैव सचित्रचित्रसहितः प्रत्याधिदेवः सदा षट्त्रिस्थः

शुभकृच्च बर्बरपतिः कुर्यात्सदा मंगलम् ॥ ९॥ इत्येत द्ग्रहमंगलाष्टकमिदं लोकोपकारप्रदं पापौघप्रशमं मह- च्छुभकरं सौभाग्यसंवर्धनम् ॥ यः प्रातः शृणुयात्प- ठत्यनुदिनं श्रीकालिदासोदितं स्तोत्रं मङ्गलदायकं शुभकरं प्राप्नोत्यभीष्टं फलम् ॥॥ १० ॥ इति नव- ग्रहमंगलाष्टकानि ॥

अथ महामृत्युञ्जयजपविधिः॥ आचम्य प्राणाना- यम्य देशकालौ संकीर्त्य॥ ॐ मम आत्मनः श्रुतिस्मृ- तिपुराणोक्तफलप्राप्त्यर्थं (अमुकयजमानस्य वा) शरीरेऽमुकपीडानिरासद्वारा सद्यः आरोग्यप्राप्त्यर्थं श्रीमहामृत्युञ्जयदेवताप्रीतये अमुकसंख्यापरिमितं श्रीमहामृत्यंजयमंत्रजपमहं करिष्य इति संकल्प्य शिवपूजां कृत्वा जपं कुर्यात्॥अथ ऋष्यादिन्यासः॥ ॐ अस्य श्रीमहामृत्युंजयमंत्रस्य वसिष्ठ ऋषि श्रीमृत्युंजयरुद्रो देवता अनुष्टुप्छन्दः हौं बीजं जूं शक्तिः सः कीलकं मृत्युञ्जयप्रीत्यर्थं जपे विनियोगः ॥ ॐ वसिष्ठर्षये नमः शिरसि। ॐ अनुष्टुप्छन्दसे नमो

मुखे ॐ श्रीमहामृत्युंजयरुद्रदेवतायै नमो हृदये । ॐ हौं बीजाय नमो गुह्ये । ॐ जूं शक्तये नमः पादयोः । ॐ सः कीलकाय नमः सर्वाङ्गेषु ॥ अथ कराङ्गन्यासः ॥ ॐ त्र्यंबकं अङ्गुष्ठाभ्यां नमः । ॐ यजामहे तर्जनीभ्यां नमः । ॐ सुगंधिं पुष्टिवर्द्धनं मध्यमाभ्यां नमः।ॐ उर्व्वारुकमिव बंधनात् अनामिकाभ्यां नमः। ॐ मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः । ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः । एवं हृदयादिन्यासः ॥ (ध्यानम्) चन्द्रोद्भासितमूर्धजं सुरपतिं पीयूषपात्रं महद्धस्ताब्जेन दधत्सुदिव्यममलं हास्यास्यपङ्केरुहम् ॥ सूर्येन्द्वग्निविलोचनं करतलैः पाशाक्षसूत्राङ्कुशांभोजं बिभ्रतमक्षयं पशुपतिं मृत्युंजयं तं स्मरे ॥ १॥ हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतंमृगाक्षवलये द्वाभ्यांवहंतंपरम् ॥ अंकन्यस्तकरद्वयामृतघटं कैलासकांतं शिवं स्वच्छां-भोजगतं नवेंदुमुकुटं देवं त्रिनेत्रं भजे ॥ २ ॥ इति ध्यात्वा । ॐ लं पृथिव्यात्मकं गंधं समर्पयामि १ ।

ॐ हं आकाशात्मकं पुष्पं सम०२। ॐ यं वाय्वात्मकं धूपं स० ३। ॐ रं तेजोरूपं दीपं सम० ४। ॐ वं अमृतात्मकं नैवेद्यं स० ५। ॐ सं सर्वात्मकं मंत्रपुष्पं समर्पयामि६ ॥ एवं मानसोपचारैः सम्पूजयेत्॥ (मन्त्रोद्धारः) ॐ ह्रौं जूं सः ॐ भूर्भुवःस्वः ॐ त्र्यंबकं यजामहेसुगंधिंपुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात्ॐस्वःभुवः भूः ॐ सः जूं ह्रौं ॐ। (इति पंचाशद्वर्णात्मको मंत्रो मंत्रमहोदधौ)। तत उत्तरन्यासं कृत्वा। गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ १ ॥मृत्युंजय महारुद्र त्राहि मां शरणागतम्॥ जन्ममृत्युजरारोगैः पीडितं कर्मबंधनैः ॥ २ ॥ इति प्रार्थ्य अनेन महामृत्युंजयजपाख्येन कर्मणा श्रीमहामृत्युंजयः प्रीयतामित्यर्पयेत् ॥ ततो जपसाङ्गतासिद्ध्यर्थं यथाकामनया द्रव्येण दशांशहोमतर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ अथ शुक्रोपासितमृतसंजीवनीमंत्रस्तंत्रसारे ॥ ॐ तत्सवितुर्वरेण्यं त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं भर्गो देवस्य धीमहि

उर्व्वारुकमिव बंधनात् धियो योनः प्रचोदयात् मृत्यो र्मुक्षीयमामृतात् इति मंत्रः ॥ इतिमृत्युंजयजपः ॥

अथ महामृत्युञ्जयकवचम्॥ श्रीभैरव उवाच॥ शृणुष्व परमेशानि कवचं मन्मुखोदितम्॥महामृत्युञ्जयस्यास्य न देयं परमाद्भुतम्॥१॥ यं धृत्वा च पठित्वाच यं श्रुत्वा कवचोत्तमम् ॥ त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि ॥२॥तदेव वर्णयिष्यामि तव प्रीत्या वरानने । तथापि परमं तत्त्वं न दातव्यं दुरात्मने ॥३॥ॐअस्य श्रीमहामृत्युञ्जयकवचस्य श्रीभैरवऋषिर्गायत्री छंदः श्रीमृत्युञ्जयरुद्रो।देवता ॐ बीजं जूं शक्तिः सः कीलकं हौमिति तत्त्वं श्रीचतुर्वर्गफलसाधनार्थं पाठे विनियोगः ॥ चंद्रमण्डलमध्यस्थे रुद्रमाले विचित्रिते ॥ तत्रस्थं चिन्तयेत्साध्यं मृत्युं प्राप्तोपि जीवति ॥ १ ॥ ॐ जूं सः हौं शिरः पातु देवो मृत्युंजयो मम । श्रीशिवो वै ललाटं च ॐ हौं भ्रुवौ सदाशिवः ॥ २ ॥ नीलकण्ठोऽवतान्नेत्रे कपर्दी मेऽवताच्छ्रुती । त्रिलोचनोऽवताद्गण्डौ नासां मे त्रिपुरांतकः ॥३॥ मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः । हनुं मे हाट-

केशानो मुखं बटुकभैरवः ॥ ४ ॥ कंधरां कालमथनो गलं गणप्रियोऽवतु । स्कंधौ स्कंदपिता पातु हस्तौ मे गिरिशोऽवतु ॥ ५ ॥ नखान्मे गिरिजानाथः पायादङ्गुलिसंयुतान् ॥ स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम ॥ ६ ॥ कुक्षिं कुबेरवरदः पार्श्वौ मे मारशासनः । शर्वः पातु तथा नाभिं शूली पृष्ठं ममाऽवतु ॥ ७ ॥ शिश्नं मे शंकरः पातु गुह्यं गुह्यकवल्लभः । कटिं कालान्तकः पायादूरू मेऽधकघातकः ॥ ८ ॥ जागरूकोऽवताज्जानू जंघे मे कालभैरवः । गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु ॥ ९ ॥ पादादिमूर्द्धपर्यन्तं सद्योजातो ममावतु । रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः ॥ १० ॥ पूर्वे बलविकरणो दक्षिणे कालशासनः । पश्चिमे पार्वतीनाथ उत्तरे मां मनोमनः ॥ ११ ॥ ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः । नैर्ऋत्यां शंभुरव्यान्मां वायव्यां वायुवाहनः ॥ १२ ॥ ऊर्ध्वे बलप्रमथनः पाताले परमेश्वरः । दशदिक्षु सदा पातु महामृत्युञ्जयश्च माम् ॥ १३ ॥ रणे राजकुले द्यूते विषमे प्राणसंशये । पायादों जुं

महारुद्रो देवदेवो दशाक्षरः ॥ १४ ॥ प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु । सायं सर्वेश्वरः पातु निशायां नित्यचेतनः ॥ १५ ॥ अर्द्धरात्रे महादेवो निशान्ते मां महोदयः । सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः ॥ १६ ॥ इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम् । सर्वमन्त्रमयं गुह्यं सर्वतंत्रेषु गोपितम् ॥ १७ ॥ पुण्यं पुण्यप्रदं दिव्यं देवदेवाधिदैवतम् । य इदं च पठेन्मंत्रं कवचं वाचयेत्ततः ॥ १८ ॥ तस्य हस्ते महादेवि त्र्यंबकस्याष्टसिद्धयः । रणे धृत्वा चरेद्युद्धं हत्वा शत्रूञ्जयं लभेत् ॥ १९ ॥ जयं कृत्वा गृहं देवि सप्राप्स्यति सुखं पुनः ॥ महाभये महारोगे महामारीभये तथा ॥ २० ॥ दुर्भिक्षे शत्रुसंहारे पठेत्कवचमादरात् ॥ सर्वं तत्प्रशमं याति मृत्युंजयप्रसादतः ॥ २१ ॥ धनं पुत्रान्सुखं लक्ष्मीमारोग्यं सर्वसंपदः ॥ प्राप्नोति साधकः सद्यो देवि सत्यं न संशयः ॥ २२ ॥ इतीदं कवचं पुण्यं महामृत्युंजयस्यतु ॥ गोप्यं सिद्धिप्रदं गुह्यं गोपनीयं स्वयोनिवत् ॥ २३ ॥ इति श्रीमहामृत्युञ्जयकवचम् ॥

अथ संतानगोपालमंत्रस्य नारदऋषिः । अनुष्टुप्छंदः । श्रीगोपालो देवता । मम (यजमानस्य वा) संतानगोपालप्रसादसिद्ध्यर्थं जपे विनियोगः ॥ ॐ देवकीसुत गोविंद अङ्गुष्ठाभ्यां नमः ॥ ॐ वासुदेव जगत्पते तर्जनीभ्यां नमः ॥ ॐ देहि मे तनयं कृष्ण मध्यमाभ्यां नमः ॥ ॐ त्वामहं शरणं गतः अनामिकाभ्यां नमः ॥ ॐ देवकीसुत गोविंद वासुदेव जगत्पते कनिष्ठिकाभ्यां नमः ॥ ॐ देहि मे तनयं कृष्ण त्वामहं शरणं गतः करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादिपंचांगन्यासः ॥ अथ ध्यानम् ॥ ॐ वैकुण्ठतेजसा दीप्तं अर्जुनेन समन्वितम् । समर्पयंतं विप्राय नष्टानानीय बालकान् ॥ १ ॥ मंत्रोद्धारः ॥ ॐ देवकीसुत गोविंद वासुदेव जगत्पते । देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ १ ॥ (मंत्रमहोदधौ) लक्षं जपोऽयुतं होमस्तिलैर्मधुरसंयुतैः । अर्चा पूर्वोदिता चैवं मंत्रः पुत्रप्रदो नृणाम् ॥ १ ॥ इति मूलमन्त्रः इति संतानगोपालमंत्रजपविधिः समाप्तः ॥

॥ श्रीः ॥

अथ अभिलाषाष्टकस्तोत्रम् ।

विश्वानर उवाच ।

एकं ब्रह्मैवाद्वितीयं समस्तं सत्यंसत्यं नेह नानाऽस्ति किंचित् ॥ एको देवो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम् ॥ १ ॥ एकः कर्ता त्वं हि सर्वस्य शंभो नानारूपोऽप्येकरूपोऽप्यरूपः ॥ यद्वत्प्रत्यम्ब्वर्क एकोऽप्यनेकस्तस्मान्नान्यं त्वां विनेशं प्रपद्ये ॥ २ ॥ रज्जौ सर्पः शुक्तिकायां च रूप्यं नैरः पूरस्तन्मृगाख्ये मरीचौ ॥ यद्वत्तद्वद्विश्वगेष प्रपञ्चो यस्मिञ्ज्ञाते तं प्रपद्ये महेशम् ॥ ३ ॥ तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ॥ पुष्पे गन्धो दुग्धमध्ये च सर्पिर्यत्तच्छंभो त्वं ततस्त्वां प्रपद्ये ॥ ४ ॥ शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्रेरघ्राण-

स्त्वं व्यङ्घ्रिरायासि दूरात् ॥ व्यक्षः पश्येस्त्वं रसज्ञोऽप्यजिह्वः कस्त्वां सम्यग्वेत्त्यतस्त्वां प्रपद्ये ॥५॥ नो वेदस्त्वामीश साक्षाद्धि वेद नो वा विष्णुर्नो विधाताऽखिलस्य ॥ नो योगीन्द्रा नेंद्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥ ६ ॥ नो ते गोत्रं नापि जन्मापि नाऽऽख्या नो वा रूपं नैव शीलं न देशः ॥ इत्थंभूतोऽपीश्वरस्त्वं त्रिलोक्याः सर्वान्कामान्पूरयेस्तद्भजे त्वाम् ॥ ७ ॥ त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोऽतिशान्तः ॥ त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तत्किं यत्त्वं नास्यतस्त्वां नतोऽस्मि ॥ ८ ॥ स्तुत्वेति भूमौ निपपात विप्रः स दण्डवद्यावदतीव हृष्टः ॥ तावत्स बालोऽखिलवृद्धवृद्धः प्रोवाच भूदेव वरं वृणीहि ॥ ९ ॥ तत उत्थाय हृष्टात्मा मुनिर्विश्वानरः कृती ॥ प्रत्यब्रवीत्किमज्ञातं सर्वज्ञस्य तव प्रभो ॥ १० ॥ सर्वान्तरात्मा भगवान्सर्वः सर्वप्रदो भवान् ॥ याञ्चां प्रति नियुंक्ते मां किमीशे दैन्यकारि-

णीम् ॥ ११ ॥ इति श्रुत्वा वचस्तस्य देवो विश्वानरस्य ह ॥ शुचेः शुचिव्रतस्याथ शुचि स्मित्वाऽब्रवीच्छुचिः ॥१२ ॥ बाल उवाच॥त्वया शुचेः (चे) शुचिष्मत्यां योऽभिलाषः कृतो हृदि ॥ अचिरेणैव कालेन स भविष्यत्यसंशयम् ॥१३॥ तवपुत्रत्वमेष्यामि शुचिष्मत्यां महामते ॥ ख्यातो गृहपतिर्नाम्नाशुचिः सर्वामरप्रियः ॥ १४ ॥ अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्त्वयेरितम् ॥ अब्दं त्रिकालपठनात्कामदं शिवसन्निधौ ॥ १५ ॥ एतत्स्तोत्रस्य पठनं पुत्रपौत्रधनप्रदम् ॥ सर्वशान्तिकरं वाऽपि सर्वापत्परिनाशनम् ॥ १६ ॥ स्वर्गापवर्गसंपत्तिकारकं नात्र संशयः ॥ प्रातरुत्थाय सुस्नातो लिङ्गमभ्यर्च्य शांभवम् ॥१७॥ वर्षं जपन्निदंस्तोत्रमपुत्रःपुत्रवान्भवेत्॥वैशाखे कार्तिके माघे विशेषनियमैर्युतः ॥ १८ ॥ यः पठेत्स्नानसमये लभते सकलं फलम् ॥ कार्तिकस्य तु मासस्य प्रसादादहमव्ययः ॥ १९ ॥ तव पुत्रत्वमेष्यामि यस्त्वन्यस्तत्पठिष्यति ॥ अभिलाषाष्टकमिदं न देयं

यस्य कस्यचित् ॥ २० ॥ गोपनीयं प्रयत्नेन महा वन्ध्याप्रसूतिकृत् ॥ स्त्रिया वा पुरुषेणापि नियमाल्लिंगसन्निधौ ॥ २१ ॥ अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र संशयः ॥ इत्युक्त्वाऽन्तर्दधे बालः सोऽपिविप्रो गृहं गतः ॥ २२ ॥

इति श्रीस्कंदपुराणे काशीखंडे अभिलाषाष्टकस्तोत्रं समाप्तम् ॥

॥ श्रीः ॥

अथ मंगलव्रतविधिः ।

तत्र आदौ मंगलमंत्रविधानम् ॥ ॐ अस्य श्रीमंगलषडक्षरमन्त्रस्य विरूपाक्ष ऋषिः, गायत्रीछंदः, धरात्मजो देवता, हां बीजम्, हं शक्तिः, चिरजीविगुणवत्पुत्रप्राप्तये जपे विनियोगः । ॐ विरूपाक्षऋषये नमः शिरसि । गायत्रीछन्दसे नमो मुखे । श्रीधरात्मजदेवतायै नमो हृदि । हां बीजाय नमो गुह्ये । हं शक्तये नमः पादयोः । विनियोगाय नमः सर्वांगे इति ऋष्यादिन्यासः । ॐ अंगुष्ठाभ्यां नमः । हां तर्जनीभ्यां नमः । हं मध्यमाभ्यां नमः । सः अनामिकाभ्यां नमः । खं कनिष्ठिकाभ्यां नमः । खः करतलकरपृष्ठाभ्यां नमः । इति करन्यासः। ॐ हृदयाय नमः । ह्रां शिरसे स्वाहा । हं शिखायै वषट् । सः कवचाय हुं । खं नेत्रत्रयाय वौषट् । खः अस्त्राय

फट् । इति हृदयादिन्यासः ॥ एवं न्यासं कृत्वा । जपाभं शिवस्वेदजं हस्तपद्मैर्गदाशूलशक्तीर्वरं धारयन्तम् ॥ अवन्तीसमुत्थं सुमेषासनस्थं धरानन्दनं रक्तवस्त्रं समीडे ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य यथाशक्ति (एकमालां) मूलमन्त्रं जपित्त्वा । "गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ॥ " इति मन्त्रेण जपं निवेद्य बाह्यपूजामारभेत । तथाहि । मं मंडूकाय नमः । कां कालाग्निरुद्राय नमः । आं आधारशक्तये नमः । कूं कूर्म्माय नमः । पृं पृथिव्यै नमः । सुं सुधासमुद्राय नमः । श्वें श्वेतद्वीपाय नमः । कं कल्पद्रुमाय नमः । मं मणिहर्म्म्याय नमः । हें हेमपीठाय नमः । (पूर्वादिषु) धं धर्म्माय नमः । ज्ञां ज्ञानाय नमः वैं वैराग्याय नमः । ऐं ऐश्वर्याय नमः । (आग्नेयादिषु) अं अधर्म्माय नमः । अं अज्ञानाय नमः । अं अवैराग्याय नमः । अं अनैश्वर्याय नमः । (मध्ये) अं अनंताय

नमः । तं तत्त्वपद्माय नमः । आं आनंदकन्दाय नमः । सं संविन्नालाय नमः । विं विकारमयकेशरेभ्यो नमः । पं प्रकृत्यात्मकपत्रेभ्यो नमः । पं पंचाशद्वर्णात्मककर्णिकायै नमः । सूं सूर्यमण्डलाय नमः । इं इंदुमण्डलाय नमः । पां पावकमंडलाय नमः । सं सत्त्वाय नमः । रं रजसे नमः । तं तमसे नमः अं अंतरात्मने नमः ।पं परमात्मने नमः।ज्ञां ज्ञानात्मने नमः। मां मायातत्त्वाय नमः । कं कलातत्त्वाय-नमः । विं विद्यातत्त्वाय नमः । पं परतत्त्वाय नमः । इति पीठदेवताः संपूज्य ॥ वामायै नमः । ज्येष्ठायै नमः । रौद्र्यै नमः । काल्यै नमः । कलविकरिण्यै नमः। बलविकरिण्यै नमः। बलप्रमाथिन्यै नमः । सर्वभूतदमिन्यै नमः । मनोन्मनन्यै नमः। इति नवपीठशक्तीः पूर्वाद्यष्टदिक्षु मध्ये च संपूज्य मूलमंत्रेण भौममावाहनस्थापनाऽऽसनसन्निधापनसन्निरोधनसम्मुखीकरणसकलीकरणाऽवगुंठनाऽमृतीकरणपरमीकरणस्वागतसुस्वागतपाद्याऽर्घ्याऽऽचमनमधुपर्कस्नान

यज्ञोपवीतवस्त्रगंधपुष्पैःसंपूज्य (आग्नेय्यादिषु दिक्षु) हृदयाय नमः । शिखायै वषट् । कवचाय हुम् । नेत्र-त्रयाय वौषट् । अस्त्राय फट् । इत्यंगानि संपूज्य । "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनमिति" मंत्रेण निवेद्य (एकविंशतिकोष्ठेषु) ॐ मंगलाय नमः १ ॥ ॐ भूमिपुत्राय नमः २॥ ॐ ऋणहर्त्रे नमः ३ ॥ ॐ धन-प्रदाय नमः४ ॥ ॐ स्थिरासनाय नमः ५ ॥ ॐ महा-कायाय नमः ६ ॥ ॐ सर्वकर्म्मावरोधकाय नमः ७ ॥ ॐ लोहिताय नमः ८ ॥ ॐ लोहिताक्षाय नमः ९ ॥ ॐ सामगानां कृपाकराय नमः १०॥ ॐ धरात्मजाय नमः ११ ॥ ॐ कुजाय नमः १२ ॥ ॐ भौमाय नमः १३ ॥ ॐ भूतिदाय नमः १४ ॥ ॐ भूमिनंद-नाय नमः १५ ॥ ॐ अंगारकाय नमः १६ ॥ ॐ यमाय नमः १७ ॥ ॐ सर्वरोगापहारकाय नमः १८॥ ॐ वृष्टिकर्त्रे नमः १९ ॥ ॐ वृष्टिहर्त्रे नमः २० ॥ ॐ सर्वकामफलप्रदाय नमः २१ ॥ इति नाममन्त्रै-

मंगलादीन् संपूज्य ॥ अभीष्टसिद्धिमिति मन्त्रेण द्वितीयावरणं निवेद्य (यथार्थपूर्वादिषु) ॐ इन्द्राय नमः । ॐ अग्नये नमः । ॐ यमाय नमः । ॐ निर्ऋतये नमः।ॐवरुणाय नमः।ॐ वायवे नमः ॐ सोमाय नमः।ॐईशानाय नमः।ॐ ब्रह्मणे नमः ॐ अनन्ताय नमः । इतीन्द्रादीन् संपूज्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनमिति"मंत्रेण तृतीयावरणं निवेद्य ॥ ॐ वज्राय नमः । ॐ शक्तये नमः । ॐ दंडाय नमः । ॐ खड्गाय नमः । ॐ पाशाय नमः । ॐ अंकुशाय नमः । ॐ गदायै नमः । ॐ त्रिशूलाय नमः । ॐ पद्माय नमः । ॐ चक्राय नमः । इति वज्रादीन् संपूज्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनमिति"मन्त्रेण चतुर्थावरणं निवेद्य मूलं भौमाय सांगाय सावरणाय सशक्तिकाय धूपं दीपं नैवेद्यमारार्त्तिकं निवेद्य यथाशक्ति मंत्रं जपेत् जपांते " गुह्यातिगुह्यगोप्ता

त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः" इति मंत्रेण देवदक्षकरे निवेदयेत् ॥ षड्लक्षं जपः । तद्दशांशः खदिरकाष्ठेन होमः । तद्दशांशं (मूलं भौमं तर्पयामि नमः) इति मन्त्रेण तर्पणम् । तद्दशांशं (मूलं भौमं मार्जयामि नमः) इति मंत्रेण मार्जनम् । तद्दशांश ब्राह्मणभोजनम् ॥ इत्थं मन्त्रे सिद्धे स्वेष्टप्रयोगान् कुर्यात् ॥

अथ व्रतविधानम् ।

मार्गशीर्षे वैशाखे वा शुद्धपक्षे प्रथमे मंगले व्रतारम्भः । तत्र अरुणोदय उत्थाय आवश्यकं कृत्वा हस्तपादप्रक्षालनं कृत्वा अपामार्गसमिधादंतधावनं कृत्वा मौनव्रती नद्यादिजले स्नात्वा रक्तवस्त्रद्वयं धृत्वा नैवद्यपुष्पचंदनानि संपाद्य विधिज्ञं ब्राह्मणम् आहूय तदाज्ञया भौमं पूजयेत ।

(मार्गशीर्ष वा वैशाखके शुक्लपक्षके पहिले मंगलसे व्रतका आरंभ करे । पीले बादल होये उठकर जंगल जायकर हाथ पांव धोकर ऊंगेका दातन करे । मौन राखे, न-

दी वा कूवे वा घरपर स्नान करके लाल दोय वस्त्र धारण करे । नैवेद्य पुष्प चन्दन लाल वर्णका पूजावास्ते लेवे । विधिके जाननेवाले ब्रह्मणको बुलायके उसकी आज्ञासे मंगलकी पूजाकरे । गौरी गायके गोबरसे चौका लगायाकर उसमें आसन बिछायकर बैठे) ॐ अद्येत्यादि अमुकगोत्रामुकनाम्नी चिरजीवीगुणवत्पुत्रप्राप्तये मंगलव्रतं तदंगं पूजनं च करिष्ये इति संकल्प्य गणपतिपूजनं स्वस्तिवाचनं मातृकापूजनं कृत्वा मंगलं पूजयेत् (मंगलादिनामोंका अंगन्यास करे) ॐ मंगलाय नमः अंगयोः । ॐ भूमिपुत्राय नमः जानुनोः । ॐ ऋणहर्त्रे नमः ऊर्वोः ॐ धनप्रदाय नमः कट्योः । ॐ स्थिरासनाय नमः गुह्ये । ॐ महाकायाय नमः उरसि । ॐ सर्वकर्मावरोधकाय नमः वामबाहौ । ॐ लोहिताय नमः दक्षिणबाहौ । ॐ लोहिताक्षाय नमः गले । ॐ सामगानां कृपाकराय नमः मुखे । ॐ धरात्मजाय नमः नासिकयोः । ॐ कुजाय नमः अक्ष्णोः । ॐ भौमाय नमः ललाटे । ॐ

भूतिदाय नमः भ्रुवोर्मध्ये । ॐ भूमिनंदनाय नमः मस्तके । ॐ अंगारकाय नमः शिखायाम् । ॐ यमाय नमः सर्वांगे । ॐ सर्वरोगापहारकाय नमः बाहुद्वये । ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यन्तम् । ॐ वृष्टिहर्त्रे नमः पादादिमूर्द्धान्ताम् । ॐ सर्वकाम-फलप्रदाय नमः दिक्षु । ॐ आराय नमः नाभौ । ॐ वक्राय नमः वक्षसि ॐ भूमिजाय नमः मूर्द्धनि । (इस प्रकार न्यास करके मंगलका ध्यान करे अर्घ्यस्थापन करके षोडशोपचारसे पूजन करे इक्कीस कोठेका तामेंके त्रिकोण यंत्रमें लाल चंदन लाल पुष्पोंकरके मंगलका पूजन करे) ॐ मंगलाय नमः इति मंत्रेण मंगलं पूर्वोक्तवि-धिना आवाहनस्थापनाऽऽसनपाद्याऽर्घ्याऽऽचमनीय-स्नानवस्त्रगंधपुष्पैः पूजयित्वा । ॐ हृदयाय नमः । ॐ शिरसे स्वाहा । ॐ शिखायै वषट् । ॐ कवचाय हुं । ॐ नेत्रयाय वौषट् । ॐ अस्त्राय फट् । इति षडं-गानि संपूज्य अभीष्टसिद्धिमिति मन्त्रेण प्रथमावरणं निवेद्य (एकविंशतिकोष्ठेषु) ॐ मंगलाय नमः १ ॥

ॐ भूमिपुत्राय नमः २ ॥ ॐ ऋणहर्त्रे नमः ३ ॥ ॐ धनप्रदाय नमः ४ ॥ ॐ स्थिरासनाय नमः ५ ॥ ॐ महाकायाय नमः ६ ॥ ॐ सर्वकर्म्मावरोधकायनमः ७॥ ॐ लोहिताय नमः ८॥ ॐ लोहिताक्षाय नमः ९॥ ॐ सामगानां कृपाकराय नमः१०॥ ॐ धरात्मजाय नमः ११॥ ॐ कुजाय नमः १२ ॥ ॐ भौमाय नमः १३॥ ॐ भूतिदाय नमः १४ ॥ ॐ भूमिनंदनाय नमः १५ ॥ ॐ अंगारकाय नमः १६ ॥ ॐ यमाय नमः १७ ॥ ॐ सर्वरोगापहारकाय नमः १८ ॥ ॐ वृष्टिकर्त्रे नमः १९ ॥ ॐ वृष्टिहर्त्रे नमः २० ॥ ॐ सर्वकामफलप्रदाय नमः २१ ॥ इति नामभिः संपूज्य । अभीष्टसिद्धिमिति मंत्रेण द्वितीयावरणं निवेद्य (कोणेषु) ॐ वक्राय नमः । ॐ आराय नमः । ॐ भूमिजाय नमः (एतान् संपूज्य) "अभीष्टसिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनमिति" निवेद्य ॐब्राह्म्यै नमः ॐ माहेश्वर्यै नमः । ॐ कौमार्यै नमः ।

ॐ वैष्णव्यै नमः ! ॐ वाराह्यै नमः । ॐ इन्द्राण्यै नमः । ॐ चामुण्डायै नमः ॐ महालक्ष्म्यै नमः (एताः संपूज्य) "अभीष्टसिद्धिं मे देहि शरणागत-वत्सल । भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्" इति निवेद्य । ॐ इन्द्राय नमः । ॐ अग्नये नमः । ॐ यमाय नमः । ॐ निर्ऋतये नमः । ॐ वरुणाय नमः । ॐ वायवे नमः । ॐ सोमाय नमः । ॐ ईशानाय नमः । ॐ ब्रह्मणे नमः ॐ अनंताय नमः । इत्येतान् संपूज्य । "अभीष्टसिद्धिं मे देहि शरणागत-वत्सल । भक्त्या समर्पये तुभ्यं पंचमावरणार्चनमिति" निवेद्य ॐ वज्राय नमः।ॐशक्तयेनमः।ॐदण्डायनमः ॐ पाशाय नमः । ॐ अंकुशाय नमः । ॐ गदायैनमः। ॐ त्रिशूलाय नमः । ॐ पद्माय नमः । ॐ चक्राय नमः।"अभीष्टसिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पये तुभ्यं सुषष्ठावरणार्चनमिति ॥ निवेद्य।मंगलाय सांगायसपरिवाराय धूपं दीपं समर्प्य गोधूमान्नं (चूर्मो) निवेद्य (जलपूर्ण तामेके पात्रमें गंध, पुष्प, अक्षत, सुपारी,

धरकर इन मंत्रोंकरके मंगलको अर्घ्य निवेदन करे) ॐ भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः । सुतार्थिनी प्रपन्ना त्वां गृहणार्घ्यं नमोस्तु ते । रक्तप्रवालसंकाश जपाकुसुमसन्निभ । महीसुत महाबाहो गृहाणार्घ्यं नमोस्तु ते । इत्यर्घ्यं निवेद्य । (इक्कीस नामों करके इक्कीस बार प्रणाम करे और उन्हीं मंगलादि नामों करके इक्कीस प्रदक्षिणा करनी पूजाका आरंभ करे तब खैरके कोयलेकी तीन लकीर बाईं तरफ निकाल लेवे पूजा पूर्ण करके प्रदक्षिणाके पीछे इन मंत्रोंकरके वामे पांवसे ढोयदेवे) दुःख दौर्भाग्यनाशाय पुत्रसन्तानहेतवे । कृतं रेखात्रयं वामपादेनैतत्प्रमार्ज्म्यहम् ॥ ऋणदुःखविनाशाय मनोभीष्टार्थसिद्धये । मार्जयाम्यसिता रेखास्तिस्रो जन्मत्रयोद्भवाः ॥ (रेखामार्जन करके हाथोंमें पुष्प लेकर मंगलका ध्यान करतीहुई स्तुति करे) धरणीगर्भसंभूतं विद्युत्तेजःसमप्रभम् । कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने । नमामि द्योतमानाय सर्वकल्याणकारिणे ॥

देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ सुखं यान्ति यत-स्तस्मै नमो धरणिसूनवे ॥ यो वक्रगतिमापन्नो नृणां विघ्नं प्रयच्छति । पूजितः सुखसौभाग्यं तस्मै क्ष्मा-सूनवे नमः ॥ प्रसादं करु मे नाथ मंगलप्रद मं-गल ॥ मेषवाहन रुद्रात्मन् पुत्रान् देहि धनं यशः ॥

(इस प्रकार स्तुति करके पूजन करके ब्राह्मणके आशी-र्वादको ग्रहण करके आचार्यको दक्षिणा देकर मंगलको निवेदन कियेहुवे अन्नका भोजन करे । प्रतिमंगलके दिन इस प्रकार एक वर्षपर्यन्त करे वर्षके अंतमें मंगलसरवादीके छेवटके मंगलके दिन तिलोंका होम करे और पंचाश ब्राह्म-णोंका भोजन करावै सर्वतोभद्रमंडलमें कलश स्थापन करके कलशमें यथाशक्ति सोने की मूर्ति मंगलकी कराकर पूजा करके आचार्यको देवे)

एवं व्रतपरा नारी प्राप्नुयात् सुभगान् सुतान् ॥ धनाप्त्यै ऋणनाशाय व्रतं कुर्यात् पुमानपि ॥ इति मंत्रमहोदधौ पंचदशे तरंगे मंगलव्रतविधिः ॥

अथ नवरात्रे घटस्थापनादिप्रयोगः ॥ प्रतिपदि प्रातः कृताभ्यंगस्नानः कुंकुमचंदनादिना कृतपुंड्रो धृतपवित्रः सपत्नीको दशघटिकामध्येऽभिजिन्मुहूर्त्ते वा कलशस्थापनार्थं शुद्धमृदा वेदिकां कृत्वा पञ्चपल्लवदूर्वाफलताम्बूलकुंकुमपुष्पधूपादिसंभारान् संपादयेत् ॥ ततो देशकालौ संकीर्त्य ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकं दीर्घायुविपुलधनपुत्रपौत्राद्यविच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थम् अद्य शारदीयनवरात्रे प्रतिपदि विहितं कलशस्थापनं दुर्गापूजां चंडीसप्तशतीपाठं कुमारीपूजाद्युत्सवाख्यं कर्म करिष्ये ॥ तत्र निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं पुण्याहवाचनं चंडीसप्तशतीजपाद्यर्थं ब्राह्मणवरणं च करिष्ये ॥ इति संकल्प्य ॐ सुमुखश्चेत्यादिस्मरणपूर्वकं गणपतिपूजनं विधाय पुण्याहवाचनं कुर्यात् ॥ ततो गंधपुष्पवस्त्राङ्गुलीयकमादाय देशकालौ संकीर्त्य ॐ अद्य शरत्कालिकदुर्गापूजनपूर्वकमार्कंडेयपुराणी-

यच्चंडीसप्तशतीपाठकरणार्थम् अमुकगोत्रममुकशर्माणं ब्राह्मणं त्वामहं वृणे । ॐ वृतोऽस्मीति प्रतिवचनम् ॥ इति ब्राह्मणं वृत्वा गंधादिभिः पूजयेत् ॥ ततो विप्रः ॐ भूरसिभूमिरसीतिभूमिंस्पृष्ट्वा॥ ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री। पृथिवीं यच्छपृथिवींदृꣳहपृथिवींमाहिꣳसीः ॥ १ ॥ तस्यां भुव्यंकुरारोपणार्थं शुद्धमृदं प्रक्षिप्य।तत्र ॐधान्यमसि-धिनुहि इति यवान्निक्षिप्य ॐ धान्यमसिधिनुहिदेवान्प्राणायत्वोदानाय त्वा व्यानाय त्वा । दीर्घामनुप्रसि-तिमायुषेधां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा माहीनां पयोसि ॥ २ ॥ ॐ आजिघ्र कलशमिति कुंभं संस्थाप्य । ॐ आजिघ्र कलशं मह्या त्वाविशंत्विन्दवः पुनरूर्जा-निवर्त्तस्वसानःसहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविश ताद्रयिः ॥ ३ ॥ ॐ वरुणस्योत्तं० इति जलेनापूर्य । ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कंभसर्ज्जनीस्त्थोवरुणस्यऽऋतसदन्यसिवरुणस्यऋतसदनमसि

व्वरुणस्यऽऋतसदनमासीद ॥ ४ ॥ गंधद्वारामिति गंधम् ॥ ॐगंधद्वारां दुराधर्षांनित्यपुष्टां करीषिणीम् ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ५ ॥ ॐ याओषधीरिति सर्वौषधीः । ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा । मनैनुबभ्रूणामहꣳशतंधामानिसप्तच॥६॥ॐ काण्डात्कांडादितिदूर्वाः।ॐ अश्वत्थेवं इति पंचपल्लवान् । ॐ अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता।गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ७ ॥ ॐ स्योनापृथिवीति सप्त मृदः । ॐ स्योनापृथिवी नोभावानृक्षरानिवेशनीयच्छानः शर्मसप्रथाः ॥ ८ ॥ ॐ याः फलिनीरिति पूगीफलम् ॥ ॐ परिवाजंपतिरिति पंचरत्नानि ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् दधद्रत्नानि दाशुषे ॥ ९ ॥ ॐ हिरण्यगर्भेतिहिरण्यं च क्षिप्त्वा । ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्य जातः पतिरेकऽआसीत्।स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१०॥

ॐ व्वसोः पवित्रमसीति वस्त्रेणावेष्टच ॥ ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्र धारंदेवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारे ण सुप्वाकामधुक्ष ॥ ११ ॥ ॐ पूर्णा दर्वीति तन्दुल-पूर्णपात्रं निधाय । ॐ पूर्णा दर्वि परापत सुपूर्णा पु-नरापत । वस्नेव विक्रीणावहाऽइषमूर्जꣳशतक्रतो ॥ ॥ १२ ॥ तत्र ॐ तत्त्वायामीति वरुणमावाह्य सं-पूज्य । ॐ तत्त्वायामि ब्रह्मणाव्वंदमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेहबो ध्युरुशꣳसमानऽआयुः प्रमोषीः ॥ १ ॥ कलशस्य मुखे विष्णुरित्यभिमंत्र्य देवदानवसंवादे इत्यादि प्रार्थयेत् ॥ ततः कलशोपरि स्वर्णमयीं दुर्गा-प्रतिमाम् अग्न्युत्तारणपूर्वकं पंचामृतेन स्नापयित्वा संस्थापयेत् ॥ अथ पूजा॥देशकालौ संकीर्त्य अमुक-गोत्रोऽमुकशर्माहं मम यजमानस्य वा अतुलविभू-तिकामः संवत्सरसुखप्राप्तिकामः श्रीदुर्गापूजनं करि-ष्य इति संकल्प्य । जयंती मंगला काली भद्रकाली

कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ १ ॥ आगच्छ वरदे देवि दैत्यदर्पनिषूदनि। पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ॥ इत्यावाह्य पुरुषसूक्तेन श्रीसूक्तेन च आसनादिषोडशोपचारैः संपूजयेत् ॥ (श्रीसूक्तन्तु लक्ष्मीपूजान्ते द्रष्टव्यम्) ततः प्रार्थना ॥ मंत्रहीनं क्रियाहीनं० ॥ १ ॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि। यशो देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ इत्यादि प्रार्थ्य चंडीपाठं कुर्यात् ॥ तत्रादौ देशकालौ संकीर्त्य मम (यजमानस्य वा) अतुलविभूतिकामः श्रीदुर्गाप्रीत्यर्थं कवचार्गलाकीलकसहितं मार्कंडेयपुराणीयम् ॐ सावर्णिः सूर्यतनय इत्यादि सावर्णिर्भवितामनुरित्यंतं देवीमाहात्म्यपाठं करिष्ये इति संकल्प्य आसनादि विधाय आधारे अन्यहस्तलिखितं पुस्तकं स्थापयित्वा नारायणं नमस्कृत्य प्रणवमुच्चार्य ग्रंथार्थं बुध्यमानः स्पष्टाक्षरं नातिशीघ्रं नातिमंदं रसभावस्वरयुतं वाचयेत् ॥ अध्यायं समाप्य विरमेन्न तु मध्ये।

ततः कुमारीपूजनं पारणादिने कूष्मांडबलिदानं च कुर्यात् ॥ इति नवरात्रविधानं समाप्तम् ॥

अथ देव्या आर्तिक्यम् ॥ प्रवरातीरनिवासिनि निगमप्रतिपाद्ये । पारावारविहारिणि नारायणि हृद्ये । प्रपञ्चसारे जगदाधारे श्रीविद्ये । प्रपन्नपालननिरते मुनिवृंदाराध्ये । जय देवी जय देवी जय मोहिनिरूपे । मामिह जननि समुद्धर पतितं भवकूपे ॥ १ ॥ दिव्यसुधाकरवदने कुन्दोज्ज्वलरदने । पदनखनिर्जितमदने मधुकैटभकदने। विकसितपङ्कजनयने पन्नगपतिशयने । खगपतिवहने गहने सङ्कटवनदहने । जय देवी० ॥ २ ॥ मंजीरांकितचरणे मणिमुक्ताभरणे । कंचुकिवस्त्राभरणे वक्त्रांबुजधरणे । शंकामयभयहरणे भूसुरसुखकरणे । करुणां कुरु मे शरणे गजनक्रोद्धरणे । जय देवी० ॥ ३ ॥ छित्त्वा राहुग्रीवां पासि त्वं विबुधान् । (द्विड्भ्यो) यच्छसि मृत्युमनिष्टं पीयूषं विबुधान् । विहरसि दानव ऋद्धां समरे संसिद्धाम् । मध्वमुनीश्वरवरदे पालय संसिद्धाम् । जय देवी

जय देवी जय मोहिनिरूपे । मामिह जननि समुद्धर पतितं भवकूपे ॥ ४ ॥ इति देव्या आर्तिक्यं समाप्तम् ॥

अथ महालक्ष्मीपूजनम् ॥ आचम्य प्राणानायम्य ॐ तत्सदद्योमिति पठित्वा ॥ अमुकगोत्रोमुकशर्माहं स्थिरलक्ष्मीप्राप्तिद्वारा श्रीमहालक्ष्मीप्रीत्यर्थं गणपतिनवग्रहकलशपूजनपूर्वकंश्रीमहालक्ष्मीपूजनमहं करिष्य इति संकल्प्य सुमुखश्चैकदंतश्च इत्यादिस्मरणपूर्वकं गणपत्यादिपूजनं कुर्यात्॥अथ ध्यानम् ॥ या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी गंभीरावर्त्तनाभिस्तनभरनमिताशुभ्रवस्त्रोत्तरीया॥या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुंभैः सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता ॥ ॥ १ ॥ इति ध्यात्वा ॥ ॐ सर्वलोकस्य जननीं शूलहस्तां त्रिलोचनाम् । सर्वदेवमयीमीशां देवीमावाहयाम्यहम् ॥ २ ॥ ॐ महालक्ष्म्यै नमः आवाहनं समर्पयामि॥ ॐ तप्तकांचनवर्णाभं मुक्तामणिविराजितम् । अमलं कमलं दिव्यमासनं प्रतिगृह्यताम् ॥ ३ ॥

ॐ महालक्ष्म्यै नमः आसनं० ॥ ॐ गंगादितीर्थसंभूतं गंधपुष्पादिभिर्युतम् । पाद्यं ददाम्यहं देवि गृहाणाशु नमोस्तु ते ॥ ४ ॥ ॐ महालक्ष्म्यै नमः पाद्यम् ॥ ॐ अष्टगन्धसमायुक्तं स्वर्णपात्रप्रपूरितम् अर्घ्यं गृहाण मद्दत्तं महालक्ष्म्यै नमोस्तु ते ॥ ५ ॥ ॐ महा० अर्घ्यम् ॥ ॐ सर्वलोकस्य या शक्तिर्ब्रह्मविष्णवादिभिः स्तुता । ददाम्याचमनं तस्यै महाकाल्यै मनोहरम् ॥६॥ ॐ महा० आचमनं स०॥ ॐ पंचामृतसमायुक्तं जाह्नवीसलिलं शुभम् । गृहाणविश्वजननि स्नानार्थं भक्तवत्सले ॥ ७ ॥ स्नानं० ॥ दिव्यांबरं नूतनं हि क्षौमं त्वतिमनोहरम् । दीयमानं मया देवि गृहाण जगदंबिके ॥८॥ वस्त्रयुग्मं स०आचमनं च ॥ ॐ कापिलं दधि कुंदेंदुधवलं मधुसंयुतम् । स्वर्णपात्रस्थितं देवि मधुपर्कं गृहाण भो ॥ ९ ॥ मधुपर्कं स० ॥ ॐ रत्नकंकणवैदूर्यमुक्ताहारादिकानि च । सुप्रसन्नेन मनसा दत्तानि स्वीकुरुष्व भोः ॥ १० ॥ आभरणानि स० ॥ ॐ श्रीखंडागरुकर्पूरमृगनाभि-

समन्वितम् । विलेपनं गृहाणाशु नमोस्तु भक्तवत्सले ॥ ११ ॥ गंधं स० ॥ रक्तचंदनसंमिश्रं पारिजातसमुद्भवम् ॥ मया दत्तं गृहाणाशु चंदनं गंधसंयुतम् ॥ ॥ १२ ॥ रक्तचंदनं स० ॥ ॐ सिंदूरं रक्तवर्णं च सिंदूरतिलकप्रिये । भक्त्या दत्तं मया देवि सिंदूरं प्रतिगृह्यताम् ॥ १३ ॥ सिंदूरं० ॥ ॐ कुंकुमं कामदं दिव्यं कुंकुमं कमरूपिणम् । अखंडकामसौभाग्यं कुंकुमं प्रतिगृह्यताम् ॥ १४ ॥ कुंकुमं० ॥ ॐ तैलानि च सुगंधीनि द्रव्याणि विविधानि च । मया दत्तानि लेपार्थं गृहाग परमेश्वरि ॥ १५ ॥ सुगंधितैलं० ॥ ॐ मंदारपारिजाताद्याः पाटलीकेतकी तथा । मरुवामोगरं चैव गृहाणाशु नमोनमः ॥ १६ ॥ पुष्पाणि० ॥ ॐ विष्णवादिसर्वदेवानां प्रियां सर्वसुशोभनाम् । क्षीरसागरसंभूते दूर्वां स्वीकुरु सर्वदा ॥ १७ ॥ दूर्वां स० ॥ ॐ पद्मशंखजपापुष्पैः शतपत्रैर्विचित्रिताम् । पुष्पमालां प्रयच्छामि गृहाण त्वं सुरेश्वरि ॥ १८ ॥ पुष्पमालां स० ॥ अथाङ्गपूजा ॥ ॐ चपलायै नमः

पादौ पूजयामि ॥ १ ॥ ॐ चंचलायै नमः जानुनी पू० ॥ २ ॥ ॐ कमलायै नमः कटिं पू० ॥ ३ ॥ ॐ कात्यायिन्यै न० नाभिं पू० ॥ ४ ॥ ॐ जगन्मात्रे न० जठरं पू० ॥ ५ ॥ ॐ विश्ववल्लभायै० वक्षःस्थलं पू० ॥ ६ ॥ ॐ कमलवासिन्यै न० भुजौ पू० ॥ ७ ॥ ॐ पद्मकमलायै न० मुखं पू० ॥ ८ ॥ ॐ कमलपत्राक्ष्यै न० नेत्रत्रयं पू० ॥ ९ ॥ ॐ श्रियै नमः शिरः पू० ॥ १० ॥ इत्यंगपूजा ॥ अथ पूर्वादिक्रमेणाष्टदिक्ष्वष्टसिद्धीः पूजयेत् ॥ ॐ अणिम्ने नमः ॥ १ ॥ ॐ महिम्ने नमः ॥ २ ॥ ॐ गरिम्णे नमः ॥ ३ ॥ ॐ लघिम्ने नमः ॥ ४ ॥ ॐ प्राप्त्यै नमः ॥ ५ ॥ ॐ प्राकाम्यै नमः ॥ ६ ॥ ॐ ईशितायै नमः ॥ ७ ॥ ॐ वशितायै नमः ॥ ८ ॥ ॐ पुनः पूर्वादिक्रमेण ॥ ॐ आद्यलक्ष्म्यै नमः ॥ १ ॥ ॐ विद्यालक्ष्म्यै नमः ॥ २ ॥ ॐ सौभाग्यलक्ष्म्यै न० ॥ ३ ॥ ॐ अमृतलक्ष्म्यै० ॥ ४ ॥ ॐ कामलक्ष्म्यै० ॥ ५ ॥ ॐ सत्यलक्ष्म्यै न० ॥ ६ ॥ ॐ भोगलक्ष्म्यै न० ॥ ७ ॥ ॐ योगलक्ष्म्यै न० ॥ ८ ॥ इत्यष्टलक्ष्मीपूजनम् ॥

अथ मषीपात्रपूजनम् ॥ ॐ महाकाल्यै नम इति मंत्रेण आवाहनादि कृत्वा गंधादिभिः संपूज्य आवरणपूजां कुर्यात् ॥ ॐ काल्यै नमः ॥ १ ॥ ॐ कपालिन्यै नमः ॥ २॥ ॐ फुल्लायै न० ॥३॥ ॐ कुरुकुलायैन० ॥ ४ ॥ ॐ विरोधिन्यै नमः ॥ ५ ॥ ॐ विप्रचित्तायै न० ॥ ६ ॥ ॐ उग्रप्रदत्तायै न० ॥ ७ ॥ ॐ दिव्यायै नमः ॥ ८ ॥ ॐ नीलायै न० ॥ ९ ॥ ॐ घनायै न० ॥१०॥ ॐ बलाकायै०॥११॥ॐ मात्रायै न० ॥ १२ ॥ ॐ मुद्रायै न० ॥ १३ ॥ इति पूजयेत् ॥ सरस्वती (लेखनी) पूजनम् ॥ ॐ वीणापुस्तकधारिण्यै नमः ॥ इत्यावाह्य गंधादिभिः संपूजयेत् ॥ अथावरणपूजा ॥ ॐ वाचत्यै नमः ॥ १ ॥ ॐ वाग्वादिन्यै न० ॥ २ ॥ ॐ अजितायै न० ॥३॥ ॐ विष्णुमायायै न० ॥ ४ ॥ ॐ हिंगुलयै न० ॥ ५ ॥ ॐ यज्ञविद्यायै न० ॥ ६ ॥ ॐ सिद्धविद्यायै न० ॥ ७ ॥ ॐ प्रजायै न० ॥ ८ ॥ ॐ पद्मावत्यै न० ॥ ९ ॥ ॐ भुवनेश्वर्यै न० ॥ १० ॥ इति

सरस्वतीपूजा ॥ ॐ वनस्पतिरसोत्पन्नो गंधाढ्यः सुमनोहरः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥१९॥ ॐ महासलक्ष्म्यै नमः धूपं समर्पयामि॥ कार्पासवर्तिसंयुक्तं घृतयुक्तं मनोहरम् ॥ तमोनाशकरं दीपं गृहाण परमेश्वरि ॥ २० ॥ दीपं स ० ॥ ॐ नैवेद्यं गृह्यतां देवि भक्ष्यभोज्यसमन्वितम् । षड्रसैरन्वितं दिव्यं लक्ष्मि देवि नमोस्तु ते ॥ २१ ॥ नैवेद्यं० ॥ ॐ शीतलं निर्मलं तोयं कर्पूरेण सुवासितम् ॥ आचम्यतां मम जलं प्रसीद त्वं महेश्वरि ॥ ॥ २२ ॥ आचमनं० ॥ ॐ एलालवंगकर्पूरनागपत्रादिभिर्युतम् । पूगीफलेन संयुक्तं तांबूलं प्रतिगृह्यताम् ॥ २३ ॥ तांबूलं समर्पयामि ॥ ॐ चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ॥ आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरि ॥ २४ ॥ नीराजनं० ॥ ॐ फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ॥ तस्मात्फलप्रदानेन पूर्णाः संतु मनोरथाः ॥ २५ ॥ फलं समर्पयामि ॥ ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभा-

वसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥२६॥ ॐ महालक्ष्म्यै नमः दक्षिणां समर्पयामि ॥ ॐ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तानि तानि विनश्यंति प्रदक्षिणपदेपदे ॥ २७ ॥ प्रदक्षिणां समर्पयामि ० ॥ ॐ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ २८ ॥ नमस्कारं सम ० ॥ ॐ केतकीजातिकुसुमैर्मल्लिकामालतीभवैः ॥ पुष्पांजलिर्मया दत्तस्तव प्रीत्यै नमोस्तु ते ॥२९॥ ॐ महालक्ष्म्यै न ० मंत्रपुष्पांजलिं समर्पयामि ॥ ॐ सुरासुरेंद्रादिकिरीट मौक्तिकैर्युक्तं सदा यत्तव पादपंकजम् ॥परावरं पातु वरं सुमंगलं नमामि भक्त्या तव कामसिद्धये ॥ ३० ॥ भवानि त्वं महालक्ष्मीः सर्वकामप्रदायिनी ॥ सुपूजिता प्रसन्ना स्यान्महालक्ष्म्यै नमोस्तु ते॥३१॥ इति प्रार्थना ॥ इति श्रीमहालक्ष्मीपूजनम् ॥ अथ लक्ष्मी (श्री) सूक्तम् ॥ ॐ हिरण्यवर्णांहारिणींसुवर्णरजतस्रजाम् ॥ चंद्रांहिरण्मयींलक्ष्मीं जातवेदोम आव-

ह ॥ १ ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीम्।
यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहम् ॥ २ ॥ अश्व-
पूर्वांरथमध्यांहस्तिनादप्रबोधिनींश्रियंदेवीमुपह्वयेश्री-
र्मांदेवीजुषताम् ॥ ३ ॥ कांसोस्मितांहिरण्यप्राकारामा
र्द्रांज्वलंतींतृप्तांतर्पयंतीम् । पद्मेस्थितांपद्मवर्णांतामि-
होपह्वयेश्रियम् ॥ ४ ॥ चंद्रांप्रभासांयशसाज्वलंतीं
श्रियंलोकेदेवजुष्टामुदाराम् । तांपद्मनेमींशरणमहंप्रपद्ये
अलक्ष्मीर्मेनश्यतांत्वांवृणे ॥ ५ ॥ आदित्यवर्णेतप-
सोधिजातोवनस्पतिस्तववृक्षोथबिल्वः । तस्यफला-
नितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः ॥ ६ ॥
उपैतुमांदेवसखः कीर्तिश्चमणिनासह । प्रादुर्भूतोसुरा-
ष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे ॥ ७ ॥ क्षुत्पिपासामला-
ज्येष्ठामलक्ष्मींनाशयाम्यहम् । अभूतिमसमृद्धिंचसर्वा-
निर्णुदमेगृहात् ॥ ८ ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांक-

रीषिणीम्। ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम्॥९॥
मनसःकाममाकूतिंवाचःसत्यमशीमहि । पशूनांरू-
पमन्नस्यमयिश्रीःश्रयतांयशः ॥ १० ॥ कर्दमेनप्र-
जाभूतामयिसंभ्रमकर्दम । श्रियंवासयमेकुलेमातरं
पद्ममालिनीम् ॥ ११ ॥ आपःसृजंतुस्निग्धानि
चिक्लीतवसमेगृहे । नीचदेवींमातरंश्रियवासयमेकुले॥
॥ १२ ॥ आर्द्रांपुष्करिणींपुष्टींपिंगलांपद्ममालिनीम्।
चंद्राहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ १३ ॥ आर्द्रा
यस्करिणींयष्टींसुवर्णांहेममालिनीं । सूर्यांहिरण्मयींल-
क्ष्मींजातवेदोमआवह ॥ १४ ॥ तांमआवहजातवेदो-
लक्ष्मीमनपगामिनीम् । यस्यांहिरण्यंप्रभूतिंगावादा-
स्योऽश्वान्विंदेयंपुरुषानहम् ॥ १५ ॥ ॐ महादेवींच-
विद्महेविष्णुपत्नींचधीमहि । तन्नोलक्ष्मीःप्रचोदयात्
॥ १६ ॥ यः शुचिः प्रयतोभूत्वाजुहुयादाज्यमन्व-

हम् । सूक्तंपंचदशर्चंचश्रीकामःसततंजपेत् ॥ १७ ॥
इत्यथर्ववेदीयलक्ष्मी (श्री) सूक्तं समाप्तम् ॥ श्रीलक्ष्म्यै नमः ॥

अथ श्रावणीप्रयोगः ॥ तत्र श्रावणस्य पूर्णिमादिकाले प्रातः स्नानसंध्यादिनित्यावश्यकं कर्म समाप्य गुरुः शिष्यैः सह ग्रामाद्बहिः प्राच्यामुदीच्यां वा नदीतडागादिरम्यं जलाशयं गत्वा तस्माच्चतुरो मृत्पिंडानुद्धृत्य तत्तीरं प्रक्षाल्य तत्र तीर्थादिशुभ्रां मृदमार्द्रं गोमयं भस्म कुशान् तिलयवतंदुलान् पुष्पाणि दूर्वाङ्कुरापामार्गयज्ञोपवीतादिसर्वांसामग्रीं संस्थाप्य ऋषिस्थापनार्थं पीठं श्वेतवस्त्रं पूजनार्थं दुग्धदधिघृतमधुशर्करागंधपुष्पधूपदीपनैवेद्यतांबूलादिसंभारांश्च संपाद्य प्रक्षालितपाणिपादः सपवित्रकरो गुरुः शिष्यैः सह पूर्वमुख उदङ्मुखो वा आचम्य प्राणानायम्य मंगलोच्चारणं कुर्यात् ॥ ॐ श्रीमन्महागणाधिपतये नमः ॥ श्रीलक्ष्मीनारायणाभ्यां नमः ॥ श्रीमदुमामहेश्वराभ्यां नमः ॥ श्रीवाणीहिरण्यगर्भाभ्यां नमः ॥ श्रीशचीपुरंद-

राभ्यां नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीवेदेभ्यो नमः॥श्रीवेदपुरुषेभ्यो नमः ॥ श्रीइष्टदेवताभ्यो नमः ॥ श्रीकुलदेवताभ्यो नमः ॥ श्रीग्रामदेवताभ्यो नमः ॥ श्रीस्थानदेवताभ्यो नमः ॥ श्रीतीर्थदेवताभ्यो० ॥ श्रीवास्तुदेवताभ्यो० ॥ श्रीएतत्कर्मप्रधानदेवताभ्यो० ॥ श्रीसर्वेभ्यो देवेभ्यो नमः ॥ श्रीसर्वेभ्यो ब्रह्मणेभ्यो नमोनमः ॥ ॐ वरुणाय नमः ॥ निर्विघ्नमस्तु ॥ ॐ पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहरस्तस्मै

गणाधिपतये नमः ॥ ५ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् ॥ येषां हृदिस्थो भगवान् मंगलायतनो हरिः ॥ ७ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिंदीवरश्यामो हृदयस्थो जनार्दनः ॥८॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ॥ सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥ ९ ॥ सर्वेष्वारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १० ॥ वक्रतुंड माहाकाय सूर्यकोटिसमप्रभ ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ११ ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं नत्वा कृतकृत्याःस्युस्तं नमामि गजाननम् ॥ १२ ॥ गणनाथं नमस्कृत्य नमस्कृत्य पितामहम् ॥ विष्णुं रुद्रं श्रियं देवीं वंदे भक्त्या सरस्वतीम् ॥ १३ ॥ स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम् ॥ धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिम् ॥ १४ ॥ दैत्याचार्यं नमस्कृत्य

सूर्यपुत्रं महाग्रहम् ॥ राहुं केतुं नमस्कृत्य यज्ञारंभे विशेषतः ॥ १५ ॥ शक्रादिदेवताः सर्वानृषींश्चैव तपोधनान् ॥ गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा ॥ ॥१६॥वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् ॥ अगस्त्यं च पुलस्त्यं च दक्षमित्रं पराशरम् ॥ ॥ १७ ॥ भरद्वाजं च मांडव्यं याज्ञवल्क्यं च गालवम् ॥ अन्ये विप्रास्तपोयुक्ता वेदशास्त्रविचक्षणाः ॥ १८ ॥ तान्सर्वान्प्रणिपत्याहं शुभकर्म समारभे ॥ अग्रतः श्रीनृसिंहश्च पृष्ठतो देवकीसुतः ॥ रक्षतां पार्श्वयोर्देवौ भ्रातारौ रामलक्ष्मणौ ॥ १९ ॥ कुशत्रयतिलजलान्यादायसर्वे । पूर्वाभिमुखाः संकल्पं कुर्युः स यथा ॥ ॐ स्वतिश्रीमुकुंदसच्चिदानंदस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृंभिताविद्यायोगात् कालकर्मस्वभावाविर्भूतमहत्तत्वोदिताहंकारोद्भूतवियदादिपंचमहाभूतेंद्रियदेवतानिर्मिते अंडकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं

कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजग-
दुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षण-
स्य प्रणतपारिजातस्य अच्युतानंतवीर्यस्य श्रीमद्भग-
वतो महापुरुषस्य अचिंत्यापरिमितशक्त्या ध्येयमान
स्य महाजलौघमध्येपरिभ्रममाणानामनेककोटिब्रह्मां-
डानामेकतमेऽव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशा
द्यावरणैरावृते अस्मिन्महति ब्रह्मांडखंडे आधारशक्ति-
श्रीमदादिवाराहदंष्ट्राग्रविराजिते कूर्मानंतवासुकितक्षक-
कुलिककर्कोटकपद्ममहापद्मशंखाद्यष्टमहानागैर्ध्रियमा-
णे ऐरावतपुंडरीकवामनकुमुदांजनपुष्पदंतसार्वभौमसु
प्रतीकाष्टदिग्गजप्रतिष्ठितानामतलवितलसुतलतलात
लमहातलरसातलपाताललोकानामुपरिभागेभूर्लोकभु
वर्लोकस्वर्लोकमहर्लोकजनलोकतपोलोकसत्यलोका-
ख्यसप्तलोकानामधोभागेचक्रवालशैलमहावलयनाग-
मध्यवर्तिनोमहाकालमहाफणिराजशेषस्य सहस्रफणा
नां मणिमंडलमंडिते दिग्दंतिशुंडोत्तंभितेअमरावत्य-
शोकवतीभोगवतीसिद्धवतीगान्धर्ववतीकांच्यवंत्यल-

कावतीयशोवतीपुण्यपुरीप्रतिष्ठिते इंद्राग्नियमनिर्ऋ-
तिवरुणवायुकुबेरेशानेष्टदिक्पालप्रतिष्ठिते वरध्रुवाधर-
सोमपाप्रभंजनानलप्रत्यूषप्रभासाख्याष्टवसुभिर्विराजि
तेहरत्र्यंबकरुद्रमृगव्याधापराजितकपालिभैरवशंभुक-
पर्दिवृषाकपिबहुरूपाख्यैकादशरुद्रैः संशोभिते रुद्रो-
पेंद्रसवितृधातृत्वष्टर्यमेंद्रेशानभगमित्रपूषाख्यद्वादशा-
दित्यप्रकाशितेयमनियमासनप्राणायामप्रत्याहारधार
णाध्यान ससाध्यष्टाङ्गनिरतवसिष्ठवालखिल्यविश्वा-
मित्रदक्षकात्यायनकौंडिन्यगौतमाङ्गिरसपाराशर्यव्या
सवाल्मिकशुकशौनकभरद्वाजसनकसनंदनसनातन-
सनत्कुमारनारदादिमुख्यमुनिभिः पवित्रिते लोका-
लोकाचलवलयिते लवणेक्षुरससुरासर्पिदधिक्षीरोदक-
युक्तसप्तार्णवपरिवृते जंबूप्लक्षशाल्मलिकुशक्रौंचशाक-
पुष्कराख्यसप्तद्वीपयुते इंद्रकांस्यताम्रगभस्तिनागसौ-
म्यगंधर्वचारणभारतेति नवखंडमंडिते सुवर्णगिरिक-
र्णिकोपेतमहासरोरुहाकारपंचाशत्कोटियोजनविस्ती-
र्णभूमंडले अयोध्यामथुरामायाकाशीकांच्यवंतिकाद्वा-

रावतीतिसप्तपुरीप्रतिष्ठिते महामुक्तिप्रदस्थले शालग्रा-
मशंभलनंदिग्रामत्रयविराजिते चंपकारण्यबदरिकार-
ण्यदंडकारण्यार्बुदारण्यधर्मारण्यपद्मारण्यगुह्यारण्यजं-
बुकारण्यविंध्यारण्यद्राक्षारण्यनहुषारण्यकाम्यकारण्य
द्वैतारण्यनैमिषारण्यादीनांमध्येसुमेरुनिषधकूटशुभ्रकू
टश्रीकूटहेमकूटरजतकूटचित्रकूटत्रिकूटकिष्किंधश्वेता
द्रिकूटहिमविंध्याचलानां हरिवर्षकिंपुरुषवर्षयोश्वदक्षि
णे नवसहस्रयोजनविस्तीर्णेभरतखंडेमलयाचलसह्या-
चलविंध्याचलानामुत्तरेण स्वर्णप्रस्थचंडप्रस्थसूक्तिक
चंतकरमणकमहारमणकपांचजन्यसिंहलकाऽशोक
वत्यलकावतीसिद्धवतीगांधर्ववत्यादिपुण्यपुरीविराजि
तेनवखंडोपद्वीपमंडितेदक्षिणावस्थिरेणुकाद्वयसूकरका
शीकांचीकालिकालवटेश्वरकालंजरमहाकालेति नवो-
षरयुते द्वादशज्योतिर्लिंगगंगा (भागीरथी) गोदा-
क्षिप्रा यमुना सरस्वती नर्मदा तापी पयोष्णी चंद्र-
भागा कावेरी मंदाकिनी गोदावरी प्रवरा कृष्णा वे-
ण्या भीमरथी तुंगभद्रा मलापहा कृतमाला ताम्रपर्णी

विशालाक्षी वंजुला चर्मण्वती वेत्रवती भोगावती विशोका कौशिकी गंडकी वासिष्ठी प्रमदा विश्वामित्री फल्गुनी चित्रकाश्यपी सरयू सर्वपापहारिणी करतोया प्रणीता वज्रा वक्रगामिनी सुवर्णरेखा शोणा भवनाशिनी शीघ्रगा कुशावार्तिनी ब्रह्मानंदा महितनयेत्यनेकपुण्यनदीभिर्विलसिते ब्रह्मपुत्रसिंधुनदादिपरमपवित्रजलविराजिते हिमवन्मेरुगोवर्धनक्रौंचचित्रकूटहेमकूटमहेंद्रमलयसह्येन्द्रकीलपारियात्राद्यनेकपर्वतसमन्विते मतंगमाल्यकिष्किंधऋष्यशृंगेतिमहानगसमन्विते अंगवंगकालिंगकाश्मीरकांबोजसौवीरसौराष्ट्रमहाराष्ट्रमगधनेपालकेरलचोरलपांचालगौडमालवमलयसिंहलद्रविडकर्नाटकललाटकरहाटवरहाटपांड्यनिषधमागधआंध्रदशार्णभोजकुरुगांधारविदर्भविदेहबाल्हीकबर्बरकैकेयकोसलविराट्शूरसेनकोंकणकैकटमत्स्यभद्रपारसीकखर्जूरयावनम्लेच्छजालंधरेतिसिद्धवत्यन्यदेशविशेषभाषाभूमिपालविचित्रिते इलावृत्तकुरुभद्राश्वकेतुमालकिंपुरुषरमणकहिरण्मयादिनवव-

र्षाणां मध्ये भरतखंडे कोकंतहिरण्यशृङ्गाकुब्जार्बुदमणिकर्णीवटशालग्रामसूकरमथुरागयानिष्क्रमणलोहार्गलपोतस्वामिप्रभासबदरीतिचतुर्दशगुह्यविलसिते जंबुद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखायाः अमुकदिग्भागे कुलमेरोर्दक्षिणदिग्भागे विंध्यस्य अमुकदिग्भागे मत्स्यकूर्मवराहनृसिंहवामनपरशुरामरामकृष्णबुधकल्कीतिदशावताराणां मध्ये बौद्धावतारे गंगादिसरिद्भिः पाविते एवं नवसहस्रयोजनविस्तीर्णे भारतवर्षे निखिलजनपावनपरमभागवतोत्तमशौनकादिनिवासिते नैमिषारण्ये आर्यावर्तांतर्गतब्रह्मावर्तैकदेशे सूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायणनाभिकमलोद्भूतसकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणोद्वितीये परार्धे एकपंचाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथंतरादिद्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायंभुवादिमन्वंतराणां मध्ये सप्तमे वैवस्वतमन्वंतरे कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्णां युगानां मध्ये वर्तमाने

अष्टाविंशतितमे कलियुगे तत्प्रथमे विभागे (पादे श्रीमन्नृपविक्रमार्कात् श्रीमन्नृपशालिवाहनाद्वा यथा-संख्यागमेन चांद्रसावनसौरनाक्षत्रादिप्रकारेणागतानां प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकनाम्नि संवत्सरे उत्तरगोलावलंबिनि श्रीमार्तंडमंडले अमुकर्तौ अमु-कमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुक-नक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थे चंद्रे-अमुकस्थे सूर्ये अमुकस्थे गुरौ शेषेषु ग्रहेषु यथाय-थस्थानस्थितेषु सत्सु एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोऽमुकशर्माहं मम इह जन्म-निजन्मांतरेवाबाल्ययौवनवार्द्धक्यावस्थासुवाक्पाणि-पादपायूपस्थघ्राणरसनाचक्षुःस्पर्शनश्रोत्रमनोभिच-रितज्ञाताज्ञातकामाकाममहापातकोपपातकादिसंचि-तानां पापानां ब्रह्महननसुरापानसुवर्णस्तेयगुरुतल्पग-मनतत्संगरूपमहापातकानां बुद्धिपूर्वकाणां मनोवा-क्कायकृतानां बहुकालाभ्यस्तानामुपपातकानां च स्पृ-ष्टास्पृष्टसंकलीकरणमलिनीकरणापात्रीकरणजातिभ्रं-

शकरणविहिताकरणकर्मलोपजनितानां रसविक्रयक-
न्याविक्रयहयगोविक्रयखरोष्ट्रविक्रयदासीविक्रयाजा-
दिपशुविक्रयस्वगृहविक्रयनीलीविक्रयाक्रेयविक्रयप-
ण्यविक्रयजलचरादिजंतुविक्रयस्थलचरादिविक्रयखे-
चरादिविक्रयसंभूतानां निरर्थकवृक्षच्छेदनऋणानपा-
करणब्रह्मस्वापहरणदेवस्वापहरणराजस्वापहरणपरद्र-
व्यापहरणतैलादिद्रव्यापहरणफलाहरणलोहादिहरण-
नानावस्तुहरणरूपाणां ब्राह्मणनिंदागुरुनिंदावेदनिंदा-
शास्त्रनिंदापरनिंदाऽभक्ष्यभक्षणाभोज्यभोजनाचोष्य-
चोषणालेह्यलेहनापेयपानास्पृश्यस्पर्शनाश्राव्यश्रव-
णाहिंस्यहिंसनावंद्यवंदनाचिंत्यचिंतनायाज्ययाजनापू
ज्यपूजनरूपाणां मातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभे-
दनपरस्त्रीगमनविधवागमनवेश्यागमनदासीगमनचां-
डालादिहीनजातिगमनगुदगमनरजस्वलागमनपश्वा
दिगमनरूपाणां, कूटसाक्षित्वपैशुन्यवादमिथ्या
पवादम्लेच्छसंभाषणब्रह्मद्वेषकरणब्रह्मवृत्तिहरणवृत्ति-
च्छेदनपरवृत्तिहरणरूपाणां, मित्रवंचनगुरुवंचन-

स्वामिवंचनासत्यभाषणगर्भपातनपथितांबूलचर्वणही
नजातिसेवनपरान्नभोजनगणान्नभोजनलशुनपलांडु-
गृंजनभक्षणतालवृक्षफलभक्षणोच्छिष्टमार्जारोच्छिष्टप-
र्युषितान्नभक्षणरूपाणां, पंक्तिभेदकरणभ्रूणहिंसापशु-
हिंसाबालहिंसाद्यनेकहिंसोद्भूतानां,शौचत्यागस्नानत्या
गसंध्यात्यागौपासनाग्नित्यागवैश्वदेवत्यागरूपाणां नि
षिद्धचरणकुग्रामवासब्रह्मद्रोहपितृमातृद्रोहपरद्रोहपर-
निंदात्मस्तुतिदुष्टप्रतिग्रहदुर्जनसंसर्गरूपाणां,गोयान-
वृषभयानमहिषयानगर्दभयानोष्ट्रयानाजयानभृत्याभ-
रणस्वग्रामत्यागगोत्रत्यागकुलत्यागदूरस्थमंत्रण विप्रा
शाभेदनावंदिताशीर्वादग्रहणपतितसंभाषणरूपाणांप-
तितजनपंक्तिभोजनाहःसंगमवृथामनोरथादिपापानां
आत्मार्थं पाककरणेकाकीमिष्टान्नभोजनबालकैःस-
ह भोजनात्मस्त्रिया सह भोजनेत्यादिप्रकीर्णपात-
कानां, एतत्कालपर्यंतं संचितानां लघुस्थूलसूक्ष्माणां
च निःशेषपरिहारार्थं सहस्रगोदानकुरुक्षेत्रादिसर्वतीर्थ-
स्नानजन्यफलप्राप्त्यर्थंसमस्तपितणां आत्मनश्च वि-

श्वादिलोकप्राप्तये अधीतानामध्येष्यमाणानां चाध्या-
यानां, स्थापनविच्छेदक्रोशघोषण—दंतविवृतिदुर्वृत्तद्रु-
तोच्चारितवर्णानां, पूर्वसवर्णानांगलोपलंबितविवृतोच्चा
रितवर्णानां, श्लिष्टास्पष्टवर्णविघट्टनादिभिः पठितानां-
श्रुतीनांयद्यातयामत्वं तत्परिहारार्थम्अष्टात्रिंशदनध्या
याध्ययनेरथ्यासंचरतः शूद्रस्य शृण्वतोध्ययने म्लेछां
त्यजादेःशृण्वतोऽध्ययने अशुचिदेशेऽध्ययने आत्मनो-
ऽशुचित्वेऽध्ययने अक्षरस्वरानुसारपदच्छेदकंडिकाव्यं-
जनह्रस्वदीर्घप्लुतकंठतालुमूर्द्धन्योष्ठचदन्त्यनासिकानु-
नासिकरेफजिह्वामूलीयोपध्मानीयोदात्तानुदात्तस्वारि-
तादीनांचव्यत्ययेनोच्चारमाधुर्याक्षरव्यक्तिहीनत्वाद्यने-
कप्रत्यवायपरिहारपूर्वकं सर्वस्य वेदस्यसवीर्यत्वसंपाद-
नद्वारा यथावत्फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थंदेवब्राह्म-
णसवितासूर्यनारायणसन्निधौगंगाभागीरथ्याम्अमुक-
तीर्थे तडागे वा प्रवाहाभिमुखम् अध्यायोत्सर्गोपा-
कर्मनिमित्तं गणस्नानमहं करिष्ये ॥ इति संकल्प्य
स्नानानुज्ञां प्रार्थयेत् ॥ इतिहेमाद्रिकृतः संकल्पः ॥

नमोस्तु देवदेवाय शितिकंठाय वेधसे ॥ रुद्राय चापहस्ताय दंडिने चक्रिणे नमः ॥ १ ॥ सरस्वती च गायत्री वेदमाता गरीयसी ॥ सन्निधात्री भव त्वं च सर्वपापप्रणाशिनी ॥ २ ॥ यद्वा—सागरस्वननिर्घोष-दंडहस्तसुरांतक ॥ जगत्स्रष्टर्जगन्मित्र त्वां नमाम्यसुरान्तक ॥ ३ ॥ तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ ४ ॥ आपस्त्वमसि देवेश ज्योतिषां पतिरेव च ॥ पापं नाशय मे देव वाङ्मनःकायकर्मजम् ॥ ५ ॥ इति स्नानानुज्ञां प्रार्थ्य पूर्वोक्तकातीयस्नानविधिना स्नात्वा स्नानाङ्गतर्पणं च कृत्वा ॥ ॐ लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः ॥ ते सर्वे तृप्तिमायांतु मयोत्सृष्टैः शिखोदकैः ॥ १ ॥ इति मंत्रेण स्वदक्षिणभागे शिखाग्रं निष्पीडयेत् ॥ ततो धौतवाससी परिधाय दर्भासनादौ प्राङ्मुख उदङ्मुखो वोपविश्य भस्मगोपीचंदनकुंकुमादिना तिलकं धृत्वा पवित्रपाणिराचम्य माध्याह्नसंध्यां कुर्यात् ॥ (संध्याप्रयोगः पूर्वोक्तव-

ज्ज्ञेयः) तत ॐ विभ्राडित्यनुवाकसहस्त्रशीर्षेतिपु-
रुषसूक्तशिवसंकल्पमंडलब्राह्मणैः सूर्यमुपतिष्ठेत् (त
च्च पूर्वमुक्तम्) ॥ अथासनोपरि न्यस्तेषु प्रागग्रेषु
दर्भेषु स्वस्तिकासनेन प्राङ्मुख उपविष्टः पाण्योर्म-
ध्ये सप्तपर्णं दर्भमादाय दक्षिणोरौ मुकुलीकृतमंजलिं
निधाय प्रणवव्याहृतिपूर्विकां गायत्रीं जपित्वा
ऋष्याद्यनुसंधाय ॥ इषेत्वा इत्यादि यथाशक्ति ब्रह्म-
यज्ञं कुर्यात्॥ततः आचमेत् ॥ एवं ब्रह्मयज्ञं कृत्वा देव-
र्षिमनुष्यपितृतर्पणं च कुर्यात् (तच्च पूर्वंद्रष्टव्यम्)॥
एवमुक्तविधिना नित्यस्नानमाध्याह्निकसंध्यातर्पणा-
नि समाप्य वक्ष्यमाणप्रकारेणारुंधतीसमेतान्क-
श्यपादिसप्तर्षीन्सप्रवरान्स्थापयेत् ॥ इति स्नाना-
दिप्रयोगः ॥

॥ अथ ऋषिपूजनम् ॥ तत्रादौ (ऋचं वाचं प्रप-
द्ये इति शांतिसूक्तम्) ॐ द्यौः शांतिरंतरिक्षꣳ शांतिः
पृथिवी शांतिरापः शांतिरोषधयः शांतिः वनस्पतयः
शांतिर्विश्वेदेवाः शांतिर्ब्रह्म शांतिः सर्वꣳ शांतिः शांति-

रेवशांतिः॒सामाशांतिरेधि॥१॥यतोयतः॒समीहसे ततो नोऽअभयंकुरु॥शन्नः॑कुरुप्रजाभ्योभयन्नः॑पशुभ्यः॑॥ २॥ इतिशांतिपाठं पठंतः (अपामार्गमिश्रितैस्त्रिभि-स्त्रिभिर्दर्भपवित्रैः पृथक्पृथक् गायत्रीं जप्त्वा ब्रह्म-ग्रंथियुक्तान् सप्तऋषीन् कुर्युः ॥ (कश्यपोऽत्रिर्भरद्वा-जो गौतमश्चात्रिरेव च ॥ जमदग्निर्वसिष्ठश्च विश्वामि-त्रो महामनाः ॥ एते च ऋषयः सप्त साध्वी चैवा-प्यरुंधती) ततः पीठे नवं सदशं धौतं वस्त्रं प्रसार्य तदुपरि प्रागग्रान् उदगग्रान् वा सप्तर्षीन् स्थापयेत् ॥ अथ प्रतिष्ठापूजने ॥ ॐ मनोजूतिर्जुषतामाज्यस्यबृह स्पतिर्यज्ञमिमन्तनोत्त्वरिष्टं॑यज्ञ॑ठसमिमंदधातु । वि श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥१॥ॐ एषवैप्रति-ष्ठानामयज्ञोयत्रेतेनयज्ञेनयजंतेसर्वमेवप्रतिष्ठितंभवति ॥२॥ ॐ प्रतिष्ठा सुप्रतिष्ठितमस्तु इति ऋष्युपरि अक्ष-तान् विकरेत् ॥ (ऋष्यावाहनम्) ॐ भूर्भुवः स्वः कश्यपायनमः कश्यपम् आवहयामि भो कश्यप इहा-

गच्छ इह तिष्ठ पूजां गृहाण मम संमुखो भव ॥ १ ॥ ॐ भूर्भुवःस्वः भरद्वाजाय नमः भरद्वाजम् आवाहयामि भो भरद्वाज इहाग० ॥ २ ॥ ॐ भूर्भुवः स्वः गौतमाय नमः गौतमम् आवाहयामि भो गौतम इगच्छ० ॥ ३ ॥ ॐ भूर्भुवःस्वः अत्रये नमः अत्रिम् आवाहयामि भो अत्रे इहाग० ॥ ४ ॥ ॐ भूर्भुवःस्वः जमदग्नये नमः जमदग्निम् आवाहयामि भो जमदग्ने इहाग० ॥५॥ ॐ भूर्भुवःस्वः वसिष्ठाय नमः वसिष्ठम् आवाहयामि भो वसिष्ठ इहाग० ॥ ६ ॥ ॐ भूर्भुवःस्वः विश्वामित्राय नमः विश्वामित्रम् आवाहयामि भो विश्वामित्र इहाग०॥७॥ ॐ भूर्भुवःस्वः अरुंधत्यैनमः अरुंधतीम् आवहयामि भो अरुंधति इहागच्छइह तिष्ठ पूजां गृहाण मम संमुखा सुप्रसन्ना वरदाभव ॥ ८ ॥ इत्यावाह्य ॥ ॐ मनोजूतिरिति० अरुंधतीसहिताः सप्तर्षयः सुप्रतिष्ठिता वरदा भवंतु ॥ इति प्रतिष्ठाप्य॥ ॐ इमावेवगौतेमभरद्वाजावयमेवगौतमोऽयंभरद्वाजाइमामेवविश्वामित्रजमदग्नीअयमेववि-

श्वामित्रोयंजमदग्निरिमावेवव्वसिष्ठकश्यपावयमेववसि-
ष्ठोयंकश्यपोव्वागेवात्रिर्वाचाह्युन्नमद्यतेतिर्हवैनामैतद्य-
दत्रिरितिसर्व्वस्यात्ताभवतिसर्वस्यान्नंभवतिय्यऽएवंवेद ॥
इति पठेत् ॥ ततः सर्वे आचम्य प्राणानायम्य देश-
कालौ संकीर्त्य ॥ ममात्मनःश्रुतिस्मृतिपुराणोक्तफल
प्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थम् उत्सर्जनाङ्गत्वेन अरु-
धतीसहितकश्यपादिसप्तर्षिपूजनमहंकरिष्ये ॥ तत्रादौ
निर्विघ्नार्थं गणपतिस्मरणं च करिष्ये इति संकल्प्य-
ॐ सुमुखश्चैकदंतश्चेत्यादिगणपतिस्मरणं कृत्वा ऋ-
षीन् ध्यायेत् (ध्यानम्) ॐसप्तऽऋषयःप्प्रतिहि
ताःशरीरेसप्तरक्षंतिसदमप्प्रमादम्॥ सप्तापःस्वपतो लो
कमीयुस्तत्रंजागृतोऽअस्वप्नजौसत्रसदौचदेवौ॥ १॥ ॐ-
इदंव्विष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाᳬ
सुरेस्वाहा॥२॥ॐसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपा-
त्॥सभूमिᳬसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥३॥ ॐभू

र्भुवः स्वः अरुंधतीसहकश्यपादिऋषिभ्योनमः ध्यानंस-
मर्पयामि॥ १॥ॐ पुरुषऽएवेदꣳसर्व्वंयद्भूतंयच्चभाव्यम्॥
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ ॐ भूर्भुवः स्वः
अरुंध० नमः आसनंसमर्पयामि॥२॥ ॐ एतावानस्य
महिमातोज्यायाँश्चपूरुषः ॥ पादोस्यव्विश्वाभूतानित्रि
पादस्यामृतंदिवि ॥ ॐ भूर्भुवः स्वः अरुंधतीस० नमः
पाद्यं समर्पयामि ॥ ३ ॥ ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः
पादोस्येहाभवत्पुनः ॥ ततोव्विष्वङ्व्यक्रामत्सा-
शनानशनेऽअभि० ॥ ॐ भूर्भुवः स्वः अरुंध०
नमः अर्घ्यं० ॥ ४ ॥ ॐ ततोव्विराडजायत व्विरा
जोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिम-
थोपुरः॥ ॐ भूर्भुवस्वः अरुंध० नमः आचमनीयं०॥
॥ ५ ॥ ॐ तस्माद्यज्ञात्सर्वहुतःसम्भृतंपृषदाज्यम् ॥
पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्याश्चये०॥ ॐ भूर्भुवः

स्वः अरुंध० नमः स्नानं० ॥ ६ ॥ ॐ पंचनद्यः सरस्वतीमपियंतिसस्रोतसः सरस्वतीतुपंचधासोदेशेभवत्सरित् ॥ ॐ भूर्भुवः स्वः अरुंधती० पंचामृतस्नानं० ॥ ॥ ७ ॥ ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॐ भूर्भुवःस्वः अरुंध० नमः गंधोदकस्नानं० ॥ ८ ॥ (ततः पुरुषसूक्तेनाभिषेकंकुर्यात्) ॥ ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे। छंदाꣳसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ॐ भूर्भुवः स्वः अरुंध० नमः वस्त्रंसमर्पयामि ॥ ॥ ९ ॥ ॐ तस्मादश्वाऽअजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ ॐ भूर्भुवः स्वः अरुंध० नमः यज्ञोपवीतंस० ॥ १० ॥ ॐ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाऽअयजंतसाध्याऽऋषयश्चये ॥ ॐ भूर्भुवः स्वः

अरुंध० नमः गंधं समर्पयामि ॥ ११ ॥ ॐ अक्षन्नमीमदंतह्यवप्रियाऽअधूषत॥अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥ ॐ भूर्भुवः स्वः अरुंध० नमः अक्षतान् सम० ॥ १२ ॥ ॐ अहिरिवभोगैः पर्येतिबाहुंज्ज्यायाहेतिम्परिबाधमानः॥हस्तघ्नोविश्वाव्वयुनानिव्विद्वान्पुमान्पुमांसंपरिपातुव्विश्वतः॥ ॐ भूर्भुवः स्वः अरुंध० नमः हारिद्राकुंकुमादिद्रव्याणि समर्पयामि ॥ १३ ॥ ॐ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखंकिमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ ॐ भूर्भुवः स्वः अरुंध० नमः पुष्पाणि० ॥ १४ ॥ ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः ॥ ऊरुतदस्ययद्वैश्यः पद्भ्याछंशूद्रोऽअजायत ॥ ॐ भूर्भुवः स्वः अरुंध० नमः धूपं सम० ॥ १५ ॥ ॐ चंद्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ।

ॐ भूर्भुवः स्वः अरुं० नमः दीपं सम० ॥ १६ ॥
ॐ नाब्भ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौः समवर्त्तत ॥
पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ२ऽअकल्पयन्॥ॐ
भूर्भुवः स्वः अरुंध० नमः नैवेद्यं स० ॥ १७ ॥
(नैवेद्यांते आचमनीयं समर्पयामि) ॐ याः फलि-
नीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः॥बृहस्पतिप्प्र-
सूतास्तानोमुंचत्वꣳहसः ॥ ॐ भूर्भुवः अरुंध० नमः
फलानि सम० ॥ १८ ॥ ॐ यत्पुरुषेणहविषादेवा-
यज्ञमतन्वत ॥ व्वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मःश-
रद्धविः॥ ॐ भूर्भुवः स्वः अरुंधती० नमः तांबूलंस०
॥ १९ ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातःप-
तिरेकऽआसीत ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवा-
यहविषाव्विधेम॥ ॐ भूर्भुवः स्वः अरुंधती० नमःदक्षि
णां सम० ॥ २० ॥ ॐ इदꣳहविःप्प्रजननम्मेऽअ-
स्तुदशवीरꣳसर्वगणꣳस्वस्तये॥आत्मसनिप्रजास-

निपशुसनिंलोकसन्न्यंभयभयसनिअग्निःप्रजाम्बहुला म्मेकरोत्वन्नम्पयोरेतांऽअस्मासुधत्त ॥ ॐ भूर्भुवः स्वः अरुंधतीसहितक० नमः कर्पूरार्त्तिक्यं समर्पयामि २१ ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः कृताः ॥ देवा-यद्यज्ञन्तंन्वानाऽअबध्नन्पुरुषंपशुम् ॥ ॐ भूर्भुवः स्वः अरुंधतीसहित० प्रदक्षिणां सम० ॥ २२ ॥ ॐ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानः सचन्तयत्रपूर्व्वेसाध्याःसन्तिदेवाः ॥ ॐ भूर्भुवः स्वः अरुंध० मंत्रपुष्पांजलिं समर्पया-मि ॥ २३ ॥ (प्रार्थना) ॐ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया पूर्वं परिपूर्णं तद-स्तु मे ॥ ॐ भूर्भुवः स्वः अरुंध० नमः नमस्कारं समर्पयामि ॥ २४ ॥ अनेन मया वेदोत्सर्जनाङ्ग-त्वेन कृतेन ध्यानावाहनादिषोडशोपचारैः पूजनेन अरुंधतीसहितकश्यपादिसप्तर्षयः प्रीयंतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति ऋषिपूजनम् ॥

अथ स्वपितृभ्यो यज्ञोपवीतदानम् ॥ तत्रादौ सर्वे प्राचीनावीती दक्षिणमुखाः स्वपुरतो यज्ञोपवीतानिनि धाय कुशोदकं गृहीत्वा ॐ अमुकगोत्रेभ्यः अस्मत्पि- तृपितामहप्रपितामहेभ्यः(तथा द्वितीयं) ॐअमुकगोत्रे भ्यः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः ॥ (तृतीयं) ॐ कव्यवाडनलादिदिव्यपितृभ्यः इमा- नि यज्ञोपवीतानि स्वधा संपद्यंताम् इतिसमर्पयेत् ॥ (जीवत्पितृकैरपि पितुः पित्रादिभ्यो मातामहादि भ्यश्च यज्ञोपवीतानि देयानि) ततः सव्यं कृत्वा स- र्वान् ब्राह्माणान् गंधादिना संपूज्य तेभ्यो यज्ञो- पवीतानि दत्त्वा सर्वैः सह स्वयमपि धार्याणि ॥

अथ यज्ञोपवीतधारणप्रयोगः ॥ आचम्य प्राणा- नायम्य देशकालौ संकीर्त्य ॥ मम श्रौतस्मार्तकर्मा- नुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नूतनयज्ञोप- वीतधारणमहं करिष्ये तदंगत्वेन यज्ञोपवीताभिमंत्र- णं करिष्ये ॥ इति संकल्प्य । ॐ इदंविष्णुर्विचक्रमे- त्रेधानिदंधेपदम् ॥ समूढमस्यपाᳬंसुरेस्वाहा ॥

ॐ आपोहिष्ठामयोभुवइत्यादिमंत्रैरुपवीतानि प्रक्षाल्य अनंतरं दशगायत्रीमंत्रैरभिमंत्र्य पुष्पाण्यादाय तंतुषु देवतानामावाहनं कुर्यात् ॥ तद्यथा-प्रथमतंतौ ॐ कारमावाहयामि ॥ १ ॥ द्वितीयतंतौ ॐ अग्निमावाहयामि ॥ २ ॥ तृतीयतंतौ ॐ सर्पानावा० ॥ ३ ॥ चतुर्थतन्तौ ॐ सोममावाह० ॥ ४ ॥ पंचमतन्तौ ॐ पितृनावाहयामि० ॥ ५ ॥ षष्ठ-तन्तौ ॐ प्रजापतिं० ॥ ६ ॥ सप्तमतन्तौ ॐ अनिलं० ॥ ७ ॥ अष्टमतन्तौ ॐ सूर्यमावाह० ॥ ८ ॥ नवमतन्तौ ॐ विश्वान्देवानावाहयामि ॥ ९ ॥ (अथ ग्रंथिदेवतानामावाहनम्) ग्रंथिमध्ये ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि ॥ १ ॥ ॐ विष्णवे नमः विष्णुमावाह० ॥ २ ॥ ॐ रुद्राय नमः रुद्रमावाहयामि ॥ ३ ॥ ततः ॐ प्रणवाद्यावाहितदेवताभ्यो नमः यथास्थानमहं न्यसामि इत्यावाह्य गंधादिभिः पूजयेत् ॥ ततो ध्यानम् ॥ (ॐ प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम् । ब्रह्मत्वसिद्ध्यै च

यशःप्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम्) यज्ञोपवीतमिति मंत्रस्य परमेष्ठी ऋषिः लिङ्गोक्ता देवता त्रिष्टुप्छन्दः यज्ञोपवीतधारणे विनियोगः ॥ ॐ यज्ञोपवीतम्परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥ अनेन मंत्रेण यज्ञोपवीतानां पृथक्पृथक् धारणं कुर्यात् ॥ तत आचमनं कृत्वा ॥ ॐ एतावद्दिनपर्यंतं ब्रह्म त्वं धारितं मया ॥ जीर्णत्वात्त्वत्परित्यागो गच्छ सूत्र यथासुखम् ॥ १ ॥ इति मंत्रेण जीर्णयज्ञोपवीतं शिरोमार्गेण निःसार्य भूमौ त्यजेत् ॥ पश्चाद्यथाशक्ति गायत्रीजपं कुर्यात् ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ यस्य स्मृत्या० ॥ इति यज्ञोपवीतधारणप्रयोगः ॥

अथोत्सर्गाङ्गमृषितर्पणम् ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य छंदसां क्वचिदनध्यायादिकाले पठनादनधिकारिभिः श्रवणाच्च प्राप्तमालिन्यस्य निरा-

सार्थमुत्सर्गाङ्गतर्पणमहं करिष्ये॥इति संकल्प्य दक्षिणं जान्वाच्य ईशानाभिमुखः सव्येन प्रागग्रैर्दर्भैर्देवतीर्थेन देवतर्पणं कुर्यात् ॥ ॐ विश्वे देवासऽआगतशृणुतामऽइमठंहवम् । एदम्बुर्हिर्निषीदत ॥ १ ॥ विश्वेदेवाःशृणुतेमठंहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ।येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् ॥ २ ॥ इति देवानावाह्य ॥ ॐ देवास्तृप्यंताम् । ॐ छंदांसि तृप्यंताम् । ॐ वेदास्तृप्यंताम् । ॐ ऋषयस्तृप्यंताम् । ॐ पुराणाचार्यास्तृप्यंताम् ॐ गंधर्वास्तृप्यंताम्। ॐइतराचार्यास्तृप्यंताम् । ॐ संवत्सरस्तृप्यताम् ॥ ततो वामं जान्वाच्य । दक्षिणामुखोऽपसव्येनतिलमिश्रितं जलमंजलौ गृहीत्वा। ॐअमुकगोत्राः अस्मत्पितरः अमुकशर्माणो वसुरूपास्तृप्यध्वं स्वधा नमः ॥ ॐ अमुकगोत्राः अस्मत्पितामहाः । अमुकशर्माणो रुद्ररूपास्तृप्यध्वं स्वधा नमः । ॐ अमुकगोत्राः अस्मत्प्रपितामहाः अमुकशर्माण आदित्यरूपास्तृप्यध्वं स्वधा नमः । इति स्वपितृ-

स्तर्पयेत् ॥ एवं मातृर्मातामहादींश्च तर्पयेत् ॥ (जीवत्पितृकैः पुत्रैः शिष्यैश्चाचार्यस्य पितृतर्पणं कार्यं तद्यथा ॐ अमुकगोत्राः अस्मदाचार्य-पितरस्तृप्यध्वं स्वधा नमः इति) तत आचमनम् । अथ वंशानां श्रुवणम् ॥ ॐ अयं पुर इत्यादिपंचानां साध्या ऋषयो यजूंषि प्राणभृतो देवताः । मूर्द्धेत्या-दिद्वयोर्देवा ऋषयो यजूंषि लिङ्गोक्ता देवताः । माछं-दइत्यादिषोडशानां प मेष्ठी ऋषिर्यजूंषि लिङ्गोक्ता देवताः । ऋषितर्पणे वि नियोगः ॥ ॐ सप्तऽऋषय इत्यस्य याज्ञवल्क्य ऋषिः सप्तर्षयो देवताः जगती छंदः ऋषितर्पणे विनियोगः ॥ ॐ अयं पुरोभुवस्त स्यंप्राणोभौवायनोव्वंसन्तः प्राणायनोगायत्रीव्वासंती-गायत्र्यै ॥ यत्रङ्गायत्रादुपाछंश्रुरुपाछंशोस्त्रिवृत्त्रिवृ-तोरथन्तरँवसिष्ठऽऋषिः प्रजापतिगृहीतयात्त्वयाप्राण-ङ्गृह्णामिप्रजाभ्यः ॥ १ ॥ अयंदक्षिणाव्विश्वकर्म्मात-स्यमनोव्वैश्वकर्मणंग्रीष्मोमानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभः

स्वारठं स्वाराद्न्तर्य्यामो ऽन्तर्य्यामात्पंचदशः पंचदशाद्बृहद्बृहतो भरद्वाजऽऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥ २ ॥ अयं पश्चात् । अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्या ऽऋक्समम्मृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥ ३ ॥ इदमुत्तरात्स्वस्तस्य श्रोत्रठं सौवठं शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऽऐडमैडान्मन्थी मन्थिन ऽएकविठंश ऽएकविठंशाद्वैराजं विश्वामित्रऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥ ४ ॥ इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पंक्तिर्हैमन्ती पंक्त्यै निधनवन्निधनवत ऽआग्रयण ऽआग्रयणात्त्रिणवत्रयस्त्रिठंशौ त्रिणवत्रयस्त्रिठंशाभ्याठं शाक्वररैवते विश्वकर्म ऽऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यो

लोकंताऽइंद्रम ॥ ५ ॥ लोकम्पृणच्छिद्रम्पृणाथोंसीदद्ध्रुवात्वम् ॥ इंद्राग्नीत्त्वाबृहस्पतिंरस्म्मिन्योनांवसीषदन् ॥ ६ ॥ ताऽअस्यसूददोहसःऽसोमंठंश्रीणन्तिपृश्नय÷ ॥ जन्मंन्देवानँव्विशंस्त्रिष्व्वारोंचनेदिवः ॥ ७ ॥ इंद्रँव्विश्श्वांऽउ गांवृधन्तसमुद्रव्यंचसंगिरं÷रथीतंमठंरथीनाँव्वाजानाठंसत्पंतिम्पतिम् ॥ ८ ॥ मूर्द्धाव्वंय÷प्रजापतिश्छंदःक्षत्रँव्वयोमयन्दंछदोंव्विष्टुम्भोव्वयोंधिपतिश्छंदोंव्विश्वकर्म्माव्वय÷परमेष्ठीछंदोंवस्तोव्वयोंव्विवलंछंदोव्वृष्णिर्व्वयोंव्विशालंदंपुरुषोव्वयंस्तद्रंछंदोंव्याघ्रोव्वयोनाधृष्टंछंदं÷सिठंहोव्वयंश्छंदिश्छंद÷पृष्ठवाडवयांबृहतीछंदंऽउक्षाव्वयं÷ककुप्छंदंऽऋषयोव्वयं÷सतोबृहतीछंदोंनड्वान्वय÷ ॥ ९ ॥ अनड्वान्वयं÷पंक्तिछंदोंधेनुव्वयोजगतीच्छंदस्त्र्यविर्व्वयस्त्रिष्टुप्छंदोंदित्यवाड्वयोंव्विराट्छंदःपञ्चाविर्व्वयोंगा-

यत्रीच्छंदस्त्रिवत्सोव्वयंऽउष्णिकछंदस्मूर्द्धवाड्वयोनुष्टुप्-छंदं लोकन्ताऽइन्द्रम् ॥ १० ॥ माच्छंदं प्रमाच्छंदं प्रतिमाच्छंदोऽआसीन्वयश्छंदः पंक्तिश्छंद उष्णिकछंदो बृहतीछंदोनुष्टुप्छंदो विराट्छंदो गायत्रीच्छंदस्त्रिष्टुप्-छंदोजगतीच्छंदः पृथिवीच्छंदः ॥ ११ ॥ पृ-थिवीच्छंदोन्तरिक्षञ्छंदो द्यौश्छंदः समाश्छंदोनक्षत्रा-णिच्छंदो व्वाकछंदो मनश्छंदः कृषिश्छंदो हिरण्यञ्छन्दो गौश्छंदोजाश्छंदोश्वच्छंदः ॥ १२ ॥ अग्निर्देवता-व्वातोदेवतासूर्योदेवताचंद्रमादेवताव्वसवोदेवतारुद्रादे-वतादित्यादेवतामरुतोदेवताव्विश्वेदेवादेवताबृहस्पतिर्दे-वतेन्द्रोदेवताव्वरुणोदेवता ॥ १३॥ एवच्छंदोव्वरिव-च्छंदः शम्भूश्छंदः परिभूश्छंद आच्छश्छंदोमनश्छंदो व्यचश्छंदः सिंधुश्छंदः समुद्रश्छंदः सरिच्छंदः ककुप्छं-दस्त्रिककुप्छंदः काव्यश्छंदोऽअंकुपञ्छंदोक्षरपंक्तिश्छं-

दं॑÷पदपं॑क्तिश्छंदो॑ विष्टारपं॑क्तिश्छंदं॑÷क्षुरोभ्रजश्छंदं॑ऽआ-
च्छच्छंदं॑ः ॥ १४ ॥ आच्छच्छन्दं॑ःप्रच्छच्छन्दं॑ःसंय-
च्छंदो॑वियच्छन्दो॑बृहच्छंदो॑रथंतरंच्छंदो॑निकायश्छं-
दो॑विवधश्छंदोगिरश्छंदोभ्रजश्छंदं॑÷सर्ठ॑स्तुपछंदो॑नुष्टु-
पछंदऽएवश्छंदो॑वीरवश्छंदो॑वयश्छंदो॑वयस्कृश्छंदो-
विष्पर्द्धाश्छंदो॑विशालञ्छन्दो॑श्छदिश्छंदो॑दूरोहणंछंद-
स्तन्द्रञ्छन्दो॑ऽअङ्काङ्कञ्छंदं॑ः ॥ १५ ॥रश्मिना॑सत्या
यसत्यं॑जिन्वप्रेति॑नाधर्म॑णाधर्मं॑जिन्वान्वि॑त्यादिवा॑दिवं
जिन्वसंधिनान्तरि॑क्षेणान्तरि॑क्षंजिन्वप्रतिधिना॑पृथि-
व्यापृ॑थिवीं॑जिन्वविष्टंभेनवृष्ट्यावृष्टिं॑जिन्वप्रवयान्हाह॑
र्जिन्वानुयारात्र्यारात्रीं॑जिन्वो॑शिजावसुभ्यो॑वसूं॑जिन्व
प्रकेतेना॑दित्येभ्य॑ऽआदित्यां॑जिन्वतंतुनारायः॑ १६॥
तंतुनारायस्पोषे॑णरायस्पोषं॑जिन्वसर्ठ॑सर्प्पेण॑श्रुतायश्रु-
तं॑जिन्वैडेनौषधी॑भिरोषधी॑र्जिन्वोत्तमेनतनूर्जिभि॑स्तनू

न्वव्ययोसाधींतेनाधीतंजिन्वाभिजितातेजंसातेजोजि-
न्वा।१७।प्रतिपदंसिप्प्रतिपदेंत्वानुपदंस्यनुपदेंत्वासम्य-
दंसिसम्यदंत्वातेजोंसितेजसेत्वात्रिवृदंसि॥१८॥त्रिवृ-
दंसित्रिवृतंत्वाप्प्रवृदंसिप्प्रवृतेंत्वाविवृदंसिविवृत्तंत्वा-
संवृदं।सस्संवृत्तंत्त्वाक्रमोस्याक्रमायत्वासंक्रमोसिसंक्रमा
यत्त्वोत्क्रमोस्युत्क्रमायत्वोत्क्रान्तिरस्युत्क्रान्त्यैरस्यु-
त्क्रान्त्यैत्त्वाधिपतिनोर्ज्जर्जजिन्व ॥ १९॥ राज्ञंसिप्प्रा
चीदिग्वसंवस्तेऽदेवाऽअधिपतयोग्निर्हेतीनाम्प्रतिधर्त्ता-
त्रिवृत्वास्तोमःपृथिव्यांश्रयत्वाज्यमुक्थमव्यथायै-
स्तभ्नातुरथन्तरꣳसामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषय-
स्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तुव्विध-
र्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसँविदानानाकस्यपृष्ठेस्व
र्गेलोकेयजमानंचसादयंतु ॥ २० ॥ व्विराडंसिद
क्षिणादिग्रुद्रास्तेदेवाऽअधिपतयऽइन्द्रोहेतीनाम्प्रतिधर्त्ता

पंचदशस्त्वास्तोमः पृथिव्याᳯश्रयतुप्रउगमुक्थमव्यंथायैस्तभ्नतुबृहत्सामम्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानंचसादयंतु ॥ २१ ॥ संम्राडसिसिप्प्रतीचीदिगादित्यास्तेदेवाऽअधिपतयोव्वरुणोहेतीनाम्प्रतिधर्त्तासप्तदशस्त्वास्तोमःपृथिव्याᳯश्रयतुमरुत्वतीयमुक्थमव्यंथायैस्तभ्नतुव्वैरूपᳯसामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकस्यपृष्ठे ॥ २२ ॥ स्वराडस्युदीचीदिङ्मरुतस्तेदेवाऽअधिपतयःसोमोहेतीनाम्प्रतिधर्त्तैकविᳯशस्त्वास्तोमःपृथिव्याᳯश्रयतुनिष्केवल्यमुक्थमव्यंथायैस्तभ्नातुव्वैराजᳯसामप्प्रतिष्ठित्याऽअन्तरिक्षऽ

ऋषयस्त्वाप्प्रथममजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्वेसँव्विदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानंचसादयन्तु ॥ २३ ॥ अधिपत्न्यसिबृहतीदिग्विश्वेतेदेवाऽअधिपतयोबृहस्पतिर्हेतीनाम्प्रतिधर्त्तात्रिणवत्रयस्त्रिंशौत्त्वास्तोमौपृथिव्याᳫंश्रयतांवैश्वदेवाग्निमारुतेऽउक्थेऽअव्यथायैस्तभ्नीताᳫंशाक्वररैवतेसामनीप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथमन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्वेसँव्विदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानंचसादयंतु ॥ २४ ॥ अयम्पुरोहरिकेशःसूर्यरश्मिस्तस्यरथगृत्सश्चरथौजाश्चसेनानीग्रामण्यौपुंजिकस्थलाचक्रतुस्थलाचाप्सरसौदङ्क्ष्णवःपशवोहेतिःपौरुषेयोव्वधःप्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वेष्टितमेषांजम्भेद-

धमः ॥ २५ ॥ अयंदक्षिणाव्विश्वकर्म्मातस्यरथस्वन-
श्चरथंचित्रश्चसेनानीग्रामण्योमेनकाचंसहजन्याचाप्स
रसौयातुधानाहेतीरक्षांᳫंसिप्प्रहेतिस्तेभ्योनमोऽअस्तु
तेनोवन्तुतेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वेष्टितमेषांज-
म्भेदध्मः ॥ २६ ॥ अयम्पश्चाद्विश्वव्यचास्तस्य-
रथप्रोतश्चासंमरथश्चसेनानीग्रामण्योप्रम्लोचंतीचानु-
म्लोचंतीचाप्सरसौव्याग्घ्याहेतिᳫंसर्पाःप्रहेतिस्तेभ्यो-
नमोऽअस्तुतेनोवंतुतेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वे-
ष्टितमेषाञ्जम्भेदध्मः ॥ २७ ॥ अयमुत्तरात्संयद्वसु
स्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानीग्रामण्यौव्विश्वाचीं-
चघृताचींचाप्सरसावापोहेतिव्वातᳫंप्रहेतिस्तेभ्योनमो
ऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वेष्टित-
मेषांजम्भेदध्मः ॥ २८ ॥ अयमुपरि । अयमुपर्य्य-
र्वाग्ग्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानीग्रामण्यौउर्व-

शींच पूर्वचिंत्तिश्चाप्सरसाविवस्फूर्जन्हेतिर्विद्युत्प्रहेति-
स्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयंद्विष्मोय
श्चनोद्वेष्टितमेषांजम्भेदध्मः ॥ २९ ॥ ॐ मुतऽऋषं-
युःप्प्राति ॥ ३० ॥ मंत्रोक्ताऋषयस्तृप्यंताम् ॥
(वंशानांब्राह्मणम्) अथवर्ठंशः समानमासांजीवीपु-
त्रात्सांजीवीपुत्रोमाण्डूकायनेर्माण्डूकायनिर्माण्डव्या-
न्माण्डव्यःकौत्सात्कौत्सोमाहित्थेर्माहित्थिर्वामकक्षा-
यणाद्वामकक्षायणोव्वात्स्याद्वात्स्यःशाण्डिल्याच्छा-
ण्डिल्यःकुश्रेःकुश्रिर्यज्ञवचसोराजस्तंवायनाद्यज्ञवचा
राजस्तंवायनस्तुरात्कावषेयात्तुरःकावषेयःप्रजापतेःप्र
जापतिर्ब्रह्मणोब्रह्मस्वयंभुब्रह्मणेनमः ॥ वंशोक्ताऋषय-
स्तृप्यंताम् १ अथवर्ठंशस्तदिदंवयर्ठंशौर्पणाय्याच्छौ-
र्पणाय्योगौतमाद्गौतमोवात्स्याद्वात्स्योव्वात्स्याच्चपा-
राशर्य्याच्चपाराशर्य्यऽसांकृत्याच्चभारद्वाजाच्चभारद्वाज-

ऽऔदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजपायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्चात्रेयाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥ २ ॥ अग्निवेश्यऽसैतवात्सैतवः पाराशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वैजपायनाद्वैजपायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्य्यायणात्पाराशर्य्यायणः पाराशर्य्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआ-

त्रेयात् ॥ ३ ॥ आत्रेयात्आत्रेयोमांटेमांटिर्गौतमाद्गौत-
मोगौतमाद्गौतमोव्वात्स्याद्वात्स्यःशाण्डिल्याच्छांडि-
ल्यःकैशोर्यात्काप्यात्कैशोर्यःकाप्यःकुमारहारिता-
त्कुमारहारितोगालवाद्गालवोव्विदर्भीकौण्डिन्याद्विद-
र्भीकौण्डिन्योव्वत्सनपातोवाभ्रवाद्वत्सनपाद्वाभ्रवःप
थःसौभरात्पंथाःसौभरोऽयास्यादाङ्गिरसादयास्यआ
ङ्गिरसऽआभूतेत्स्वाष्ट्रादाभूतिस्त्वाष्ट्रोव्विश्वरूपात्त्वाष्ट्रा
त्व्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौदधीचआथर्वणाद्द-
ध्यङ्ङाथर्व्वणोदेवादथर्वादैवोमृत्योःप्राध्वर्ठंसनान्मृत्युः
प्राध्वर्ठंसनःप्राध्वर्ठंसनात्प्राध्वर्ठंसनऽएकर्षेरेकर्षिर्व्वि
प्रजित्तेर्व्विप्रजित्तिर्व्यष्टेर्व्यष्टिःसनारोःसनारुःसनात
नात्सनातनःसनगात्सनगःपरमेष्ठिनःपरमेष्ठीब्रह्मणो-
ब्रह्मस्वयंभुब्रह्मणेनमः । वंशोक्ताऋषयस्तृप्यंताम् ॥
॥ ४ ॥ अथव्वर्ठंशस्तदिदँव्वयर्ठंशौर्पणाय्याच्छौर्प-

णायोगौतमाद्गौतमोवात्स्याद् वात्स्योवात्स्याच्चपा-
राशर्याच्चपाराशर्य्यः सांकृत्याच्चभारद्वाजाच्चभारद्वाज
औदवाहेश्चशाण्डिल्याच्चशाण्डिल्योवैजवापाच्चगौत-
माच्चगौतमोवैजवापायनाच्चवैष्टपुरेयाच्चवैष्टपुरेयः
शाण्डिल्याच्चरौहिणायनाच्चरौहिणायनःशौनकायाच्च
जैवंतायनाच्चरैभ्याच्चरैभ्यःपौतिमाष्यायणाच्चकौंडि-
न्यायनाच्चकौण्डिन्यायनःकौण्डिन्याभ्यांकौण्डिन्य-
ऽऔर्णवामेभ्यऔर्णवामाःकौण्डिन्यात्कौण्डिन्यः
कौण्डिन्यात्कौण्डिन्यःकौण्डिन्याच्चाग्निवेश्याच्च ॥
॥ ९ ॥ आग्निवेश्यःसैतवात्सैतवःपाराशर्यात्पा-
राशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्वाजाद्भारद्वाजो-
भारद्वाजाच्चासुरायणाच्चगौतमाच्चगौतमोभारद्वाजाद्भा-
रद्वाजोवलाकाकौशिकाद्वलाकाकौशिकः काषायणा-
त्काषायणःसौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणिरौ-

पजंघनेरौपजंघनिः सायकायनात्सायकायनः कौ-
शिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिक-
ः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराश-
र्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भार-
द्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौ-
पजंघनेरौपजंघनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजोऽ-
आत्रेयात् ॥ ६ ॥ आत्रेयादात्रेयो माण्टेर्माण्टिर्गौत-
माद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्या
च्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमार
हारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डि-
न्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बा
भ्रवः पथः सौभरात्पंथाः सौभरो यास्यादांगिरासदया-
स्य आंगिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपा
त्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्व्व-

णाद्ध्यङ्गाथर्वणोदैवादथर्व्वादैवोमृत्योःप्राध्वर्ठंसना-
न्मृत्युप्राध्वर्ठंसनात्प्राध्वर्ठंसनऽएकर्षेरेकर्षिर्व्विप्रजित्ते
र्विप्रजित्तिर्व्यष्टेर्व्यष्टिःसनारोःसनारुःसनातनात्सना
तनःसनगात्सनगःपरमेष्ठिनःपरमेष्ठीब्रह्मणोब्रह्मस्वयं
भुब्रह्मणेनमः॥वंशोक्ताऋषयस्तृप्यंताम् ॥ ७॥ अथ-
व्वर्ठंशस्तदिदंवयंभारद्वाजीपुत्राद्भारद्वाजीपुत्रोव्वा-
त्सीमांडवीपुत्राद्वात्सीमांडवीपुत्रःपाराशरीपुत्रात्पारा
शरीपुत्रोगार्गीपुत्राद्गार्गीपुत्रःपाराशरीकौंडिनीपुत्रात-
पाराशरीकौंडिनीपुत्रोगार्गीपुत्राद्गार्गीपुत्रोगार्गीपुत्रा-
द्गार्गीपुत्रोवाडेयीपुत्राद्वाडेयीपुत्रोमौषिकीपुत्रान्मौषि-
कीपुत्रोहारिकर्णीपुत्राद्धारिकर्णीपुत्रोभारद्वाजीपुत्राद्भा-
रद्वाजीपुत्रःपैङ्गीपुत्रात्पैङ्गीपुत्रःशौनकीपुत्राच्छौन-
कीपुत्रः ॥ ८ ॥ काश्यपीवालाक्यामाठरीपुत्रात्
काश्यापीवालाक्यामाठरीपुत्रःकौत्सीपुत्रात्कौत्सीपु-

त्रोवौधीपुत्राद्वौधीपुत्रःशालङ्कायनीपुत्राच्छालङ्काय-
नीपुत्रोव्वार्षगणीपुत्राद्वार्षगणीपुत्रोगौतमीपुत्राद्गौतमी
पुत्रऽआत्रेयीपुत्रादात्रेयीपुत्रोगौतमीपुत्राद्गौतमीपुत्रोव्वा
त्सीपुत्राद्वात्सीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रःपारा-
शरीपुत्रात्पाराशरीपुत्रोव्वार्कारुणीपुत्राद्वार्कारुणी-
पुत्रऽआर्त्तभागीपुत्रादार्त्तभागीपुत्रःशौङ्गीपुत्राच्छौङ्गी-
पुत्रःसांकृतीपुत्रात्सांकृतीपुत्रः ॥ ९ ॥ आलंबीपु-
त्रादालंबीपुत्रऽआलंवायनीपुत्रादालंवायनीपुत्रो-
जायन्तीपुत्राज्जायन्तीपुत्रोमांडूकायनीपुत्रान्मांडू-
कायनीपुत्रोमांडूकीपुत्रान्मांडूकीपुत्रःशांडिलीपुत्रा-
च्छांडिलीपुत्रोराथीतरीपुत्राद्राथीतरीपुत्रःक्रौंचिकी-
पुत्राभ्यांक्रौंचिकीपुत्रोवैदभृतीपुत्राद्वैदभृतीपुत्रोभालु-
कीपुत्राद्भालुकीपुत्रःप्राचीनयोगीपुत्रात्प्राचीनयोगी-
पुत्रःसांजीवीपुत्रात्सांजीवीपुत्रःकार्शकेयीपुत्रात्कार्श-

केयीपुत्रः ॥ १० ॥ प्राश्नीपुत्रादासुरीवासिनःप्राश्नी पुत्रआसुरायणादासुरायणआसुरेरासुरिर्याज्ञवल्क्याद्या ज्ञवल्क्यउद्दालकादुद्दालकोरुणादरुणउपवेशेरुपवेशिः कुश्रेःकुश्रिर्व्वाजश्रवसोवाजश्रवाज्जिह्वावतोवाध्योगा- ज्जिह्वावान्वाध्योगोसिताद्वार्षगणादसितोव्वार्षगणो- हरितात्कश्यपाद्धरितःकश्यपःशिल्पात्कश्यपाच्छि ल्पःकश्यपःकश्यपान्नैध्रुवेःकश्यपोनैध्रुविर्व्वाचोव्वाग- म्भिण्याअम्भिण्यादित्यादादित्यानिमानिशुक्लानि- यजूंषिव्वाजसनेयेनयाज्ञवल्क्येनाख्यायन्ते॥ ११ ॥ वंशोक्ताऋषयस्तृप्यंताम् । इमावेवगौतमभारद्वाजाव- यमेवगौतमोयंभारद्वाजइमावेवव्विश्वामित्रजमदग्नीअय मेवव्विश्वामित्रोयंजमदग्निरिमावेवव्वसिष्ठकश्यपावय मेवव्वसिष्ठोयंकश्यपोव्वागेवात्रिर्व्वाचाह्यन्नमद्यतेतिहवै नामैतद्यदत्रिरितिसर्व्वस्यात्ताभवतिसर्व्वमस्यान्नम्भव-

तिय ऽएवँव्वेद ॥ १२ ॥ ब्राह्मणोक्ता ऋषयस्तृप्यंताम् । ॐ तत्सवितुरिति चतुर्वारं गायत्रीं पठेत् । इति प्रतिवंशवंशोक्तानामृषीणां तर्पणम् । ततः सर्वे ॐ विरताः स्म इति सकृदुच्चैर्ब्रूयुः ॥

॥ अथाध्ययनक्रमः ॥

अध्यायाः ॥ ॐइषेत्वोर्जेत्वावायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥ कृष्णोऽस्याखरेष्ठोऽग्नयेत्वाजुष्टंप्रोक्षामि॥वेदिरसिबर्हिषेत्वाजुष्टंप्रोक्षामिबर्हिरसिस्रुग्भ्यस्त्वाजुष्टंप्रोक्षामि ॥ २ ॥ समिधाग्निंदुवस्यतघृतैर्बोधयतातिथिम् ॥ आस्मिन्हव्याजुहोतन ॥ ३ ॥ एदमगन्मदेवयजनंपृथिव्यायत्रदेवासोऽअजुषन्तविश्वेऽऋक्सा

माभ्याᳬंसन्तरन्तोयजुर्भीरायस्पोषेणसमिषामदेमऽइ
माऽआपःशमुमेसन्तुदेवीःओषधेत्रायस्वस्वधितेमैनᳬं-
हिᳬंसीः ॥ ४ ॥ अग्नेस्तनूरसिविष्णवेत्वासोम-
स्यतनूरसिविष्णवेत्वातिथेरातिथ्यमसिविष्णवेत्वा-
श्येनायत्वासोमभृतेविष्णवेत्वाग्नयेत्वारायस्पोषदेवि-
ष्णवेत्वा ॥ ५ ॥ देवस्यत्वासवितुःप्रसवेऽश्विनो-
र्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ आददेनार्यसिइदमहᳬं-
रक्षसांग्रीवाऽअपिकृन्तामि॥ यवोसियवयास्मद्द्वेषायव-
यारातीः ॥ दिवेत्वान्तरिक्षायत्वापृथिव्यैत्वाशुन्धन्तां-
लोकाःपितृषदनाःपितृषदनमसि ॥ ६ ॥ वाचस्पतये
पवस्ववृष्णोऽअᳬंशुभ्यांगभस्तिपूतःदेवोदेवेभ्यःपवस्व
येषाभागोऽसि ॥ ७ ॥ उपयामगृहीतोऽसिआदित्ये-
भ्यस्त्वाविष्णऽउरुगायैषतेसोमस्तᳬंरक्षस्वमात्वादभन्
॥ ८ ॥ देवसवितःप्रसुवयज्ञं प्रसुवयज्ञपतिंभगाय

दिव्योगंधर्वः केतपूः केतंनः पुनातुवाचस्पतिर्वाजंनः स्वदतुस्वाहा ॥ ९ ॥ अपोदेवामधुमतीरगृभ्णंनूर्जस्वतीराजस्वश्चितानाः ॥ याभिर्मित्रावरुणावभ्यषिंचन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १० ॥ युंजानः प्रथमंमनस्तत्त्वायसविताधियं ॥ अग्नेर्ज्योतिर्निचाय्यपृथिव्याऽअध्याभरत् ॥ ११ ॥ इशानोरुक्मऽउर्व्याव्यद्यौद्दुर्मर्षमायुः श्रियेरुचानः अग्निरमृतोऽअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः ॥ १२ ॥ मयिगृह्णाम्यग्रेऽअग्निंरायस्पोषायसुप्रजास्त्वायसुवीर्य्यायमामुदेवताःसचंताम् ॥ १३ ॥ ध्रुवासिधरुणास्तृताविश्वकर्म्मणा ॥ ध्रुवाक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवंयोनिमासीदसाधुया ॥ उख्यस्यकेतुंप्रथमंजुषाणाऽअश्विनाध्वर्यूसादयतामिहत्वा ॥ १४ ॥ अग्नेजातान्प्रणुदनःसपत्नान्प्रत्यजातान्नुदजातवेदः अधिनोब्रूहिसुमनाऽअहेडँस्तवस्यामशर्मंस्त्रिवरूथउद्भौ ॥

॥ १५ ॥ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः॥ बाहु-भ्यामुततेनमः ॥ १६ ॥ अस्मन्नूर्जंपर्वतेशिश्रियाणामद्भ्यऽओषधीभ्योवनस्पतिभ्योऽअधिसम्भृतंपयः तांनऽइषमूर्जंधत्तमरुतःसर्ठ०रराणाऽअश्मंस्तेक्षुन्मयितऊर्ग्यंद्विष्मस्तन्तेशुगृच्छतु ॥१७॥ वाजश्चमे प्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्रावश्चमेश्रुतिश्चमेज्योतिश्चमेस्वश्चमेयज्ञेनकल्पंताम् ॥ १८ ॥ स्वाद्वीन्त्वास्वादुनातीव्रांतीव्रेणामृतांममृतेनमधुमतीमधुमताऽसृजामिसर्ठ०सोमेनसोमोऽस्यश्विभ्यांपच्यस्वसरस्वत्यैपच्यस्वऽइंद्रायसुत्राम्णेपच्यस्व ॥ १९ ॥ क्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसिमात्वाहिर्ठ०सीन्मामाहिर्ठ०सीः ॥ २० ॥ इमंमेव्वरुणश्रुधीहवमद्याचमृडयत्वामवस्युराचके ॥ २१ ॥ तेजोऽसिशुक्रममृतमायुष्पाऽआयुर्मेपाहि॥देवस्यत्वास

वितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे २२॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसी-
त् ॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधे-
म ॥ २३ ॥ अश्वस्तूपरो गोमृगस्ते प्राजापत्याः ॥ कृ-
ष्णग्रीव आग्नेयो रराटे पुरस्तात्सारस्वती मेष्यधस्ताद्ध-
न्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामो ना-
भ्याᳬं सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमश-
सक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेह
द्वैष्णवो वामनः ॥ २४ ॥ शादं दद्भिरवकां दन्तमूलै-
र्मृदं बर्स्वैस्तेगान्दᳬंष्ट्राभ्याᳬं सरस्वत्या अग्रजिह्वं जि-
ह्वाया उत्सादमवक्रन्देन तालु बाजᳬं हनुभ्यामप आस्येन
वृषणमाण्डाभ्यामादित्याᳬं श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावा-
पृथिवी वर्तोभ्यां विद्युतं कनीनकाभ्याᳬं शुक्लाय स्वाहा कृ-
ष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्या इक्षवोऽवार्याणि

पक्ष्माणिपार्थ्योऽइक्षवं ॥ २५ ॥ अग्निश्चपृथिवीच-
सन्नंतेतेमेसन्नमतामदोवायुश्चांतरिक्षंचसन्नंतेतेमेसन्नम-
तामदऽआदित्यश्चद्यौश्चसन्नंतेतेमेसन्नमतामदऽआपश्चव
रुणश्चसन्नंतेतेमेसन्नमतामद१॥सप्तसठंसदोअष्टमीभूत-
साधनीसकामा २ ॥ ऽअध्वनस्कुरुसंज्ञानमस्तुमेऽमु-
ना ॥ २६ ॥ समास्त्वाग्नऽऋतवोवर्धयन्तुसंवत्स-
राऽऋषयोयानिसत्यासंदिव्येनदीदिहिरोचनेनविश्वा-
ऽआभाहिप्रदिशश्चतस्रः ॥ २७ ॥ होतायक्षत्समिधे
न्द्रमिडस्पदेनाभापृथिव्याऽअधि॥दिवोवर्ष्मन् समि-
ध्यतऽओजिष्ठश्चर्षणीसहांवेत्वाज्यस्यहोतर्यज ॥२८॥
समिद्धोऽअञ्जन्कृदरंमतीनांघृतमग्नेमधुमत्पिन्वमानः
॥ वाजीवहन्वाजिनंजातवेदोदेवानांवक्षिप्रियमासध-
स्थम् ॥ २९ ॥ देवसवितःप्रसुवयज्ञंप्रसुवयज्ञपतिं-

८

भर्गायदिव्योगंधर्वः केतपूः केतंनः पुनातुवाचस्पतिर्वा-
जंनः स्वदतु ॥ ३० ॥ सहस्रशीर्षापुरुषः सहस्राक्षः स
हस्रपात् ॥ सभूमिᳫं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥
॥ ३१ ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचंद्रमाः ॥
तदेवशुक्रंतद्ब्रह्मताऽआपः सप्रजापतिः ॥ ३२ ॥ अस्या-
जरासोदमामरित्राऽअर्चद्धूमासोऽअग्नयः पावकाः ॥
श्वितीचयः श्वात्रासोभुरण्यवोवनर्षदोवायवोनसोमाः
॥ ३३ ॥ यज्जाग्रतोदूरमुदैतिदैवंतदुसुप्तस्यतथैवैति ॥
दूरङ्गमञ्ज्योतिषांज्योतिरेकंतन्मेमनः शिवसंकल्पम-
स्तु ॥ ३४ ॥ अपेतोयंतुपणयोऽसुम्नादेवपीयवः ॥
अस्यलोकः सुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तंयमोद-
दात्ववसानमस्मै ॥ ३५ ॥ ऋचंवाचंप्रपद्येमनोयजुः प्र-
पद्येसामप्राणंप्रपद्येचक्षुः श्रोत्रंप्रपद्येवागोजः सहोजोम-
यिप्राणापानौ ॥ ३६ ॥ देवस्यत्वासवितुः प्रसवेऽश्वि

नौबाहुभ्यांपूष्णोहस्ताभ्याम्॥ आददेनारिरसि॥३७॥ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥आददेऽदित्यैरास्नासि ॥ ३८ ॥ स्वाहाप्राणेभ्यः साधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाऽअग्नयेस्वाहाऽन्तरिक्षायस्वाहा॥ वायवेस्वाहादिवेस्वाहासूर्यायस्वाहा ॥ ३९ ॥ ईशावास्यमिदꣳसर्वंयत्किंचजगत्यांजगत् ॥ तेनत्यक्तेनभुञ्जीथामागृधःकस्यस्विद्धनम्॥ ॥४०॥ हिरण्मयेनपात्रेणसत्यस्यापिहितम्मुखम्॥ योसावादित्येपुरुषःसोऽसावहम् १ ॐ २ खंब्रह्म । अध्यायोक्ताऋषयस्तृप्यन्ताम् ॥

अथ शतानि ॥ ॐइषेत्वोर्जेत्वा० ॥ १ ॥ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः॥अथोयऽइषुधिस्तवारे अस्मन्निधेहितम् १६ । १२ ॥ २ ॥ अग्नेनयसुपथारायेऽअस्मान्विश्वानिदेववयुनानिविद्वान्।युयोध्य-

ऽमज्जुहुराणमेनोभूयिंष्ठांतेनमऽउक्तिंविधेम ५ । ३६ ॥ ३ ॥ उपयामगृहीतोसिसुशर्मासिसुप्रतिष्ठानोबृहदुक्षा-यनमः॥विश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वा-देवेभ्यः ८ । ८ ॥ ४ ॥ सोमस्यत्विषिरसितवेवमेत्वि-षिर्भूयात्मृत्योःपाहिऽओजोसिसहोस्यमृतमसि १० । ५ । ५ ॥ परस्याऽअधिसंवतोवराँ २॥ ऽअभ्यातर ॥ यत्राहमस्मितां २ ॥ ऽअव ११ । ७१ ॥ ६ ॥ अ-न्न्यावोऽअन्न्यामवत्वन्न्यान्यस्याऽउपावत ॥ ताःस-र्वाःसंविदानाऽइदंमेप्रावताव्वचः १२ । ८८ ॥ ॥ ७ ॥ राज्ञ्यसिप्राचीदिक्विराडसिदक्षिणादिक्-सम्राडसिप्रतीचीदिक्स्वराडस्युदीचीदिगधिपत्न्या-सिबृहतीदिक् १४ । १३ ॥ ८ ॥

नमोहिरण्यबाहवेसेनान्यदिशांचपतयेनमोनमोवृक्षे-भ्योहरिकेशेभ्यःपशूनांपतयेनमोनमःशष्पिंजराय-

त्विषींमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानांपतयेनमोनमोबभ्लुशाय १६ । १७ ॥ ९ ॥ इंद्रेमंप्रतरांनयसजातानांमसद्वशीसमेनंवर्चसासृजदेवानांभागदाऽअसत् १७ । ५१ ॥ १० ॥ इमौतेपक्षावजरौपतत्रिणौयाभ्याᳫंरक्षाᳫंस्यपहᳫंस्यग्नेताभ्यांपतेमसुकृतामुलोकंयत्रऽऋषयोजग्मुःप्रथमजाःपुराणाः १८ । ५२ ॥ ११ ॥ अन्नात्परिस्रुतोरसंब्रह्मणा० १९ । ७५ ॥ १२ ॥ अश्विनातेजसाचक्षुःप्राणेनसरस्वतीवीर्यम् ॥ वाचेंद्रोबलेनेन्द्रायदधुरिन्द्रियम् २० । ८० ॥ १३ ॥ पृथिव्यैस्वाहान्तरिक्षायस्वाहादिवेस्वाहासूर्यायस्वाहाचंद्रायस्वाहानक्षत्रेभ्यःस्वाहौषधीभ्यःस्वाहावनस्पतिभ्यःस्वाहापरिप्लवेभ्यःस्वाहाचराचरेभ्यःस्वाहासरीसृपेभ्यःस्वाहा २२ । २९ ॥ १४ ॥ प्रजापतयेचवायवेचगोमृगोवरुणायारण्योमेषो

समायकृष्णोमनुष्यराजायमर्कटः शार्दूलायरोहिद्दृष-भायंगवयीक्षिप्रश्येनायवर्तिकानीलङ्गोःक्रमिः समुद्रायंशिशुमारोहिमवतेहस्ती२४।३०॥१५॥तेऽअस्यसोषणेदिव्येनयोनाउषासानक्ता ॥इमंयज्ञमवतामध्वरंनः २७। १७॥ १६ ॥तनूनपात्पथऽऋतस्ययानान्मध्वासमञ्जन्स्वदयासुजिह्वमन्मानिधीभिरुतयज्ञमृधन्देवत्राचकृष्णुह्यध्वरंनः२९।२६ ॥ १७ ॥ अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे २२। ६ ॥ १८ ॥ अनुनोऽद्यानुमतिर्यज्ञंदेवेषुमन्यतामअग्निश्चहव्यवाहनोभवतंदाशुषेमयः॥१९॥इयत्यग्रऽआसीन्मखस्यतेद्यशिरोराध्यासंदेवयजनेपृथिव्याःमखायत्वामखस्यत्वाशीर्ष्णे ३७। ५ ॥ २० ॥

अथ कण्डिकाः ॥ व्रतमुपैष्यम् ॥ १ ॥ सर्वेक

पालान्यवान्यतरऽउपदधाति ॥ २ ॥ सवैस्रुचःसंमार्ष्टि ॥ ३ ॥ हिङ्कृत्यान्वाह ॥ ४ ॥ सवैप्रवरायाश्रावयति ॥ ५ ॥ ऋतवोहवैदेवेषुयज्ञेभागमीषिरे॥ ६ ॥ सवैपर्णशाखयावत्सानपाकरोति॥७॥ मनवेहवैप्रातः ॥ ८ ॥ सयत्राह ॥ ९ ॥ ससमुद्राइतश्चेतश्च संभरन्ति ॥१०॥ उद्धृत्याहवनीयम्पूर्णाहुतिंजुहोति॥ ॥ ११ ॥ सूर्योहवाऽअग्निहोत्रम् ॥ १२ ॥ अथहुतेऽग्निहोत्रमुउपतिष्ठते ॥ १३ ॥ प्रजापतिर्हवाऽइदमग्रऽएकऽएवास ॥ १४ ॥ पितामहाहविषाहवैदेवावृत्रञ्जघ्नुः ॥ १५ ॥ देवयजनंजोषयन्ते ॥१६ ॥ दक्षिणेनाहवनीयंप्राचीनग्रीवेकृष्णाजिनेऽउपस्तृणाति ॥ ॥ १७ ॥ सप्तपदान्यनुनिष्क्रामति ॥ १८ ॥ शिरोवैयज्ञस्यातिथ्यंबाहूप्रायणीयोदनीयौ ॥ १९ ॥ तद्य एषपूर्वार्ध्योवर्षिष्ठस्थूणराजोभवति ॥ २० ॥ उदरमे-

वास्यसदः ॥ २१ ॥ अग्निमादत्ते ॥ २२ ॥ तद्य-त्रैतत्प्रवृत्तोहोताहोतृषदनऽउपविशति ॥ २३ ॥ प्रजा-पतिर्व्वैप्रजाःसमृजानोरिरिचानऽइमामन्यत ॥ २४ ॥ प्राणोहव्वाऽअस्योपाᳫंशुः ॥ २५ ॥ चक्षुषीहव्वाऽ अस्यशुक्रामन्थिनौ ॥ २६ ॥ भक्षयित्वासमुपहूताः स्मऽइत्युक्त्वोत्तिष्ठति ॥ २७ ॥ मनोहवाऽअस्यसविता ॥ ॥ २८ ॥ आदित्येनचरुणोदयनीयेनप्रचरती ॥ २९ ॥ प्रजापतिर्व्वाऽएषसुदर्ठᳫंशुः ॥ ३० ॥ देवाश्चवाअसुरा-श्च ॥ ३१ ॥ अथस्रुवञ्चाज्यविलापनींचादाय ॥ ३२ ॥ अरण्योरग्नीसमारोह्य ॥ ३३ ॥ केशान्स्यपुरुषस्य ॥ ॥ ३४ ॥ आग्नेयोष्टाकपालःपुरोडाशोभवति ॥ ३५ ॥ असद्वाऽइदमग्रऽआसीत् ॥ ३६ ॥ प्रजापतिरग्निरूपा-ण्यभ्यधारयत् ॥ ३७ ॥ द्वितीयम् एतद्वैदेवाऽअब्रुवन् ॥ ॥ ३८ ॥ अथैनमतःस्तुनत्येव ॥ ३९ ॥ पर्णकषा-

यनिष्पक्काऽएताऽआपोभवंति ॥ ४० ॥ भूयाᳬंसिह-
वीᳬंषिभवन्ति ॥ ४१ ॥ रुक्मम्प्रतिमुच्चबिभर्त्ति ॥
॥ ४२ ॥ व्वनीवाह्येताग्निंविभ्रदित्याहुः ॥ ४३ ॥
गार्हपत्यंचेष्यन्पलाशशाखयाव्युदूहति ॥ ४४ ॥
अथातोनैर्ऋतिर्हरन्ति ॥ ४५ ॥ चितोगार्हपत्योभ-
वति ॥ ४६ ॥ आत्मन्यग्निंगृह्णीतेचेष्यन् ॥ ४७ ॥
कूर्म्ममुपदधाति ॥ ४८ ॥ प्राणभृतउपदधाति ॥
॥ ४९ ॥ द्वितीयांचितिमुपदधाति ॥ ५० ॥ तृती-
यांचितिमुपदधाति ॥ ५१ ॥ चतुर्थींचितिमुपदधाति
॥ ५२ ॥ पंचमींचितिमुपदधाति ॥ ५३ ॥ ना-
कसदउपदधाति ॥ ५४ ॥ ऋतव्याउपदधाति ॥
॥ ५५ ॥ अथातश्शतरुद्रियंजुहोति ॥ ५६ ॥ उप-
वसथीवेहन्प्रातरुदितआदित्ये ॥ ५७ ॥ अथातोवै-
श्वानरंजुहोति ॥ ५८ ॥ अथातोराष्ट्रभृतोजुहोति ॥

॥ ५९ ॥ अथातःपयोव्रततायै ॥ ६० ॥ अग्निरेष-पुरस्ताच्चीयते ॥ ६१ ॥ प्रजापतिःस्वर्गंलोकमजिगा-ᳪंसत् ॥ ६२ ॥ प्राणोगायत्री ॥ ६३ ॥ प्रजापतिं-व्विस्रस्तम् ॥ ६४ ॥ तस्यवाएतस्याग्नेः ॥ ६५ ॥ अथहैतेरुणे ॥ ६६ ॥ सँवत्सरोवैयज्ञःप्रजापतिः ॥ ॥ ६७ ॥ त्रिर्हवैपुरुषोजायते ॥ ६८ ॥ व्वाग्घवा-एतस्याग्निहोत्रस्याग्निहोत्री ॥ ६९ ॥ उद्दालकोहा-रुणिः ॥ ७० ॥ उर्वशीहाप्सराः ॥ ७१ ॥ भृगुर्ह-वैवारुणिः ॥ ७२ ॥ पशुबंधेनयजते ॥ ७३ ॥ तद्य-थाहवै ॥ ७४ ॥ अयंवैयज्ञोयोयंपवते ॥ ७५ ॥ स-मुद्रंवाएतेप्रचरन्ति ॥ ७६ ॥ यद्वालोके ॥ ७७ ॥ दीर्घसत्रᳪंहवाएतउपयन्ति ॥ ७८ ॥ तदाहुर्यदेषदी-र्घसत्री ॥ ७९ ॥ सोमोवैराजायज्ञःप्रजापतिः ॥ ८० ॥ व्विश्वरूपँव्वैत्वाष्ट्रमिंद्रोहन् ॥ ८१ ॥ इन्द्रस्यवैयत्र ॥

॥ ८२ ॥ एतस्माद्वैयज्ञात्पुरुषोजायते ॥ ८३ ॥ ब्रह्मौदनंपचति ॥ ८४ ॥ प्रजापतिर्देवेभ्योयज्ञान्व्यादिशत् ॥ ८५ ॥ प्रजापतेरक्ष्यस्वयत् ॥ ८६ ॥ उत्तमं प्रजापतिरकामयत ॥ ८७ ॥ अथप्रातर्गौतमंम्य ॥ ॥ ८८ ॥ पुरुषोहनारायणोकामयत ॥ ८९ ॥ ब्रह्म वैस्वयंभुतपोतप्यत ॥ ९० ॥ अथास्मैश्मशानंकुर्वं तिद्यौःशान्तिः ॥ ९१ ॥ देवाहवैसत्रंनिषेदुः ॥ ९२ ॥ अथातोरौहिणौजुहोति ॥ ९३ ॥ सवैतृतीयेहन् ॥ ॥ ९४ ॥ द्व्याहप्राजापत्याः ॥ ९५ ॥ दृप्तबालाकिर्हा नूचानोगार्ग्यआस ॥ ९६ ॥ जनकोहवैदेहः ॥ ॥ ९७ ॥ जनकंहवैदेहंयाज्ञवल्क्योजगाम ॥ ९८ ॥ पूर्णमदःपूर्णमिदम् ॥ ९९ ॥ श्वेतकेतुर्हवाआरुणेयः ॥ ॥ १०० ॥ प्राश्नीपुत्रादासुरिवासिनः चतुर्दशकाण्डेष्वध्यायोक्ता ऋषयस्तृप्यंताम् ॥

अथ प्रपाठकाः । व्रतमुपैष्यन् ॥ १ ॥ चतुर्द्धा विहितोहवाअग्रेग्निरास ॥ २ ॥ तेवाआर्द्राःस्युः ॥ ॥ ३ ॥ सस्रुचोत्तरमाघारमाघारयिष्यन् ॥ ४ ॥ यज्ञेनवैदेवाः ॥ ५ ॥ यज्ञेनवैदेवादिवमुपोदक्रामन् ॥ ॥ ६ ॥ सर्वैस्रुचोव्यूहति ॥ ७ ॥ ससद्राइतश्चेतश्चसंभरति ॥८॥ व्वरुणोहैनद्राज्यकामआदधे ॥९ ॥ यत्रवै-प्रजापतिःप्रजाःससृजे ॥ १० ॥ प्रजापतिर्हवाएतेनाग्रेयज्ञेनेजे ॥ ११ ॥ महाहविषाहवैदेवाव्वृत्रंजघ्नुः ॥ ॥ १२ ॥ देवयजनंजोषयन्ते ॥ १३ ॥ वाचंयच्छति ॥ १४ ॥ नीडेकृष्णाजिनमास्तृणाति ॥ १५ ॥ तद्वएषपूर्वोर्ध्योव्वापिष्ठस्थूणाराजोभवति ॥ १६ ॥ व्विजामानोहैवास्यधिष्ण्याः ॥ १७ ॥ पाशकृत्वाप्रतिमुञ्चति ॥ १८ ॥ सोत्युपयजति ॥ १९ ॥ प्राणोहवाअस्योपाᳪशुः ॥ २० ॥ आत्माहवाअस्या-

ग्रयणः ॥ २१ ॥ ग्रंतिवाएतद्यज्ञम् ॥ २२ ॥ सवा-
अवभृथमभ्यवैति ॥ २३ ॥ तद्यत्रैतद्द्वादशाहेनव्यूढच्छं
दसायजते ॥ २४ ॥ देवाश्चवाअसुराश्च ॥ २५ ॥
बार्हस्पत्येनचरुणाप्रचरति ॥ २६ ॥ सवाअपऽसंभ-
रति ॥ २७ ॥ मैत्रावरुण्यापयस्ययाप्रचरति ॥२८॥
असद्वाइदमग्रआसीत् ॥ २९ ॥ प्राजापत्यंचरुंकाआ-
लंभते ॥ ३० ॥ प्रदीताएतेग्रयोभवन्ति ॥ ३१ ॥
तस्याएतस्याआषाढांपूर्वांकरोति ॥ ३२ ॥ रुक्मंप्र-
तिमुंचबिभर्ति ॥ ३३ ॥ गार्हपत्यंचेष्यन्पलाशशा-
खयाव्युदूहति ॥ ३४ ॥ अथदर्भस्तंबमुपदधाति ॥
॥ ३५ ॥ आत्मन्नग्निंगृह्णीतेचेष्यन् ॥ ३६ ॥ कूर्ममु-
पदधाति॥३७॥प्राणभृतउपदधाति॥३८॥ अथविश्व-
ज्ज्योतिषमुपदधाति ॥ ३९ ॥ अथातोवृतम् ॥४०॥
गार्हपत्यमुपदधाति ॥ ४१ ॥ अथातःशतरुद्रियंजु-

होति ॥ ४२ ॥ प्रत्येत्यग्निंप्रहरिष्यन् ॥ ४३ ॥ अथैतानयज्ञक्रतूञ्जुहोति ॥ ४४ ॥ अथप्रातः ॥४५॥ प्रातरनुवाकमुपाकरिष्यन् ॥ ४६ ॥ अग्निरेषपुरस्ताच्चीयते ॥ ४७ ॥ अथातश्चयनस्यैव ॥ ४८ ॥ संवत्सरोवैप्रजापतिरग्निः ॥ ४९ ॥ नेववाइदमग्रेसदासीन्नैवसदासीत् ॥ ५० ॥ संवत्सरोवैयज्ञःप्रजापतिः॥ ॥ ५१ ॥ अपिहवाएतर्हि ॥ ५२ ॥ प्रजापतिर्वैप्रजाः सृजमानोऽतप्यत ॥ ५३ ॥ अथातःस्वाध्यायप्रशꣳसा ॥ ५४ ॥ अयंवैयज्ञोयोऽयंपवते ॥ ५५ ॥ पुरुषꣳहनारायणंप्रजापतिरुवाच ॥ ५६ ॥ सोमोवैराजायज्ञःप्रजापतिः ॥ ५७ ॥ प्रजापतिर्यज्ञमसृजत ॥ ॥ ५८ ॥ ब्रह्मौदनंपचति ॥ ५९ ॥ नियुक्तेषुपशुषु॥ ॥ ६० ॥ प्रमुच्याश्वंदक्षिणेनवेदिम् ॥ ६१ ॥ पुरुषोहनारायणोऽकामयत ॥ ६२ ॥ देवाहवैसत्रन्निषेदुः॥६३॥

मयत्रेताꣳहोताचाह ॥ ६४ ॥ द्वयाहप्राजापत्याः ॥
॥ ६५ ॥ दृप्तबालाकिर्हानूचानोगार्ग्यआस ॥ ६६ ॥
अथहैनंभुज्युर्लाह्यायनिःपप्रच्छ ॥ ६७ ॥ जनकꣳ
हवैदेहंयाज्ञवल्क्योजगाम ॥ ६८ ॥ भूमिरंतरिक्षंद्यौरि-
ति ॥ ६९ ॥ प्राश्नीपुत्रादासुरीवासिनः ॥ ७० ॥
इति चतुर्दशकांडे प्रपाठोक्ता ऋषयस्तृप्यंताम् ॥ इति
प्रपाठकाः ॥

अथ शतस्थानानि ॥ व्रतमुपैष्यन् ॥ १ ॥ तद्य-
देवंपिनष्टि ॥ २ ॥ अथाजलिताभ्यांपवित्राभ्याम् ॥
॥ ३ ॥ बृहच्छौचाषविष्टयेति ॥ ४ ॥ व्वसूनाꣳरा-
त्रौस्याम ॥ ५ ॥ अग्निर्वैदेवानामद्धातमाम् ॥ ६ ॥
तद्यथायोनौरेतःसिञ्चेत् ॥ ७ ॥ तांवैप्राश्नंत्येव ॥ ८ ॥
अथव्वेदपत्नीव्विस्रꣳसयति॥९॥ असंवैयज्ञोयोयंपवते
॥ १० ॥ अथयदस्तमेति ॥ ११ रेवतीरमध्यमिति ॥

॥ १२ ॥ सवाआग्नेयोष्टाकपालःपुरोडाशोभवति ॥ ॥ १३ ॥ तद्येसोमेनेजानाः ॥ १४ ॥ अथोत्तरेण-शालांपरिश्रयन्ति ॥ १५ ॥ अथोल्लिखति ॥ १६ ॥ सायाबभ्रुःपिङ्गाक्षीसासोमक्रयणीस्यात् ॥ १७ ॥ प्रथमंतेदेवाः ॥ १८ ॥ इंद्रघोषःप्रोक्षणीरध्वर्युराद-त्ते ॥ १९ ॥ साहाकद्रूरुवाच ॥ २० ॥ तद्यएतउ-च्छ्रितादेवाहवैयज्ञन्तन्वानाः ॥ २१ ॥ अथपार्श्वेन-वासिनावाप्रयौति ॥ २२ ॥ सजुहोतिशृणोत्वग्निःस-मिधाहवंमइति ॥ २३ ॥ इयर्ठ्ंहवाउपाᳬंशुः॥२४॥ तस्यासावेवद्ध्रुवआयुः ॥ २५ ॥ यत्रद्यावापृथिव्यर्ठ्ं शस्यते॥ २६ ॥ सआज्यस्योपस्तीर्यद्विश्वरोखद्यति॥ ॥२७॥इन्द्रोहवैषोडशी॥२८॥तासांद्वादशगर्भाः२९॥ द्वितीयातद्येहस्मपुराव्वाजपेयेनयजंते ॥ ३० ॥ अथ दिशोनुवीक्ष्यमाणोजपति ॥ ३१ ॥ सवैदीक्षते॥३२॥

अथैतमभिषेकंकृष्णविषाणयानुविमृष्टे ॥ ३३ ॥ षडेवोत्तरेचखः ॥ ३४ ॥ अथोआहुःप्रजापतिरेववि-स्रस्तः ॥ ३५ ॥ अमावास्यायांदीक्षते ॥ ३६ ॥ अश्वस्यपदेजुहोति ॥ ३७ ॥ अथैनांधूपयति ॥ ॥ ३८ ॥ तमुपरिनाभिबिभर्ति ॥ ३९ ॥ अथोखान्नि-वपति ॥ ४० ॥ द्वितीयाचतस्रःसीतायजुषाकृषति ॥ ॥ ४१ ॥ तंप्रत्यंचवपन्तम् ॥४२॥ अपाङ्गभत्सीदेति॥ ॥ ४३ ॥ तस्यमनोवैश्वकर्मणमिति ॥ ४४ ॥ तद्वै-षामध्यमास्वयमातृण्णा ॥ ४५ ॥ एकादशभिरस्तु-वतेति ॥ ४६ ॥ तावाएतादशेष्टकाउपदधाति ॥४७॥ अथस्वयंतृणमुपदधाति ॥ ४८ ॥ अथोत्तरार्द्धेन-प्राक् ॥ ४९ ॥ सयःसवैश्वानरइमेसलोकाः ॥ ५० ॥ यास्तेऽअग्नेसूर्येरुचः ॥ ५१ ॥ नामकृत्वाथैनमुपति-ष्ठते ॥ ५२ ॥ यावाइयंवेदिःसप्तविधस्य ॥ ५३ ॥

अयमेवाकाशोजूः ॥ ५४ ॥ सोयमात्मात्रेधाविहीत एव ॥ ५५ ॥ अथवर्ठंशः ॥ ५६ ॥ अथयामेतामाहु-तिंजुहोति ॥ ५७ ॥ अथयदनुवाक्यामनूच्य ॥५८॥ ब्रह्मचार्यसीत्याह ॥ ५९ ॥ सयत्पशुबन्धेनयजतेऽग्नी-नेवैतत्पुनर्नवाकुरुते ॥ ६० ॥ दशेतिहोवाच ॥ ६१ । अथयत्रस्कन्नर्ठंस्यात् ॥ ६२ ॥ अथयदिप्रप्लुतः ॥ ६३ ॥ सर्वअश्विनाभवन्ति ॥ ६४ ॥ प्रजापति-र्यज्ञमसृजत ॥ ६५ ॥ किंवावपनंमहदिति ॥ ६६ ॥ अथयोस्यनिष्कःप्रतिमुक्तोभवति ॥ ६७ ॥ एतेनहें-न्द्रोतोदैवापःशौनकः ॥ ६८ ॥ चतस्रःसीतायजुषा-कृषति ॥ ६९ ॥ अथोत्तरतःसिकताउपकीर्णाभव-न्ति ॥ ७० ॥ अथरौहिणौजुहोति ॥ ७१ ॥ तेदेवा अब्रुवंस्तावद्वाऽइदर्ठंसर्वयदन्तम् ॥ ७२ ॥ तानिय-द्गृह्णाति ॥ ७३ ॥ योग्नौतिष्ठन् ॥ ७४ ॥ कतम-

आत्मेति ॥ ७५ ॥ अथहैनंमनुष्याऊचुः ॥ ७६ ॥ अथयामिच्छेद्दर्भन्दधीतेति ॥ ७७ ॥ सप्तसहस्रषट्शतशेषंचतुर्विंᳬशतिः ॥ ७८ ॥ प्राश्नीपुत्रादासुरीवासिनः ॥ ७९ ॥ इति चतुर्दशकाण्डे शतोक्ता ऋषयस्तृप्यन्ताम् ॥

अथ व्रतं विसृजते ॥ १ ॥ सवस्मिहर्ताविमंल्लोकमेति ॥ २ ॥ अथनिग्राम्याभ्योग्रहान्विगृह्णते ॥ ३॥ अथगृहपतिःसुब्रह्मण्यामाह्वयति ॥ ४ ॥ तावाएताः॥ ॥ ५ ॥ तानिदशभवंति ॥ ६ ॥ ताएताऽअङ्गुलयः॥ ॥ ७ ॥ मध्यमेवतृतीयांचितिः ॥ ८ ॥ सहोवाच ॥ ॥ ९ ॥ अथव्वर्ᳬशः ॥ १० ॥ तस्माउहैतदवाच ॥ ॥ ११ ॥ सवाएषआत्मैवयत्सौत्रामणि ॥ १२ ॥ मर्यादायाएवलोष्टमाहृत्य ॥ १३ ॥ प्राश्नीपुत्रादासुरीवासिनः ॥१४॥ इतिअंत्यकण्डिकोक्ताऋषयस्तृप्यंताम् ॥

एवंव्रतंविसृजेत् ॥ १ ॥ परमांगतिङ्गच्छतीति ॥ ॥ २ ॥ तस्माद्धोतृचमसात् ॥ ३ ॥ तस्मिन्समुपहृवमिष्ट्वासमिधोभ्यादधति ॥ ४ ॥ द्वादशवात्रयोदशवादक्षिणाभवंति ॥ ५ ॥ यावानग्निर्यावत्यस्यमात्रा तावद्भवति ॥ ६ ॥ तस्मात्समानसंबंधनाः ॥ ७ ॥ तस्मादिमंप्राणाऽउपरिष्टादसंछन्नाः ॥ ८ ॥ संवादेनैवर्त्विजोलोकाऽइति ॥ ९ ॥ ब्रह्मणोब्रह्मस्वयंभुब्रह्मणेनमः ॥ १० ॥ केशिनीरेवेमाआप्येतर्हिप्रजाजायंते ॥ ॥ ११ ॥ तस्मादिमावात्मानमभितोबाहू ॥ १२ ॥ तस्मादुहैतज्जीवाश्चपितरश्चनसंदृश्यन्ते ॥ १३ ॥ वाजसनेयेनयाज्ञवल्क्योनाख्यायन्ते ॥ १४ ॥ अन्त्यपंक्तिकोक्ताऋषयस्तृप्यन्ताम् ॥ इत्यन्त्यपङ्क्तिका ॥

॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ १ ॥ इषेत्त्वोर्ज्जेत्वा० ॥ २ ॥

अग्नऽआयाहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ ३ ॥ शन्नोदेवी० ॥ ४ ॥ इत्यध्ययनम् (नमस्कारः) ततः ॐ तदेतदृचाभ्युक्तंनमृषाश्रांतंयदवंतिदेवाऽइतिनहैवैवंविदुषःकिञ्चनमृषाश्रान्तंभवतितथोहास्यैतत्सर्वेदेवाऽअवन्ति ॥ १ ॥ इति नमस्कारः ॥

अथ ऋषिश्राद्धम् ॥ कृतप्राणायामो देशकालौ संकीर्त्य । ॐ उत्सर्गाङ्गभूतमृषिश्राद्धमहं करिष्ये । इति संकल्प्य ॐ इदं विष्णु० इति मंत्रेण दिग्बंधः । ऋषिश्राद्धस्योपहाराः शुचयो भवन्तु इत्युपहारप्रोक्षणम् । देशकालपात्रसंपदस्तु ॐ अरुंधतीसहितकश्यपादिऋषीणामिदमासनंयथायथाविभागंवास्वाहानमः ॥ अरुंधतीसहितकश्यपादय ऋषयः यथादत्तगंधाद्यर्चनं यथायथाविभागं वः स्वाहा नमः ॥ इति गंधादिदानम् ॥ ऋषिश्राद्धसांगतासिद्ध्यर्थं सप्तसंख्याकान् ब्राह्मणान् यथाकालेन यथासंपन्नान्नेन

तर्पयिष्यं तेन अरुन्धतीसहितकश्यपादयऋषयः प्रीयन्ताम्॥ऋषिश्राद्धसांगतासिद्ध्यर्थं हिरण्यनिष्क्रयभूतां दक्षिणामाचार्याय तुभ्यमहं संप्रददे ॥ ततः आचार्यः। ॐ कोदादितिमंत्रं पठेत् । उपविष्टेषु ब्राह्मणेषु उदकादिदानम् ॥ तद्यथा ॐ शिवा आपः संतु सौमनस्यमस्तु । अक्षतं चारिष्टं चास्तु । अघोरा ऋषयः संतु । सन्त्विति प्रतिवचनम् । उत्सर्गकर्मणो न्यूनातिरिक्तदोषपरिहाराय भूयसीं दक्षिणां दद्यात् । तत उत्सर्गांगभूतमृषिश्राद्धं परिपूर्णमस्तु अस्तु परिपूर्णमिति विप्रा वदेयुः । ततः ॐ सहनौऽस्तुसहनोऽवतुसहनऽइंद्रंवीर्यंवदस्तुब्रह्मइन्द्रस्तद्वेदयेन यथा नविद्विषामह इति ॐ उभाकवीषु वा यो नोधर्मःपरापततपरिसख्यस्यधर्मिणो व्विसख्यानिविसृजामह इति च सर्वे जपेयुः विरताःस्मेति प्रब्रूयुः ॥ इत्यृषिश्राद्धम् ॥ अथ विसर्जनम् । ॐ उत्तिष्ठब्रह्मणस्पतेदेवयन्तंस्त्वेमहे ॥ उपप्रयंन्तुमरुतं‿सुदानवऽइंद्रप्राशूर्भवासचा ॥ ॥ १ ॥ स्वस्वप्रवरान्विसर्जयित्वाजलेप्रवाहयेत् । ॐ

समुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳसवितारङ्ग च्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाछंदाꣳसिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छ स्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वाहाग्निंवैश्वानरङ्गच्छस्वाहामनोमेहार्दियच्छदिवन्तेधूमोगच्छतु स्वर्ज्योतिः पृथिवींभस्मनापृणस्वाहा॥२॥ ततो द्विराचमनं कुर्युः ॥ अनेनाध्यायोत्सर्गकर्माङ्गत्वेन कृतेन ऋषिपूजनतर्पणादिकर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति श्रावणीप्रयोगः समाप्तः ॥

अथ रक्षाबंधनमस्यामेव पूर्णिमायां भद्रारहितायां कार्यम् । तत्रादौ अपराह्णे । सर्षपाक्षतहेमसहितां विचित्रक्षौमवस्त्रैर्वा कार्पासतंतुभिर्ग्रथितां शुभां रक्षापोटलिकां शुद्धभाजने संस्थाप्य कुंकुमाक्षतैरभ्यर्च्य ब्राह्मणान्संपूज्य दक्षिणाभिः संतोष्य पूर्वमुखो ब्राह्मणद्वारा रक्षाबंधं कुर्यात् ॥ तत्र मंत्रः ॥ येन बद्धो

बली राजा दानवेंद्रो महाबलः ॥ तेन त्वामभिबध्नामि रक्षे मा चल मा चल ॥ १ ॥ इति । अनेन विधिना यस्तु रक्षाबंधं समाचरेत् ॥ स सर्वदोषरहितः सुखी संवत्सरं भवेत् ॥ १ ॥ इति रक्षाविधानम् ॥

अथ गोत्रनिर्णयः ॥ तत्र चतुर्विंशतिगोत्राणि (तथा च मनुः) । शाण्डिल्यः काश्यपश्चैव वात्स्यः सावर्णकस्तथा ॥ भरद्वाजो गौतमश्च सौकालीनस्तथापरः ॥ १ ॥ कल्पिषश्चाग्निवेश्यश्च कृष्णात्रेयवसिष्ठकौ ॥ विश्वामित्रः कुशिकश्च कौशिकश्च तथापरः ॥ २ ॥ घृतकौशिकमौद्गल्यौ आलम्यानः पराशरः ॥ सौपायनश्च चित्रश्च वासुकी रोहितस्तथा ॥ ३ ॥ वैयाघ्रपद्यकश्चैव जामदग्न्यस्तथापरः ॥ चतुर्विंशति वै गोत्राःकथिताः पूर्वपण्डितैः ॥ ४ ॥ (तत्रैव) जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमाः ॥ वसिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिणः ॥ १ ॥ एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते ॥ (धनंजयप्रदीपे कुलदीपिकायां च) सौकालीनकमौद्गल्यौ पराशरबृहस्पती ॥ कांचनो विष्णुकौशिक्यौ कात्या-

यनात्रेयकाण्वकाः ॥ १ ॥ कृष्णात्रेयः सांकृतिश्च कौण्डिन्यो गर्गसंज्ञकः ॥ आङ्गिरस इति ख्यातः अनावृकाख्यसंज्ञितः ॥ २ ॥ अव्यजैमिनिवृद्धाख्याः शाण्डिल्योवात्स्य एव च ॥३॥ सावर्ण्यालम्पायनवैयाघ्रपद्यश्च घृतकौशिकः ॥४ ॥ शक्तिः काण्वायनश्चैव वासुकी गौतमस्तथा ॥ शुनकः सौपायनश्चैव मुनयो गोत्रकारिणः ॥ एतेषां यान्यपत्यानि तानिगोत्राणि मन्यते ॥ ५ ॥ सर्वेंचत्वारिंशद् गोत्राः ॥ ४० ॥ यस्य विस्मरणादिना गोत्रनाशस्तस्य काश्यपं गोत्रम् ॥ गोत्रनाशे तु काश्यपमिति हेमाद्रौ व्याघ्रोक्तेः ॥ सर्वाःप्रजाः काश्यप्य इति श्रुतेश्च ॥ इति गोत्रनिर्णयः ॥ अथ प्रवरनिर्णयः ॥ प्रवरा गोत्रप्रवर्त्तकमुनिव्यावर्त्तको मुनिगणः)॥तथा च ॥ जमदग्निगोत्रस्य जमदग्न्यौर्व्व वसिष्ठास्त्रिप्रवराः ३।भरद्वाजगोत्रस्य भरद्वाजाङ्गिरसबार्हस्पत्याः ३। विश्वामित्रगोत्रस्य विश्वामित्रमरीचिकौशिकाः ३ । अत्रिगोत्रस्य अत्र्यात्रेयशातातपाः ३ । गौतमगोत्रस्य गौतमवसिष्ठबार्हस्पत्याः ३ । वसिष्ठगोत्रस्य वसिष्ठशक्तिपराशराः ३ । केषाञ्चित्त वसिष्ठात्रिसांकृतयः ३। काश्यपगोत्रस्यकाश्यपावत्सार-

नैध्रुवाः ३ । अगस्त्यगोत्रस्य अगस्तिदधीचिजैमिन-
यः ३। सौकालिनगोत्रस्य सौकालिनाङ्गिरसबार्हस्प-
त्यावत्सारनैध्रुवाः ५ । मौद्गलगोत्रस्य और्वच्यवन-
भार्गवजमदग्न्याप्नवन्तः ५ । पराशरगोत्रस्य पराशर-
शक्तिवसिष्ठाः ३ । बृहस्पतिगोत्रस्य बृहस्पतिकपि-
लपार्वणाः ३ । कांचनगोत्रस्य अश्वत्थदेवलदेवरा-
जाः ३ । विष्णुगोत्रस्य विष्णुवृद्धिकौरवाः ३ । कौ-
शिकगोत्रस्य कौशिकाऽत्रिजमदग्नयः ३ । कात्याय-
नगोत्रस्य अत्रिभृगुवसिष्ठाः ३।आत्रेयगोत्रस्य आत्रेय-
शातातपसांख्याः ३ । काण्वगोत्रस्य काण्वाऽ-
श्वत्थदेवलाः ३ । कृष्णात्रेयगोत्रस्य कृष्णात्रे-
यात्रेयवासाः ३ । सांकृतिगोत्रस्य अव्याहारात्रि-
सांकृतयः ३ । कौण्डिन्यगोत्रस्य कौण्डिन्यस्तिमि-
ककौत्साः ३ । गर्गगोत्रस्य गार्ग्यकौस्तुभमाण्ड-
व्याः ३ । आङ्गिरसगोत्रस्य आङ्गिरसवसिष्ठबार्हस्प-
त्याः ३ । अनावृकाक्षगोत्रस्य गार्ग्यगौतमवसि-
ष्ठाः ३ । अव्ययगोत्रस्य अव्ययबलिसारस्वताः ३ ।
जैमिनिगोत्रस्य जैमिन्युतथ्यसांकृतयः ३ । वृद्धि-

गोत्रस्य कुरुवृद्धाङ्गिरोबार्हस्पत्याः ३। शाण्डिल्य-गोत्रस्य शाण्डिल्यासितदेवलाः ३ । वात्स्यगोत्रस्य वर्णगोत्रयोः और्व्वच्यवनभार्गवजामदग्न्याप्नवन्तः ५। आलम्बायनगोत्रस्य आलम्बायनशालङ्कायनशाकटायनाः ३। वैयाघ्रपद्यगोत्रस्य सांकृतिः १। घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः ३। केषाञ्चित् कुशिककौशिकबंधुलाः ३। शक्तिगोत्रस्य शक्तिपराशरवसिष्ठाः ३। काण्वायनगोत्रस्य काण्वायनाङ्गिरसबार्हस्पत्यभरद्वाजाजमीढाः ५। वासुकिगोत्रस्य अक्षोभ्यानन्तवासुकयः ३। गौतमगोत्रस्य गौतमाप्सरोङ्गिरसबार्हस्पत्यनैध्रुवाः ५। केषाञ्चित् गौतमाङ्गिरसवासाः ३। शुनकगोत्रस्य शुनकशौनकगृत्समदाः ३। सौपायनगोत्रस्य और्व्वच्यवनभार्गवजामदग्न्याप्नवन्तःप्रवराः ॥ ५॥ इति धनंजयकृतधर्म्मप्रदीपे गोत्रप्रवरनिर्णयः समाप्तः॥ (उद्वाहतत्त्वे) क्षत्रियवैश्यशूद्राणामतिदिष्टातिदिष्टगोत्रप्रवरमत एवैतेषां पुरोहितगोत्रप्रवरमिति॥ (तथाचाग्निपुराणे) क्षत्रियवैश्यशूद्राणां गोत्रं च प्रवरादिकम् ॥ तथान्य-

वर्णसंकराणां येषां विप्राश्च याजकाः ॥ इति गोत्रप्रवरनिर्णयः ॥ (सह्याद्रिखण्डे) काहं कोऽहं कुलं किं मे संबंधः कीदृशो मम ॥ स्वस्वधर्मो न लुप्येत तद्धैवं चिंतयेद्बुधः ॥ (पद्मपुराणेऽपि) द्विजन्मानो भवेयुः स्म स्वात्मवृत्तांतवेदिनः । आत्मनो ज्ञातिवृत्तांतं यो न जानाति सत्पुमान् ॥ ज्ञातीनां समवायार्थं पृष्टः सन्मूकतां भजेत् ॥ स्वजातिपूर्वजानां यो न विजानाति संभवम् ॥ स भवेत्पुंश्चलीपुत्रसदृशः पितृवेदकः ॥ गोत्रप्रवरशाखादिगोत्रदैवतसंग्रहम् ॥ स्थापनास्थानतादात्म्यं स्थापकस्यादिलक्षणम् ॥ अत्मनः सर्ववृत्तांतं विज्ञेयमिदमादरात् ॥ गोत्रशाखावटंकं च ज्ञातिप्रवरशर्मकम् ॥ देवीं गणपतिं यक्षं नवजातिवाडवाः ॥ इति ॥

अथादिगौडब्राह्मणानामुत्पत्तिः ॥ (ब्राह्मणोत्पत्तिनिबन्धे) जनमेजयनामा वै राजा धर्मपरायणः ॥ नीतिमान् सत्यसंधश्च वेदशास्त्रविचक्षणः ॥ १ ॥ आर्यावर्ते च निवसन् पालयन् धर्मतः प्रजा ॥ वटे-

श्वरं मुनिवरं शिष्यवृंदैः समन्वितम् ॥ २ ॥ यज्ञं कर्तुं समाहूय वेदाब्ध्यब्धीन्दु१४४४संमितैः ॥ ततः परमसन्तुष्टो राजा यज्ञं चकार ह ॥ ३ ॥ देवर्षीस्तोषयामास पूजास्तुत्यभिवादनैः ॥ चक्रे दानान्यनेकानि तोषयामास भूसुरान् ॥ ४ ॥ चकारावभृथस्नानं गुरुं नत्वातिभक्तितः ॥ महापूजां चकारादौ दक्षिणां दातुमुद्यतः ॥ ५ ॥ तदा स ऋषिराण्नैव प्रतिग्रहमथाकरोत् ॥ आज्ञां गृहीत्वा नृपतेः स्वदेशगमनं प्रति ॥ ६ ॥ निर्गतांश्च तदा राजा चैकैकं ग्राममुत्तमम् ॥ लिखित्वा वीटिकामध्ये स्थापयित्वा च पत्रकम् ॥ ७ ॥ एकैकं प्रददौ भक्त्या मुनिशिष्येभ्य एव च ॥ ते तु तांबूलकं मत्वा गृहीत्वा प्रेमपूर्वकम् ॥ ८ ॥ नदीतटं समायाता गंभीरजलपूरितम् ॥ जलमध्ये यदा पादौ संस्थाप्य गमनं प्रति ॥ ९ ॥ मतिं चक्रुस्तदा पादौ मग्नौ तस्या जले ततः ॥ पूर्वं जलप्रतरणं कृत्वा पादेन चागताः ॥ १० ॥ कथं तद्विपरीतं वै जातमत्राधुना मिथः ॥ कृत्वा विचारं चोद्घाट्य पश्चात्तांबूलवीटिकाम् ॥ ११ ॥

ग्रामदानपत्रिकां वै दृष्ट्वातिविस्मयान्विताः ॥ दानप्रतिग्रहान्नष्टा गतिरस्माकमेव च ॥ १२ ॥ एवं निश्चित्य नृपतिं गत्वा प्रोचुर्द्विजातयः ॥ कथं वै गुप्तमार्गेण दानं दत्तं त्वयाधुना ॥ १३ ॥ तदा प्रोवाच नृपतिः साष्टांगं प्रणिपत्य च ॥ विना वै दक्षिणादानं यज्ञः सांगः कथं भवेत् ॥ १४ ॥ क्षमध्वं चापराधं मे कृपां कृत्वा ममोपरि ॥ एवमुक्त्वा स्वदेशे वै वासयामास तान्द्विजान् ॥ १५ ॥ ते गौडब्राह्मणाः सर्वे गौडदेशनिवासिनः ॥ वेदशास्त्रपुराणज्ञाः श्रौतस्मार्तपरायणाः ॥ १६ ॥ आचारेण विहीनाश्च स्पर्शदोषविवर्जिताः ॥ शाखा माध्यंदिनी तेषां वेदः शुक्लयजुः स्मृतः ॥ ॥ १७ ॥ गोत्राणि गौतमादीनि सूत्रं कात्यायनीयकम् । (कालिकापुराणे)वंगदेशं समारभ्य भुवनेशान्तसुंदरि ॥ गौडदेशः समाख्यातः सर्वशास्त्रविशारदैः ॥ इति गौडवंशवर्णनं समाप्तम् ॥

अथ ग्रंथालंकारः ॥ बभूव पूर्वं मरुधन्वदेशे बिकोजिनामा नृपतिर्महात्मा ॥ तस्यैव नाम्ना खलु राजधानी लोके बिकानेर इति प्रसिद्धा ॥ १ ॥ तदन्तरे लेखपुरोपमे पुरे श्रीरत्नदुर्गे सुजनैः सुसेविते ॥

आसीद्वसिष्ठान्वयगौडविप्रो माध्यंदिनीयो बुधजीव-
राजः ॥ २ ॥ विवृद्धमानो विदुषां समाजे विज्ञैर्नरैः
सर्वसमृद्धिभोक्ता ॥ तस्यात्मजा बाणमितास्तु सद्गु-
णाः सुवेदवेदांगचणाः सुशीलाः ॥ ३ ॥ आयातया
तद्द्विजशुद्धचत्वरा वीर्येण सन्ताडितवैरिदुर्जनाः ॥
एतेषु मध्ये गुरुरामकृष्णो ज्ञानेन स्वल्पीकृतसर्वतृष्णः
॥ ४ ॥ स्वबुद्धितः खण्डितवैरिप्रश्नः सुभक्तिसंसर्पित-
देवकृष्णः ॥ तस्याऽभवन्नाम३ मिताः सुपुत्राः स्वधर्म-
यायिस्वकलत्रमित्राः ॥५॥ गृहेषु संलेखितरम्यचित्राः
श्रीकान्तपूजानिरताः पवित्राः ॥ इमानि नामानिभ-
वन्ति:तेषां चतुर्भुजाख्यो विबुधो हि ज्येष्ठः ॥ ६ ॥
कस्तूरिचन्द्राभिधसज्जनोऽपरोऽपरोगुणैर्मण्डितज्येष्ठ-
रामः॥तत्रस्थिता मध्यमपंक्तिपादे कस्तूरिचन्द्राख्यम-
हत्सुशीलाः ॥७॥ तेषां सुपुत्रावनवद्यवंद्यविद्यान्वितौ
द्वौ नितरामभूताम् ॥ चतुर्थिलालाख्यगुरुमुरलाख्यौ
सुज्ञौगुणेनार्दितदुष्टदर्पौ ॥ ८ ॥ तत्रापि ज्येष्ठः खलु
पण्डिताग्रणीः षट्शास्त्रवेत्ता षट्कर्मतत्परः ॥परोपका-
रीद्विजदेवभक्तो हुतावशिष्टान्नसदानुरक्तः॥९॥एतादृशो
गौडकुले बभूव चतुर्थिलालो निजधर्मपालः॥ श्रीसा

म्बपादाब्जविलग्नचित्तः शिष्टानुयायी बहुग्रंथकर्ता १०॥
धर्मशास्त्रेषु निष्णातः कर्मकाण्डस्य मर्मवित् ॥ ज्यो-
तिर्वेत्ता भिषक् श्रेष्ठो नानागौडनिबंधकृत् ॥ ११ ॥
तेनेयं रचिता माला द्विजानां नित्यकर्मणाम् ॥
अनया प्रीयतां शंभुर्भवान्या सह सर्वदा ॥ १२ ॥
रसवेदांङ्कसोमेऽब्दे विक्रमादित्यसंज्ञके ॥ वैशाखशु-
क्लपंचम्यां पूर्णा मालाऽभवच्छुभा ॥ १३ ॥

इति श्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनिवासिना श्रीवासिष्ठ-
गोत्रोद्भवेन पंडितश्रीरामकृष्णामरचंद्रशर्मणां पौत्रेण श्रीक-
स्तूरिचंद्रात्मजेन श्रीचतुर्भुजदत्तसूनुना श्रीमहादेव-
भक्तवाजसनेयिना गौडवंशावतंसद्वादश-
महानिबंधकर्त्रा पण्डितश्रीचतुर्थीलाल-
(चौथमल) शर्मणा विरचिता
नित्यकर्मप्रयोगमाला समाप्ता ॥

॥ शुभमस्तु ॥

पुस्तक मिलनेका ठिकाना—
खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम् प्रेस—बम्बई.